अविनाशी

डा. विश्वनारायण शास्त्री

Dr. Biswanarayan Shastri,
M. A. D. Litt.

Sahitya-Vyakarana-Mimamsa-Shastri, Kavyatirtha, (1923), is a Sanskrit scholar of international repute, writer in Assamese, English and Sanskrit.

He combines in him both traditional Indian learning and the western method of study and research.

Produced nearly one hundred research papers besides a number of publications in Assamese and English.

A freedom fighter and a former Member of Parliament (Loksabha).

Recipient of Certificate of Honour from the Govt. of India for Sanskrit study, and Literary pension for life from the Govt. of Assam. A Fellow of the Indian Council of Historical Research, New Delhi.

With best compliments

DR. Ramakant Shukla

for review Bushashi

1. 1. 87.

अविनाशि

AVINASI

(a historical novel in Sanskrit)

डा० विश्वनारायण शास्त्री एम्० ए० डि० लिट्
साहित्य-व्याकरण-मीमांसा शास्त्रि-काव्यतीर्थः

AVINASI, a historical novel in Sanskrit by Dr. Biwanarayan Shastri, M. A. D. Litt. Sahitya-Vyakarana-Mimamsa-Shastri, Kavyatirtha, formr Member of Parliament (Lok sabha), 'Ritayan' Red cross Road, Guwahati, 781003, and published by Shri Pankaj Goswami for Manjushree Prakashan, Red cross Road, Guwati, 1986.

Published with the financial assistance by the Govt. of India, (Deptt.), Education.

@ Author

Price : Rs. 15·00

To be had of

SARVABHAUMA SANSKRIT PRACHARA SANSTHANAM

D-38/110 HAUZKATRA
VARANASI

Printed at KALPANA PRESS, Ramkatora,
VARANASI

सौगतनयतन्त्रेषु तन्त्रान्वेषणपारगः।
लोकेशचन्द्रस्सुख्यातो मित्रं हि परमं मम॥
ऐतिहास उपन्यासो मयाऽविनाशि-संज्ञकः।
तस्मै समर्प्यते प्रीत्या कण्ठभूषा प्रकल्पताम्॥

प्राक्कथनम्

स्वे महिम्न्येव उपन्यासस्य प्रतिष्ठेति नापेक्षते प्राक्कथनमुपन्यासः। तथापि संस्कृतभाषायामुपन्यासविरचने अयमभिनवः प्रयास इत्यतः कश्चनोपोद्घातो नान्तरायं कुर्यात् सहृदय-हृदयसंवादस्य।

अविनाशिनामधेयमिदमाख्यानात्मकं वस्तु ऐतिहासिकोपन्यासरूपेण विरचितम् आधुनिकोपन्यासशैलीं घटनासंघातं चरित्रचित्रणञ्चानुसृत्य संस्कृतभाषायाम्। सत्स्वपि प्राचीनग्रन्थेषु कथाख्यायिकादिषु विरचितेषु बहुषु काव्यनाटकादिषु च इदानीन्तनैः कृतविद्यैः सुधीभिः, उपन्यासनाम्ना जगति प्रसिद्धायाः साहित्यकृतेः प्रकाशो न दृश्यते गीर्वाणवाण्यामद्यापि। अतः कृतप्रयत्नोऽहमुपन्यासविरचने संस्कृते।

उपन्यासशब्दस्तु प्राचीनैराचार्यैः कल्पितार्थप्रकाशने प्रयुक्तः। तथा च अभूतार्थकथनमेव 'किमिदमुपन्यास' इति कालिदासेन प्रकटीकृतं शाकुन्तले। कोषकृता अमरसिंहेनानुशासितम्—उपन्यासस्तु वांमुखम्।

अस्योपन्यासस्य कथावस्तु समाहृतमितिहासात्मकग्रन्थेभ्य इति ऐतिहासिकमाख्यानम्। कथावस्तुनः खानयः खलु बाणभट्टप्रणीतं हर्षचरितम्, कह्लणस्य राजतरङ्गिणी, दामोदरगुप्तस्य कुट्टनीमतम्, बिल (Beal) महोदयविरचितं चैनिकपरिव्राजो हिउवेन्-चां (धर्मोत्तराचार्यः) इत्यस्य जीवनचरितं तथा भौमवंशोद्भव-कामरूपीयनृपतिभिः प्रदत्तानि शासनानि गौडाधिपैः प्रदत्तानि च सन्ति। नराकाख्यानं कालिकापुराणतः तन्त्रेभ्यश्च गृहीतम्। कथावस्तु समुपवृंहितम् यथापेक्षितम्।

पृष्ठभूमिः

प्राग्ज्योतिषपुरं राज्यं भारते रामायणे च सुप्रसिद्धम्। पुराणेषु बहुषु राज्यमिदं प्राग्ज्योतिषपुरम् कामरूप इति च गीयते। कालिदासेनापि स्वीये रघुवंशे रघुदिग्विजये पारेलौहित्यं राज्यं प्राग्ज्योतिषपुरम् कामरूप इति च वर्णितम्।

करतोयां[1] समारभ्य दिक्करवासिनीं यावत् कामरूपस्य विस्तृतिः पुराणवर्णिता।

वराहरूपिणा विष्णुना प्रलयपयोधिजलात् समुद्धृता धरा विष्णुतेजसा सगर्भा जाता। अथ काले धरा नरकं नाम पुत्रं जनकस्य यज्ञभूमौ प्रासोष्ट। जनकेन स्वान्तःपुरं नीतं पुत्रं धरा कात्यायनी-नाम्ना धात्री भूत्वा पालयामास। प्राप्ते षोडशे वर्षे नरको विष्णुना धरण्या च प्राग्ज्योतिषपुरमागम्य किरातराजं घटकं हत्वा राजा बभूव तत्र। तस्य पुत्रो भगदत्तो महाभारते सुप्रसिद्धः। नरको भूमिपुत्र इति तस्यान्वयो भौमान्वय इति पुराण-राजशासनादिषु सर्वदा समुल्लिखितम्।

गतेषु त्रिसहस्रवर्षेषु ऐतिहासिके काले भौमान्वये वर्मवंश्या राजानो बभूवुः प्राग्ज्योतिषपुरे। ईशवीयसप्तमशतकप्रारम्भे एव भौमान्वये कुमारभास्करवर्मा-ख्यः पराक्रान्तो नृपतिर्बभूव प्राग्ज्योतिषपुरे। भास्करः उत्तरापथाधिपतेः हर्ष-वर्धनस्य समकालीनो मित्रञ्चासीत्।

राज्यार्थं गौडकामरूपविवादो बहुकालाद् प्रबल आसीत्। सकर्णसुवर्णं पौण्ड्रवर्धनमण्डलं कामरूपान्तर्गतं कदाचित् (षष्ठशतके) केनचिद् गौडाधिपेन विजित्य स्वराज्यान्तर्गतं चक्रे। ततश्च भास्करपूर्वजेन भूतिवर्मणा कर्णसुवर्णं जित्वा तत्र नगरं प्रतिष्ठापितम्। गते काले तद्राज्यखण्डं पुनरपि गौडैर्विजितम्। ततश्च शासति भास्करवर्मपितरि सुस्थितवर्मणि कदाचिद् गौडबलं कामरूपा-भिमुखमाजगाम। तत्प्रतिरोधाय सुस्थितस्य द्वौ पुत्रौ बलाच्युताविव समरभूमिं गतौ प्रबलारातिभिर्निरुध्य स्वदेशं नीतौ। दिष्ट्या कुमारौ मुक्तौ।

कथावस्तु

सुप्रतिष्ठितवर्म-भास्करवर्माणौ शत्रुराज्यात् स्वनगरं प्राग्ज्योतिषपुरमागतौ।

---

१. करतोया सदानीरा बाहुदा इत्यमरशासनम्। बाहुभ्यां तरणाद् बाहुदेति क्षीरस्वामी।

ज्येष्ठो मृतः। भास्करः सिंहासनारूढः (६०१ ईशवीयाब्दे) हृतराज्योद्धरणाय कालं प्रतीक्षमाण आसीत्।

इतश्च स्थाण्वीश्वराधिपः प्रभाकरवर्धनो मृतः। तस्मिन् मृते तस्य जामाता मौखरिराजो ग्रहवर्मा कान्यकुब्जे मालवराजेन घातितः। तस्य पत्नी प्रभाकर-दुहिता राज्यश्रीः पलायिता। तत् श्रुत्वा प्रभाकरस्य ज्येष्ठः पुत्रो राज्यवर्धनो मालवजयाय प्रस्थितः। स गौडदेशं प्राप्तवान्। तत्र स गौडाधिपेन राजान्तःपुरे गुप्तघातं घातितः। ततो राज्यवर्धनभ्राता हर्षः सिंहासनारूढः (६०६ ईशवीयाब्दे) मालवजयाय गौडजयाय च प्रस्थितः।

हर्षस्य गौडाभियानं श्रुत्वा भास्करवर्मा सोपढौकनं दूतं प्रस्थाप्य हर्षेण मैत्रीं चकार। स्वयं च महता बलेन गौडाभियानं चकार। पश्चिमोत्तरतः हर्षेण पूर्वतश्च भास्करेण समाक्रान्तो गौडाधिपः शशाङ्कः कलिङ्गाभिमुखं पलायितः। तत्र तेन राज्यं शासितमिति ऐतिहासिकाः कथयन्ति।

भास्करवर्मणा गौडान्तर्गतं कर्णसुवर्णमण्डलं विजित्य तत्र जयस्कन्धा-वारः (Victory capital) स्थापितः। तस्मादेव जयस्कन्धावारात् तेन भूमिदानशासनं प्रदत्तम्।

चैनिकपरिव्राड् हिउवेन्चां यः खलु धर्मोत्तराचार्य इति कल्हणेन वर्णितः नालन्दामहाविहारे वर्षं यावदासीत्। तत् श्रुत्वा भास्करवर्मा तमाजुहाव। धर्मोत्तराचार्यः कामरूपमागतवान्। ततश्च तेन सह भास्करवर्मा कान्यकुब्जं गतवान्। हर्षस्य धर्मसभायां माननीयोऽतिथिः भास्करो हर्षेण बहु मानितः।

वाराङ्गनायाः प्रणयानुरागस्य कृत्रिमतां प्रख्याप्य दामोदरगुप्तेन स्वरचिते कुट्टनीमते भास्करवर्मणि दिवं गते कस्याश्चिद् विलासिन्या दहनप्रवेशनं वर्णितम्। नायम् ऐतिहासिको भास्करवर्मा। वर्णनानुरोधादेव दामोदरेण तथोक्तम्। परमुपन्यासे प्रणयानुरागस्य सुष्ठु वर्णनं कार्यसाधकमिति तदत्र समावेशितम्।

ऐतिहासिकानि पात्राणि हित्वा सर्वं कपोलकल्पितम्। सादृश्यं काकतालीयवत्।

भाषाशैलीमधिकृत्य किञ्चित् कथनं नाप्रासङ्गिकमिति मन्ये। कथावस्त्वनुरोधेन वर्णनानुसारेण च भाषा रूपमास्थाय प्रकाशं नयति विषयं सहृदयहृदयसंवादं च सम्पादयति। अत्र कथावस्तु ऐतिहासिकम्। वर्णनीयविषयोऽपि राजनीतिसमाश्रितः, कुत्रचिद् दर्शनानुसारी। सर्वथा अभिनवः विरचितोऽयमुपन्यास आधुनिकशैलीमनुसृत्य। एतानि मनसि कृत्वा प्रयोजनानुरोधात् शब्दचयनं कृतं शैली चानुसृता। वस्तुतस्तु यद्यपि वर्णनशैली उपन्यासानुसारिणी भाषा यथा प्राचीनैः प्रयुक्ता तथैवात्र स्वीकृता। प्रादेशिकभाषाया अनुवादरूपेण रचिता संस्कृतभाषा न वीर्यवत्तरा भवति, न वा सूक्ष्मानुभूतिप्रकाशने च समर्था। अतः प्राचीना रीतिरेव समाश्रिता।

बहुषु स्थलेषु हर्षचरितस्य प्रभावः सुस्पष्टोऽत्र, विशेषतो हर्षस्य कथाजातवर्णनाप्रसङ्गे। अनिवार्यमेतत्। तथा भास्करवर्मकथावर्णने पुराणानां कामरूपराजशासनानां गौडशासनानाञ्च अनुसरणं क्वचित् क्वचित् परिलक्षितं भवेत्। पठनं सुखकरं भवेत् यथा च अर्थावबोधे काठिन्यं नानुभूयेत केनापीति प्रायशः सन्धि-वियुक्तैव रचना। एकपदे सन्धिर्नित्येति तत्र न वियुक्ता। अन्यत्र यथाकामं प्रयुक्ता।

कतिपये अंशा उपन्यासस्यास्य खण्डशः प्रकाशिताः प्राच्यभारतीपत्रिकायां[२] सम्पादकेन डॉ० नरेन्द्रनाथशर्मणा। तस्यैवाग्रहात् समाप्ततां नीतोऽयं ग्रन्थ इति तस्मै धन्यवादप्रदानेनाऽत्मानमनृणिनं कर्तुमीहे। वाराणसीस्थ-सार्वभौमसंस्कृतप्रचारसंस्थानाध्यक्षेण पण्डितवर्येण श्रीमता वासुदेवद्विवेदमहाभागेन ग्रन्थस्य मुद्रणे महदानुकूल्यं कृतम्, तस्मै हार्दं कार्तज्ञं निवेदयामः। श्रीमत्सुरेन्द्रमोहनत्रिपाठिप्रभृतयः संस्थानसहयोगिनोऽपि धन्यवादार्हाः साहाय्यार्थम्। तस्मिन्नेव संस्थाने अध्यापननिरतो युवा विद्वान् श्रीमद्विद्याधरद्विवेदः आममुद्रणस्य (Proof) संशोधनेन पाण्डुलिप्यां यथापेक्षितां त्रुटिं च दूरीकृत्य मह्यमुत्तमर्णायते। विलसतु विद्याधरस्य विद्येति कामयमानस्तं धन्यवादेन आशिषा च संवर्धयामि। कार्यान्तरव्यापृतं मां ग्रन्थस्यास्य शीघ्रं सम्पूर्णतानयने सततं नोदयन्ती मम धर्मपत्नी श्रीमती मीरादेवी सर्वथा प्रशंसनीया।

---

२ — असम-संस्कृत-परिषदः (Board) मुखपत्रम्

श्री श्रीकृष्णपौराणिक-भागवतोपाध्यायावपि धन्यवादार्हौ लिपिकरणार्थम् अंशस्य ।

दत्तावधानानामपि अस्माकं विवरान्वेषिणा मुद्रणालयदैत्येन मुखं प्रकटीकृतं चौरेणेव कुत्रचित् । तदर्थं क्षामयेऽहं विदुषो वैमनस्यात् । अर्थान्तरग्राहणक्षमा भीषणा मुद्रणप्रमादाः संशोधनरूपेण प्रदत्ताः, तेषु दृष्टिपातेनानुगृह्णीयुः सुधियः । न सतां दोषदृष्टिपरं मनः इति मत्वैव निवेद्यतेऽयं प्रबन्धः । सहृदयसमादर-सूचितम् अवन्ध्यत्वमस्य अभिनवप्रयासस्य भवेदिति कामये । इति ।

‘ऋतायनम्’ विदुषामाश्रवः
रेड्क्रसपथः **विश्वनारायणशास्त्री**
गुवाहाटी
विजयादशमी, १९८६

INTRODUCTION

It is unusual to add an introduction to a novel as it is expected to unfold itself to the readers. The present work, named AVINASI, is a historical novel in Sanskrit. So far the technique is concerned it is entirely a new exercise in this direction in Sanskrit. Sanskrit is very rich both in creative and reflective literatures. Besides **kavyas** and **nataks**, **kathas** and **akhyayikas** by the ancient and medieval poets the quantum of creative literature in Sanskrit by the modern writers is not very small. However, none of the modern writers has made any attempt, so far, to produce a novel in Sanskrit. This is a new attempt to walk on an unknown path.

In view of the fact that the medium of telling the story of the present work is Sanskrit, the theme is historical, and the literatary form is of a novel, a short introduction is considered to be helpful to those who are not well acquainted with the historical events of that period.

The story of this novel is based on an epoch making event of the Indian history in the first part of the seventh century A. D. The sources, which are tapped, for collecting materials for constructing the story, mainly, are—Bana's **Harshacharita**, Damodaragupta's **Kuttanimatam**, Kahlana's **Rajatarangini**, **The Life** (of Huen Chwang) by Beal, the land grant inscriptions by Bhaskaravarman and other kings of Kamarupa, a few such inscriptions by the kings of Gauda, and that one issued by Pulakesin II, and also some **puranas** and **tantras**.

I have entirely relied on the first hand primary sources, and not on the secondary sources i. e. the history of that period written by the historiáns, though, I consulted quite a good number of them. Hence I hold different views on some points where there is no conclusive or convincing evidence in either way.

While constructing the story with materials drawn from the sources mentioned above it has been developed into a full-fledged one of life and vigour by incorporating such incidents and episodes from the contemporary society as is required by the art of story-telling. Different socio-political aspects and cultural trends prevailed in the then society have been introduced to make the events appear as belonged to the seventh century India.

The back ground and the political scene :

The kingdom of Pragjyotisha known as Kamarupa also, is referred to by the former name in the two epics, while it has been mentioned by both the names in the **puranas,** and also by Kalidasa in **Raghuvamsa.** According to some **puranas** Kamarnpa is said to extend from the river Karatoya on the west, to the seat of the goddess Dikkaravasini on the east.

The mythology says that Naraka, the son of the Mother Earth and Varaha-Vishnu was the adopted son of Janaka of Mithila. On attaining the age of sixteen Narak, accompanied by Mother Earth and Vishnu came to Pragjyotisha pura. In a fiercc battle Naraka killed Ghatak, the reigning king of Pragjyotisha and userped the throne. Vishnu, putative father of Naraka, while anointing Naraka on the throne

advised him to remain steadfast in his devotion to Kamakhya, the momant he would lose faith on Her he would be destroyed. In course of time Naraka came into contact with Banasura and lost faith on Kamakhya. He was killed by Krishna. His son Bhagadatta fought against the Pandavas in the battle of Kurukshetra and was killed by Arjuna. His son is Bajradatta, and the line of succession is followed.

In the historic time in the mid fifth century A. D. there sprang up a dynasty headed by Pusyavarman in Pragjyotishapura. All the kings of the dynasty claim their origin to **bhauma** dynasty i. e. the dynasty founded by Naraka, the son of Bhumi. Hence, they are always referred to as **bhaumanvayaja.** Bhaskaravarman of this dynasty, who ascended the throne of Pragjyotisha in 601 ? A. D. was the most powerful king. He was an ally and contemporary of Harshavardhan. Banabhatta while speaking about Bhaskaravarman in his **Harshacharita** traces the genealogy to Bhutivarman, the fifth predecessor of Bhaskara. Bana has not mentioned the length of time gap between Bajaradatta and Pusyavarman and simply says that after many great kings passed away in the **bhauma** dynasty Bhaskara became the king. Huen Chwang calculates the time that passed as three thousand years.

With the design of expansion by the kings of Kamarupa and Gauda there had always been a conflict between these two powers which often led to wars. The bone of contention was the region over Paundravardhana with the city of Karnasuvarna, which changed hands many times. In early sixth century Bhuti varman, the fifth predecessor of Bhaskaravarman conquered the region and to celebrate his

victory issued land grant inscriptions form Karnasuvarna. During the reign of Susthitavarman, father of Bhaskara varman, the region was recaptured by the Gauda king Sasanka. Perhaps the invading army of Gauda advanced towards Pragjyotishapura. Supratisthita and Bhaskara, the two sons of Susthita, fought the enemy, however, they were captured and brought to the enemy kingdom. They were released later on (not known how).

On the other hand, on the north, Prabhakaravardhan of Sthanvisvara became a power to be taken seriously. Prabhakara married his daughter Rajyashree to the Maukhari prince Grahavrman and thus entered into a diplomatic matrimonial alliance with the royal house of Kanyakubja (Kanauj). This development was viewed with alarm by the ever alert king Sasanka of Gauda. In order to counter it Sasanka struck a deal with the rulers of Malva. Thus the rivalry for gaining supremacy in northern India among these powers dominated the political scene in seventh century, which was continued from the previous century.

After the death of Prabhakara the Malava king Budhagupta (?) killed Grahavarman. Sasanka must have had a hand in this assassination. Rajyavardhana, the eldest son of Prabhakara ascended the throne of Sthanvisvara on the death of his father, and marched to Kanyakubja. He then reached the Gauda capital and was treacherously killed by Sasanka. On his brother's death Harsha became the king of Sthavvisvara, and immediately marched against Malava and sent Bbandi with an army to the Gauda kingdom. He assured Bhandi to follow him.

It is not known if Harsha ever reached the Gauda capital and conquered the kingdom. Banabhatta has left many

questions unansweed. What has happened to Rajyashree, why Rajyavardhana came to Gauda, aud what was the reason for killing him treacherously by Sasanka. Banabhatta has not even mentioned the name of Gauda king.

THE PLOT :

Supratisthita and Bhaskara, the tow princes of Kamarupa, after they were released from the enemy kingdom, reached their capital. By this time their father died. The eldest of the two, Supratisthita also died shortly. Bhaskara assumed the reign of the kingdom He was waiting for an opportune moment to regain the lost portion of his kingdom. Harsha's invasion of Gauda brought the desired opportunity. He struck friendship with Harsha and invaded Gauda. Being attacked by two invading armies Sasanka fled the Gauda capital and went to Kalinga.

Bhaskara conquered Karnasuvarna and in order to celebrate his victory issued land grant inscription donating land to the brahmins in Chandrapuri area in Paundra-vardhana region.

The Chinese pilgrim Huen Chwang visited Kamarupa on the invitation of Bhaskara. At that time the pilgrim was at Nalanda and **Mahasthavira** Shilabhadra of the **vihara** was unwilling to allow him to visit Kamarupa but at last he relented and the pilgrim came to Kamarupa. The pilgrim was summoned by Harsha to return immediately to Kanauj. Bhaskara took the pilgrim with him and met Harsha. Bhaskara was the honoured dignitary in the religious congregation arranged by Harsha at Prayag.

Damodaragupta of Kashmir in his **Kuttanimatam** describes a love affair as genuiue between a prostitute

(vilasini) and one Bhaskaravarman. The prostitute, on the death of her beloved Bhaskara, being unable to bear the pang of separation immolated herself on the pyre. It seems that Bhaskaravarman mentioned by Damodaragupta is a fictitious one, and not a historical personage. However, the episode is made an important aspect of the plot in the interest of the story.

Except the known historical personages all other names are fictitious; the similarity or identity of names is merely accidental.

Unlike social novels historical novels present a number of problems in devoloping the story,in arranging the sequence of events and in depiction of characters. Their deeds are well known and they do not allow much scope for twisting. The author has hardly any liberty to give vent to his urge and express his feelings. His insight becomes blured and the view turns opaque due to the well known historical events.

A historical novel has two sets of characters, the first set being entirely historical, the second set is the product of historical circumstances i. e. had there been such and such personages at that point of time, they would have acted surely in this way. An author of a historical novel is bound to pay more attention for depicting the second set of characters and for presenting scenes to make this characters to act. The present author, keeping the historic time, and historic place in view, had taken the advantage of this situation.

Though an attempt has been made to follow the technique of modern novel the expression and the laugnage is strictly classical. A classical language loses its charm and brilliance when it is modernised in style. Hence, the "translation type of Sanskrit" is not used as far as practicable. With a view to make the reading easy and for grasping the meaning quickly often Sandhis are avoided.

Influence of Banahatta's Harshacharita will be felt at many places, particularly when the events related to Harsha are described, so the influence of land grant inscriptions, and the works of Kalidasa and other poets will also bee seen. This is inevitable.

The major portion of the novel was published serially in Prachyabharati (1982-85), the six monthly journal of the Assam Sanskrit Board, Gauhati. This encouraged me to complete the novel. I thank Dr. Narendranath Sharma, the Secretary of the Board and editor of the jourual for showing the path. My thanks are also due to Pt. Vasudev Dwivedi, the Acharya of the Sarvabhauma Sanskrit Prachar Samsthanam of Varanasi for his kind advice, to Pt. Vidyadhar Dwivedi and Shri Surendramohan Tripathy of the said Samsthan for kindly correcting the proof and rendering assistance in getting the book printed, respectively. I thank Shri ShriKrishna Puranika and Shri Bhagavat Upadhyaya for their help in copying. My wife Smt. Mira Devi used to goad me for completion of the novel; on finding the novel through the press I feel happy and thank her for constantly reminding me.

Inspite of taking every precaution the printer's devil entered in and raised its ugly head. An errata is added.

As the trekking is through an untrodden path the work is likely to suffer from many defects, such as imperfection, inapt handling the theme, irrelevant matter etc. I hope the learned readers will please take note of such things associated with 'a first' and ignore the trifles.

I shall consider my labour fruitful if it receives the attention of the readers as it deserves.

Vijaya dashmi, 1986 **Biswanarayan Shastri**

'Ritayan'
Redcross Road,
Gauhati.

अविनाशि

अविनाशि

अथ प्रभातप्राया विभावरी। इदानीमपि दिशो धवलतां न भजन्ते। एष अरुणकरोद्गमो वर्तत इति कथञ्चित् प्रतिभाति। एतस्मिन्नेव काले प्रत्यहवद् माधवी चैत्र-सङ्क्रमण-स्नानार्थं समुपगता करतोया-तीर्थम्। महाकालमन्दिराभ्यासे विजनमिदं करतोया-तीर्थम्। दूरे तीर्थान्तरे दूरान्तिकेभ्यः समागता जनाः कोलाहलं कुर्वन्त आसते। स्त्रियो वृद्धाः शिशवो युवानः पौण्ड्रवर्द्धननिवासिनो जनाः स्नानार्थं युगपदेव यतन्ते करतोयाया विमले जले। तेषां स्तवनं श्रुतिपथमायाति।

करतोये सरिच्छ्रेष्ठे पावने शोभने शुभे।
विमलेन जलेनास्मान् पाहि नो दुष्कृतात्कृतात्॥

सचेलं स्नानमाचरन्तः केचन देवान् पितॄंश्च तर्पयन्ति सतिलोदकैः। अन्ये च सवितारं समुद्यन्तं नाभिमात्रं जले स्थिताः कृताञ्जलयः प्रणमन्ति।

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायणशङ्करात्मने॥

माधवी आत्मगतेव तिष्ठति। तुमुलोऽपि शब्दस्तस्याः कर्णकुहरं न प्रविशति। प्रवहद् नद्याः स्रोतः पश्यन्ती सात्मगतं ध्यायति।

........एषा करतोया दक्षिणोदधिगामिनी। वर्षासु विपुला शरदि क्षीणा निरन्तरं दक्षिणसागरं प्रवहति। अद्य यथा तथैवासीदेषा प्रवहन्ती यदाहमत्र प्रथमं समानीता श्रेष्ठिना वसुमित्रेण बहुकालात् प्राक्। एतेषु वर्षपूगेषु वैलक्षण्यं न परिलक्ष्यते करतोयायाः। तदेव जलं, तदेव स्रोतः, सैव गतिः, तानि शैवालानि, त एव कदम्बानिलाः। नाहं तथा, बालाहं यौवने कृतपदा अधुना अष्टादशवर्षीया। कति वर्षाः व्यतीताः? कति शरदः? एको, द्वौ, त्रयः,....नव, दश। आं, दश वत्सरा व्यतीता अत्र तिष्ठन्त्या मम निमेषवत्। ताम्रलिप्तिपत्तने बहूदकस्य ग्रामस्य स्मरामि। पिता कालधर्मेणोपरतो माता सहमृता। पित्रोः प्रियतरः पुत्रः कनीयान् भ्राता श्रुतशीलः कृतोपवीतः। उपरते पितरि मृतायाञ्च मातरि शोकाकुलौ पितृव्येन आवामानीतौ स्वगृहम्। ....अहो, इदानीमपि स्मरामि यथा पितृव्य-भार्यया कलहप्रियया निष्कारणमहमाक्रोशिता प्रतिदिनं यथा च श्रुतशीलो भार्याप्रेरितेन पितृव्येन भृशं ताडितः। व्याजेन मिथ्यापवादेन क्लेशितौ नितरा-

मावाम्। धिक् कष्टम्! न जाने कुत्रेदानीं श्रुतशीलः। स खलु ध्रियते मृतो वा? मा, मैवं, स ध्रियते, ध्रुवं ध्रियते। कुत्र सः! कुत्राहम्!!

का अहं, कुत आगता, को मम पिता, का च माता? कोऽपि न जानाति, जानन्ति खलु जना महाकालवधूरहम्। महाकालो मम स्वामी, प्रभुर्भर्ता दयितः। महाकाल एव ध्येयो ज्ञेयः आराधनीयस्तोषणीयः सदा मम। तस्मै निवेदनीयं यौवनं, प्रदेयं प्रेम, अर्पणीया भक्तिः, प्रकटनीया अनुरक्तिः।

किं मानुषी अहं देवयोषिदिव कालप्रियनाथप्रिया देववधूत्वमापन्ना? देवत्वमपि किम्? नहि, नहि, मानुष्येव यथापूर्वं हर्ष-शोकावेगैर्नितरां निपीड्यमाना। स्मितहास्येन, मधुरेण गीतेन मनोज्ञेन नृत्येनाहं प्रत्यहं निवेदयाम्यात्मानं महाकालाय। तथापि न मम कालप्रियनाथेन हृदयसंवादः, न प्रणयालापः। भिन्नाञ्जनसमप्रभः स्थाणुः स्थाणुवत् तिष्ठति सदा। न मां वीक्षते महाकालो मधुरवीक्षणेन, न मामालिङ्गति दृढाश्लेषेण, मम विम्बफलाधरोष्ठे न व्यापारयति विलोचनानि विरूपाक्षः। ममाकूतिर्मोघा जायते, मम वेदना असंवेदनीया तिष्ठति। दानमेव, न ग्रहणं दानस्य, प्रार्थनैव, न प्रतिदानम्। कुमारस्तु अकथितमपि मम हृद्गतं जानाति। स्मितहास्येन मधुरं वीक्षते माम्। द्वित्राभिरेव वाग्भिः प्रगल्भ इव प्रतिभाति सः। कथं तद्दर्शनदिनादारभ्य मम विक्षिप्तं मनः? किमेतदमर्यादं यद् महाकालं ध्यायन्ती तमेव पश्यामि हृद्गतम्। शयने, भोजने, देवार्चने, नृत्ये, गीते, सर्वत्र तस्य प्रतिमा मामाकुलीकरोत्यकस्मात्। भो स्मरहर! ह्रियतां स्मरः, दीयतां शान्तिः क्षान्तिश्च। 'विनाशिनि मानुषे न मया निवेदनीयम् अविनाशि प्रेम' इत्याचार्येण उक्तम्। अविनाशी महाकालः। तस्मै एव मम प्रेमाञ्जलयः सन्तु। नहि, न मानुषो मया वरणीयः। परन्तु मनस्तु कुमारदर्शनाश्वासि। किं करोमि? दूयते मे हृदयम्। भक्तिरव्यभिचारिणी अनाविलं च प्रेम इति प्रतिश्रुतं मया कथं वितथतां भजते? भो कन्दर्पदर्पहर! त्वमेव गतिः, गतिस्त्वमेव।

इति साश्रुनयना वेपथुमती माधवी तीर्थसोपानपङ्क्तौ निषण्णा हस्ताभ्यां मुखं पिधाय क्षणं स्थित्वा अश्रूणि सम्मार्ज्य पुनरपि महाकालमन्दिरशिखरस्थां पताकां पश्यति। शिखरादामलके आमलकान् मन्दिरगात्रे दत्तदृष्टिः सा महाकालं चक्षुर्भ्यां पश्यन्तीव निर्निमेषं तदेवावलोकयति।

एवं तिष्ठन्त्यास्तस्याः कियान् कालो व्यतीतः सा तन्न जानाति, न जानाति समुत्तीर्णप्रायां स्नानवेलाम्। मुखमुन्नमय्य नद्या नीलाभं प्रवहद् जलं संपश्यन्त्यास्तस्याः आत्मनि चिन्ता जाता……

……महाकालः सनातनः, करतोयापि चिरं प्रवहति दक्षिणोदधिम्। एषा गच्छत्येव न पुनः प्रत्यावर्तते। मन्ये महत् खलु आकर्षणं समुद्रस्य। कथं नाकर्षति मां महाकालः? नाहं सनातनी, न चिरन्तनी। अचिरस्थायि मम जीवनं यौवनं वयः। किञ्चिन् मया चिरन्तनस्य अचिरस्थायिन्या कर्तव्यम्? मृत्युञ्जयः किं मह्यममरत्वं दास्यति? नहि, न दास्यति, न प्रादात् कस्यापि। कुमारो मम समानधर्मा, विनाशी तस्य कायः। अविनाशि तु तस्य आत्मनो जायमानं प्रेम। तदेव ग्राह्यम्, स एव मम दयितः, न महाकालः, न पाषाणखण्डः। नहि नहि…।

क्षणादेव सचेतनतां गता सा स्मरति—हा धिक्! किं मया व्यभिचारिण्या प्रलपितम्। शान्तं पापम्। महाकालवध्वा नैवं चिन्तनीयम्। प्रभो! क्षन्तव्यं मम चापल्यम्।…अहो महत् कष्टं कुमारविस्मरणम्! किं करोमि? करतोयासलिले आत्मानं विलीनं करोमि? तथा सति कुमारस्य किं भविष्यति? जीवामि खलु तस्य कृते,……जीवामि।

एवं स्थितायां तस्यां दृढपदक्षेपेण आचार्यो देवस्वामी तत्र समागतः स्नानार्थम्। माधवीं सोपानपङ्क्तिस्थां दृष्ट्वा आचार्यो ब्रूते।
—वत्से! किमिदानीमपि न स्नातासि? किं चिन्तयसि? गुरोः प्रसादात् सर्वं सुसम्पन्नं भविष्यति। त्यज वृथा चिन्तनम्। त्वरतां, स्नानवेला समुत्तीर्णा। अद्य विशेषेण पुष्पाञ्जलिः प्रदेयो महाकालाय त्वया। अद्य दशवार्षिकव्रतोद्यापनं तव। एहि।

इत्युक्त्वा आचार्यो देवस्वामी नदीतीर्थमवतीर्णवान् अवगाहनाय। अरुणोदयकाले न तेनोपलक्षितं माधव्या नेत्रवक्त्रप्रकटितं वैकल्यं, नावधारिता विवर्णता, नाचिह्नि नयनाश्रु, नादृश्यत वेपथुश्च। यदि तावदद्रक्ष्यत् तर्हि स विस्मयाविष्टोऽभविष्यत्।

माधवी तूर्णं करतोयामवगाह्य तरुणार्करागं क्षौमदुकूलं वासो वसाना वसन्तपुष्पाभरणा कनकधुस्तूरहस्ता पर्याप्त-पुष्पस्तबकावनम्रा संचारिणी पल्लविनी लतेव महाकालमन्दिरं प्रविष्टा। देवस्वामी तु पूर्वमेव तत्रागत्य ध्याननिरत आसीत्। अवसिते ध्याने दूर्वाक्षत-करवीरकुसुमैः कल्पितार्घ्याय तस्मै महाकालाय सप्रणामं निवेदयति।

जटाकटाह-सम्भ्रमभ्रमन्-निलिम्पनिर्झरी-
विलोल-वीचि-वल्लरी-विराजमानमूर्द्धनि।
धगद्-धगद्-धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम॥

इत्यवसरे माधवी महाकालसमीपं गत्वा कनकधुस्तूरं लिङ्गस्योपरि स्थापितवती। क्षणादेव पाषाणस्य काठिन्यमसहमानमिव पुष्पं लिङ्गमस्तकात् गौरीपीठे पतितम्। साष्टाङ्गपातं प्रणमती माधवी तन्न दृष्टवती, परन्तु देवस्वामी तद् दृष्ट्वा अमङ्गलाशङ्कया शङ्कितो जातः। सर्वावयवानवद्यां माधवीं स मस्तके स्पृष्ट्वा आशीर्वचनं तस्यै ददाति।

—वत्से! उत्तिष्ठ। उद्यापितं तव व्रतं, समाप्ता व्रतचर्या। पश्य महाकालं सुप्रसन्नम्। एष देवादिदेवः, एष एव तव भर्ता, स्वामी, प्रभुर्दयितः। त्वं महाकालवधूः। दशवर्षेभ्यः पूर्वं त्वं महाकालवधूत्वेन वृता, अद्य तद् व्रतं पूर्णतां गतम्।

एवं कथयति देवस्वामिनि माधवी भूमिन्यस्तजानुः कृताञ्जलिर्महाकालं पश्यन्त्यास्ते। आचार्यः प्रत्यहवत् तस्या ललाटे भस्मतिलकं दत्वा चिबुकं हस्ताभ्यां किञ्चिदुन्नमय्य पुनरपि सहर्षं कथयति।

—कन्ये! माधवि! पश्य महाकालं दयितचक्षुषा, धार्यतां प्रेमपूर्णान्तःकरणे धिया, मन्यतां मनसि चानुरागिणि मत्या, एष एव तव स्वामी, भर्ता, प्रभुर्दयितः, त्वं महाकालवधूः।

माधवी दशवर्षेभ्यः शृण्वन्त्यास्ते एतद् वचनम्। श्रुत्वा च पूर्वं सा हृदि तथैव धारयति स्म। अद्य आचार्यवचनं श्रुत्वा महाकालं दयितत्वेन चिन्तयन्त्यास्तस्या मनो नवद्वारनिषिद्धवृत्ति अपि कुमारमेव पश्यति रूपयौवनाढ्यम्। सोपहासमिव सात्मगतं चिन्तयति—'महाकालवधूरहं, न कन्या, न स्वसा, न माता, न प्रियतमा, केवलं वधूः। देवमानुषयोर्महती भिदा। कुत्रानयोस्तुल्यधर्मित्वम्। क्व अचेतनं पाषाणखण्डम्, क्व चाहं प्रोद्भिन्नयौवना विषयेन्द्रियप्रवणा? किमाश्चर्यं चेतनाचेतनेषु प्रकृतिकृपणो देवस्वामी? नो चेत् कथमेतत् संगच्छते। महाकालवधूरिति संज्ञा प्रदत्ता बुद्धिभेदहानये कर्मसंज्ञिनाम्। वस्तुतस्तु देवदासी वारयोषाहम्, अप्सरोवृत्तिं चरिष्यामि। अहो महाकाल! प्रभो! मां घोरे कर्मणि मा नियोजय। त्वामेव सेवे⋯सर्वं त्वमेव' इति सा प्रसारितहस्ता पञ्चाङ्गालिङ्गितभूमिः पुनरपि महाकालं प्रणमति।

कृशपरिणतिचेतः क्लेशवश्यं क्व चेदं
क्व च तव गुणसीमोल्लङ्घिनी शश्वदृद्धिः।
इति चकितममन्दीकृत्य मां भक्तिराधाद्
वरद! चरणयोस्ते वाक्यपुष्पोपहारम्॥

एवं माधवी प्रणमति चिरम्।

——— ———

२

अस्ति करतोयातीरे प्राचीनं महाकालमन्दिरम्। दूरान्तिकेभ्यो जनास्तत्र समागच्छन्ति महाकालदर्शनाय। आचार्यो देवस्वामी राज्ञा नियुक्तो महाकाल-पूजनार्थं निवसति मन्दिराभ्यासे चतुःशालायाम्। पञ्चविंशतिः देवकुलिकाश्च महाकालसेवानिरता निवसन्ति तत्र सकुटुम्बिकाः। प्रत्यहं प्रातः देवस्वामी करतोयायां स्नात्वा षडक्षरस्तोत्रेण बीजमन्त्रेण महाकालमर्चयति। तदनन्तरं समुपस्थिता भक्ताः क्षीरेण नीरेण च स्नापयित्वा पुष्पाञ्जलिभिर्बिल्वपत्रैश्च पूजयन्ति महाकालम्। सायंकालेऽपि प्रातरिव पूजार्चनं भक्तानां सवादित्रं महाकालस्य। देवदासीनां नृत्यं तदनुसरति। रूपयौवनाढ्या नृत्यपटीयस्यो युवत्यो नृत्येनात्मानं निवेदयन्ति महाकालाय। हास्येन लास्येन हावं भावञ्च प्रकटयन्त्यो देवदास्यो नरीनृत्यमानाः तोषयन्त्याशुतोषं रञ्जयन्ति च भक्तान्। सर्वास्ता महाकालभर्तृकाः, नान्यं भर्तारं कामयितुमीशाः। महाकालोत्सृष्टाः ताः भुजिष्या नागरिकाणां वित्तविभवशालिनाम्।

अथ कदाचित् सांयात्रिको वसुमित्रो नौवाणिज्येन तत्रागतः। इतः पूर्वमपि वारत्रयं तत्रागतवान् स इति जानाति देवस्वामिनं देवकुलिकाश्च। चीनांशुकानां मृगनाभीनां कालागुरुप्रभृतीनां पणनं कृतवता श्रेष्ठिना वसुमित्रेण कलानिपुणा युवत्यश्च देशाद् देशान्तरं नीयन्ते। आपौण्ड्रवर्धनाद् गान्धारान् यावद् वाणिज्य-व्यपदेशेन तस्य गतिः। पारसीकेष्वपि वंक्षुनद्यां तस्य तरीर्वाह्यते इति वार्तापि श्रुता। नाना-दिग्देशेभ्यः समानीता युवत्यो राजान्तःपुरेषु सामन्तावरोधेषु प्रेष्यन्ते तेन काञ्चनमूल्येन, कदाचिद् देवमन्दिरेष्वपि।

वसुमित्रो महाकालदर्शनानन्तरं देवस्वामिनमाचार्यं द्रष्टुकामस्तस्य चतुःशालां गतः। समुद्रगृहे मित्रं वसुमित्रं दृष्ट्वा आचार्यः कालपात्रोचितसपर्यया तं तोषयन् कुशलादिकमपृच्छत्। ततश्च आचार्योऽब्रवीत्।

—भोः श्रेष्ठिन्! महाकालं सेवमानः प्रौढोऽहमिदानीं वार्द्धक्ये कृतपदः। त्वया समानीता योषितः नृत्येन गीतेन महाकालं तोषयन्त्यो जनानामानन्दं जनयन्ति। कलानिपुणानां तासां साहचर्यं कामयन्ते नागरिकाः। ताः खलु मन्दिरस्य विजयपताकाः, परं नाहं तृप्तिमाप्नोमि। महती मे कामना यत् समर्पयामि महाकालाय अनाघ्रातं पुष्पं किसलयमलूनम्। गौडी काचित् समर्पणीया देवादिदेवाय। बाल्यात् प्रभृति सा शिक्षणीया चतुःषष्टि-कलासु तपश्चर्यायाञ्च। ततः प्राप्ते वयसि सा समर्पणीया। आनीयतां गौडी रोहिणी वा कुलोद्भवा सर्वलक्षणसम्पन्ना कन्यका।

तच्छ्रुत्वा क्षणं मौनमास्थाय श्रेष्ठी कथयति ।

—दुर्लभमेतादृशं रत्नं, दुष्करमिदं कार्यम् । भवतु, देवप्रसादाद् यतिष्ये सर्वथा । आगामिनि शरदि अहमत्रागमिष्यामि । तदैव आनेष्यामि कन्यकाम् ।

कथयन्नेवं श्रेष्ठी स्वस्थानं गतः आचार्याभिवादनपूर्वकम् । वसुमित्रप्रस्थानानन्तरं देवस्वामी तु कदा स प्रत्यागमिष्यति, कदा शरत्कालो भवेत् इति चिन्तयन्नास्ते । नातिदीर्घोऽपि कालः अपेक्षमाणस्य तस्य दीर्घतर इव प्रतिभाति ।

अथ हेमन्तो गतः, शिशिरवसन्तौ व्यतीतौ, ग्रीष्मो वर्षासु परिणतः, व्यतीता वर्षाः, समागता शरद् । अथ शरदि द्वितीये मासे धवलपताकालाञ्छिता पोतश्रेणी सांयात्रिकवसुमित्रस्य करतोयायां दृष्टिपथमागता जनानाम् । पोतश्रेणीषु श्रेष्ठिनो नौकायां माधवी नाम अष्टवर्षीया कन्या विद्यते । वसुमित्रो महता यत्नेन तां स्वीयप्रकोष्ठे सेविकया रेवत्या स्थापयति । तस्याः सेवायां नियुक्ता रेवती तां प्रत्यहं कवोष्णजलेन कर्पूरमिश्रितेन स्नापयति । सुरभिगन्धिभिरनुलेपनैः चर्चयति तस्या अङ्गानि यथा त्वक् मसृणतां भजेत । माधव्याः पोतागमनादारभ्य प्रत्यहं तस्याः सेवां कुरुते रेवती । शरीरचर्चया सेवया प्रकामशयनभोजनैर्माधवी कैरवकोरककमनीयकान्तिमाधत्ते दिनाद् दिनम् । तां तथाविधां पश्यन् वसुमित्रः परं परितृप्त आत्मानं कृतकृत्यं मनुते । महाकालमन्दिरं प्राप्य वसुमित्रः समुत्तीर्णायां सायंसन्ध्यायां माधव्या सह प्राविशत् देवस्वामिभवनं केनाप्यनुपलक्षितः । आचार्यस्तु सायन्तनीं पूजां समाप्य चतुःशालायाः समुद्रगृहाभ्यन्तरे एकाकी आसीत् । प्रविशन्तं वसुमित्रं विलोक्य तमाह्वयति आचार्यः ।

—एहि वसुमित्र, एहि । अत्रोपविश ।

वसुमित्रस्तु आचार्यसमीपं गत्वा प्रणामपूर्वकं कथयति ।

—एषा माधवी नाम कन्यका । एनां भवद्भ्यः समर्पयामि । गृह्यतामेषा महाकालप्रीतये ।

माधवीं विकाशोन्मुखीं विलोक्य देवस्वामी परां तृप्तिमापन्नो ब्रूते ।

—साधु, श्रेष्ठिन् ! साधु सांयात्रिक ! प्रतिश्रुतं पालितं त्वया । ननु कुतस्त्या इयम् ? कियद्वर्षीया ?

वसुमित्रः कथयति ।

—श्रूयतां सावशेषम् । अस्ति ताम्रलिप्तिपत्तने बहूदको नाम ग्रामः । तत्र वसति श्रोत्रियो वेदमित्रो वाजसनेयी । कालधर्मेण तस्मिन्नुपरते भार्यायां च सहमृतायां तयोर्दुहिता अष्टवर्षीया माधवी पितृव्यगृहे दुःखेन कालं यापयति स्म । महता अर्थव्ययेन मया भवदर्थमानीता सुलक्षणेति ।

आचार्यः स्मितहास्येन ब्रूते ।

—ज्ञातं, दृश्यते कनकश्यामा अष्टवर्षीया इयं गौरी । महाकालाय यथाविधि सम्प्रदास्यामि गौरीं श्वः प्रभाते । वसुमित्र ! त्वयाहं कृतार्थीकृतः । माधवीं महाकालवधूत्वे वृत्वा कलानिपुणां करिष्ये, भविष्यति सा मन्दिरललामभूता । भवतु, सुवर्णमुद्राशतेन फलेन तव क्लेशः सार्थकतां गच्छतु । भूयात् ते महाकालो मङ्गलाय । गृह्यतामेषा मुद्राशतपूर्णा मञ्जूषा । महाकालस्ते सहायः ।

'यथा रोचते आचार्याय' इत्युक्त्वा श्रेष्ठी मञ्जूषां गृहीत्वा स्वीयपोताभिमुखं गतवान् ।

अथापरेद्युः प्रातः देवस्वामी माधवीं करतोयायां स्नापयित्वा महाकालमन्दिरमानीतवान् । तां पार्श्वे समुपावेश्य स्वयं महादेवमपूजयत् । पूजावसाने माधव्याः कपाले तिलकं दत्वा देवस्वामी अभाषत गम्भीरं मधुरञ्च ।

—वत्से माधवि ! एष देवादिदेवः महादेवः महाकालरूपधृक् तिष्ठति । देवादिदेवाय त्वया आत्मा निवेदनीयः । एष एव तव भर्ता प्रभुर्दयितः । पश्यैनं दयितचक्षुषा । नान्यो मर्त्यस्त्वया कायेन मनसा वाचा काम्यः । महाकालः अविनाशी, तस्मै एव प्रदेयम् अविनाशि प्रेम, नहि मर्त्ययौवनाय कस्मैचित् मानुषाय । महाकाल एव ते सहायः । आत्मानं महाकालाय समर्प्य मृत्योस्त्वममृतं गच्छ । प्रत्यहं यावदहं पूजयामि महाकालं तावदत्र मत्पार्श्वे अत्रासने त्वया समुपविश्य महाकालो दर्शनीयः आराधनीयः । नृत्यगीतेन तोषणीयो महाकालः । नृत्यं त्वया शिक्षणीयं गीतञ्च । अद्य समारब्धस्य व्रतस्योद्यापनं भविष्यति दशवर्षानन्तरं मधुमासे मदनत्रयोदश्यां यदा चित्रायां चन्द्रमाः सकलकलो विराजमानः स्यात्, तदैव तवानुशीलनं नृत्यस्य सार्थकतां भजेत ।

एवं कथयति देवस्वामिनि माधवी तं प्रणमति । देवस्वामी तु तां समुत्तोल्य प्रसारितबाहुभ्यां परिष्वज्य क्षणं तिष्ठति । माधवी परलोकगतं पितरमिव तं मन्यमाना साश्रुनयना सहसा कथयति ।

—पितः ! निराश्रयाहं त्वामेव पितरं वेद्मि । यथारुचि शिक्षय माम् ।

आचार्यस्तस्याः कैरवकोरकसन्निभं मुखं किञ्चिदुन्नमय्य कर्णान्तविस्तृतभ्रूयुगेन शोभितं नीलाभं नयनयुगलं वीक्ष्य स्वात्मजामिव तां मन्यते । अनपत्योऽपि अपत्यस्नेहार्द्रया वाचा सगद्गदं वदति देवस्वामी ।

—वत्से ! स्नेहधन्या त्वम् । अचिरमेव महाकालकरुणालेशं लप्स्यसे । अयि महाकालवधु ! प्रफुल्लचूताङ्कुरवद् भवतु ते गात्रं, अङ्गानि कुसुमितद्रुमे

पुष्पाणीव विकसन्तु, सलिले वाताहतपद्मकलिकानां नृत्यं भजतां ते चरणगतिः। लास्येन भावेन हावेन च त्वं सर्वोत्तमा भव। महाकालस्ते सहायः।

किञ्चिद् विरम्य पुनरपि कथयति।

—कन्ये! सुदीर्घा ते तपश्चर्या। प्रत्यहं त्वया पालनीयमाचरणीयञ्च दैनन्दिनं कर्म यत्नेन श्रद्धया ह्रिया भिया च। नात्र अवहेलना करणीया न वा औदासीन्यं प्रकटनीयम्। इतः पूर्वं ललिता दशवर्षान् यावन्नृत्ये शिक्षिता मया। नृत्यद्वन्द्वे सा सर्वाः पराजित्य नटीमुख्या भूत्वा तिष्ठति। त्वमपि तत्स्थानाभिषिक्ता भवेः। महाकाल एव ते शरणम्।

इति देवस्वामी महाकालमुद्दिश्य प्रणमति। माधवी तमनुकरोति।

देवस्वामिना माधव्याः दिनचर्या निर्दिष्टा। अरुणोदयात् प्रागेव शय्याया उत्थानम्। ततो दन्तधावनम्। तदनन्तरं करतोयायां स्नानम्। स्नानानन्तरं पत्रोर्णं परिधाय मात्रयानुलेपनं धूपं स्रजं च गृहीत्वा दृष्ट्वादर्शे मुखं महाकालार्चनम् आत्मसमर्पणञ्च। ततश्च नृत्यानुशीलनम्। आचार्यो देवस्वामी प्रत्यहं तां शिक्षयति भङ्गिमुद्रासहितं नृत्यम्।

मार्दङ्गिको जयदेवो वादयति मृदङ्गम्। घटिकाद्वये व्यतीते नृत्यानुशीलने प्रातराशः। समाप्ते प्रातराशे संस्कृताध्ययनम्, क्रमाच्च पुराणेतिहासकाव्य-नाटकादीनाम्। मध्याह्ने कदाचित् कालागुरुचन्दनतैलेन हैयङ्गवीनेन वा गात्र-सम्मार्जनम्। तदनु स्नानं भोजनं, भोजनानन्तरं दिवाशय्या च। अपराह्णे गृहीतप्रसाधनाया धात्रेयिकया रेवत्या कलानुशीलनम्। ततश्च शुक-सारिकादीना-मालापनं यथारुचि वा भ्रमणमुद्याने। सायन्तने काले पुनरपि महाकालवन्दनं देवदासीनां नृत्यारम्भात् प्राक्। मन्दिरात् प्रत्यावर्तनानन्तरं नृत्यानुशीलनं नृत्य-शालायाम्। आचार्यस्तां पाठयति नाट्यशास्त्रम्। जयदेवो वादयति सा नृत्यति। वर्षासु च रात्रौ कर्पूरजलेन पुनः स्नानम्। उशीरानुलेपनं फेनकोत्सादनम्। भोजनानन्तरं शयनम्।

माधवी एतां दिनचर्यां प्रतिदिनमनुसरति दशवर्षान्। क्रमाद् बाला माधवी किशोरी सञ्जाता। कैशोर्यमुत्तीर्णा सा इदानीं नवोद्भिन्नयौवना। आगामिनि चैत्रसंक्रमणदिवसे तस्या व्रतस्योद्यापनं भविष्यति। दशवार्षिकतपश्चर्यायाः परिसमाप्तिर्जायेत। ततश्च मदनत्रयोदश्यां नृत्यद्वन्द्वः। नृत्यस्पर्द्धायां तस्या विजयः सुनिश्चितः। ततो नटीमुख्या भूत्वा सर्वेषां मूर्ध्नि सा विराजतेतराम्। एवं सर्वं यावत् सम्मत्स्यमानं तावत् तत्रागतौ द्वौ राजकुमारौ राजपुरुषाभ्यामनुगतौ।

———

३

अथ कदाचित् प्राग्ज्योतिषाधिपतिना सुस्थितवर्मणा चारमुखात् श्रुतं यत् गौडाधिपो रणैषीर्यानमाश्रयति। अचिरादेव प्राग्ज्योतिषपुरं विजिगीषुः सः चतुरङ्गबलेन पूर्वाभिमुखमागमिष्यति। एतच्छ्रुत्वा सुस्थितवर्मा आत्मनोऽस्वास्थ्यं शत्रूणां प्राबल्यं च विचिन्त्य परं वैकल्यमाप्नोति। चिन्ता महती जाता तस्य मनसि। इतः पूर्वं मालवाधिपतिना महासेनगुप्तेन गौडान् विजित्य पौण्ड्रवर्धनाख्यं भूखण्डं गृहीतं तस्मात्। तद् राज्यखण्डं वंशपरम्पराक्रमेण नारकाणामेव। विधि-छलनवशाद् गौडैः विजितम्। ततश्च मालवैः कवलीकृतम्। श्रुतं तेन जयनागे दिवं गते शशाङ्कापरनामा नरेन्द्रगुप्तो गौडानामधिपो भूत्वा दिनाद् दिनं बलेन कोषेण च बलवत्तरो जायते। नूनं मालवराजेन सह भूम्येकदेशत्यागेन उच्छिन्न-सन्धिं कृत्वा सः कामरूपान् जिगीषुः। सुहृत्कोषराष्ट्रदुर्गबलैः सुसम्पन्नः शशाङ्क इति कथितं प्रणिधिभिः। मालवानुकूल्येन स्वतः प्रबलोऽपि प्रबलतरः सञ्जायते सः।

सः चिन्तयति। अस्यां दशायां किं करणीयम्। वर्षपूगेषु सततसमरेण नूतननगरविन्यासेन कोषः क्षीणतां गतः बलञ्चापि। प्रबलारातिभिः किं सन्धातव्यं विग्रहितव्यं वा। 'हीनमानः सन्धिं कुर्यात् अभ्युच्चीयमानो विगृह्णीयात्', इति कौटिल्येन समुपदिष्टम्। अरातिः प्रबलः वयन्तु क्षीणबलाः। तर्हि सन्धिरेव प्रथमः कल्पः। नहि, न तेन सन्धातव्यम्। करदत्वं विना न गौडाः सन्धिं स्वीकरिष्यन्ति। अहो कष्टं चिन्तनम्। निखिलां क्षितिं भुञ्जतां नारकाणां महद् राज्यखण्डमिदं किमरातिकवलीकृतं स्यात्? किं वैष्णवो भौमान्वयः गौडचारणत्वे आत्मानं नियोक्षति? नहि, नहि। नैतद् भवेत्। जीवति खलु सुस्थितवर्मा महाभूतिवर्मप्रपौत्रः। एकाकी खलु पञ्चगौडान् विजिग्ये महाभूति-वर्मदेवः अस्मत्प्रपितामहः।

विधिवशाद् हृतेऽपि पौण्ड्रवर्धने प्राग्ज्योतिषपुरं सर्वथा रक्षणीयम्। जीवति मयि न गौडाः करतोयां समुत्तरिष्यन्ति। अपर्याप्तबलैरपि अस्माभिः यानमेवा-श्रयणीयम् अनन्यगतिकत्वात् संशप्तकवत्। अस्मिन् समये नास्ति मम पार्ष्णिग्राहो न वा आक्रन्दः। चेत् गौडारातिः मौखरी मम मित्रं भवेत्? भवितुमर्हति, यतः शत्रोः शत्रुः कृत्रिमं मित्रं भवति। अथ केनोपायेन मौखरिणमावर्जयामि? दूत-प्रेषणे कालहरणम्। न तावत् कालं गौडाः प्रतीक्षेरन् इति तर्कयामि। भवतु, प्रेषयामि दूतं सोपढौकनमचिरम्। परं नापेक्षणीयं प्रत्यागमनम्। प्रतीक्ष्यमाणे प्रत्यागमने यदि गौडबलं नान्तरा प्रतिबन्धितं प्राप्नोति प्राग्ज्योतिषं पुरं तर्हि

महान् अनर्थो जायेत । न केनाप्युपायेन गृहागतम् अरिमुत्सादयितुं क्षमा भवेम । तथापि प्रेषणीयो दूतः । विग्रहे स्थितः विगृहीतस्य अन्यतो जनपदमपवाहयितुं शक्ष्यामः । आयुधीयप्रायः श्रेणीप्रायश्च मम जनपदः । शैल-वन-नदी-दुर्गसुरक्षितं पुरम् । शक्ष्यामि प्रतिहन्तुं पराभियोगम् । अतो 'विगृहीतो ज्यायसा हस्तिना पादयुद्धमिव' इति सूक्तिमविगणय्य रणयात्रां करिष्यामः । तीर्णकरतोयाः प्रवला भवेयुरिति महानन्दोपत्यकायाम् एव ते प्रतियोद्धव्याः । अनभ्रायां शरदि अशनि-सम्पातम् इव भवतु अस्माकं यानम् ।

एवं चिन्तयतस्तस्य गुल्मरोगेण बलवदस्वस्थस्य नृपतेः महत् कष्टं समुपस्थितम् । कथं कथमपि आत्मानं धारयन् यावद् अवनीपतिः प्रतीहारमाह्वयति तावत् तत्र समुपस्थितः प्रधानामात्यः आर्यगुणः । समागत्य च स राजानं प्रणम्य कृतासनपरिग्रहः स्नेहार्द्रया वाचा अवनिपतिम् अनामयं पृच्छति । राजा तु तस्य जिज्ञासां श्रुत्वापि अशृण्वन् इव पुनरपि तमेव जिज्ञासते ।

—अपि निवेदितं भवद्भ्यश्चारैः यद् गौडभुजङ्गाः अस्माकं दंदशूकाः सन्तः समुद्यतफणास्तिष्ठन्ति ।

—अथ किम् । अस्मिन् एव क्षणे विदितवृतान्तो देवपादं निवेदयितुकामः कालहरणमसहमानः अदेशकालमत्राहं समुपस्थितः । शोभनमेतद् यद् देवपादैः पूर्वमेव श्रुतम् । परं बलवदस्वस्था इव दृश्यन्ते देवपादाः ।

—गौडाः प्राग्ज्योतिषाभिमुखं विजिगीषया आगच्छन्तीति श्रुत्वा कः स्थैर्यं लभेत, कः स्वस्थो भवेत् । अस्वस्थता एव अत्र स्वाभाविकी परिणतिः । अरिः ससैन्यः पारेकरतोयं तिष्ठतीति वार्ता यदि प्राग्ज्योतिषाधिपं नाकुलीकरोति तर्हि तस्य नरकान्वयोत्पत्तिरेव निष्फला स्यात् । अरयः सनद्धाः समरसाधन-सम्पन्नाः, वयं तु इदानीमपि अकृतोद्यमाः । ....अहो ! न जाने किं भविष्यति ? मन्ये महता बलेन अरातिः सिंहनादं कृत्वा समागच्छति । एषोऽहमरातिगर्जनं शृणोमि इव । कर्णं दत्वा श्रूयतां भवद्भिः । श्रूयते किम् ? धरणीतलं तेषां पादाघातैः तलमलायते । पताकाश्रेण्यो दृश्यन्ते चतसृषु दिक्षु । किं न पश्यति भवान् ! अस्मान् ग्रसन्तः समन्ततः समागच्छन्ति शत्रवः । अहो महत् कष्टम् । किम् अस्माकं धरणीतलम् अस्मत्शोणितैरेव परिप्लुतं भविष्यति, न गौडभूमिः ? किमर्थं जीवामि....अकीर्त्तिः मरणादतिरिच्यते....रणं....मरणमेव वा शरणम्....कुमारमभिषिच्य राज्ये स्वयमेव गच्छामि रणाङ्गणम् । कार्यं वा साधयामि....शरीरं वा पातयामि.... ।

गुल्मरोगाक्रान्तः चिन्तोद्भ्रान्तो राजा एवं बहुशः कथयन् नितरां दुर्बलो जातः। तं कथमपि समाश्वास्य आर्यगुणः कथयति प्रस्तुतम्।

—चक्रनेमिक्रमेण सुखं दुःखं च आयाति। विपदि धैर्यमेव धीरतायाः लक्षणम्। दूरीक्रियतां दुर्भावना, अङ्गीक्रियतामुत्साहः, अपाकरणीया शत्रुभीतिः, संग्रहणीया धृतिः विपत्प्रतिकाराय देवपादैरस्माभिश्च। बलवदस्वस्थस्य महाराजस्य रणयात्रा न युज्यते। अतः....

—अतः कनिष्ठकुमारं भास्करमेव सैनापत्ये अभिषिञ्चामि। स खलु शस्त्रास्त्रनिपुणः शरीरेण वीर्येण रूपेण बलवत्तया सर्वानन्यान् अतिशेते परैर्दुरासद इति कुमारामात्येन निवेदितम्। अतः स एव गौडाभियाने सेनापतिर्भवतु। कथयति राजा।

—सुष्ठु उक्तं देवपादैः। आशङ्का मां बाधते। अथ ज्येष्ठः सुप्रतिष्ठित-वर्मदेवो विमनायते। तथा सति भ्रातृविरोधो महान् अनर्थश्च जायेत। तस्माद् द्वावेव समभ्यर्थनीयौ यथा द्वौ सव्येतरविषाणवद् देवपादं सेवेते। भाविनि कालेऽपि राज्यं सुरक्षितं भवेत्।

—साधु! साधु! सम्यक् प्रतिबोधितोऽहमुदर्कदर्शिना आर्येण। शत्रूणां समाराभियोजनं श्रुत्वाहं कार्याकार्यविनिश्चयविमूढो जातः। किमस्माकं बलं पर्याप्तम्? किं हस्त्यश्वरथपदातिकं सन्नद्धं तिष्ठति?

—पराभियानमाशङ्क्य पूर्वमेव मया गजाध्यक्षः अश्वाध्यक्षो महाबला-ध्यक्षश्च समादिष्टाः—'तैः स्वनियोगेषु सदा सतर्कैर्भवितव्यमिति।' ते सन्नद्धा इति विजानीयात्। पर्याप्तत्वं खलु सापेक्षितम्। कियता बलेन गौडाधिपो विजिगीषया समुद्दीप्तः यथार्थतो न जानामि। चारैः कथितं महतीभिः करि-घटाभिः पदातिकैश्च स रणाङ्गणमागच्छतीति। यथा तथा वा भवतु। शत्रुभूमिरेव शोणितेन कर्दमतां यास्यति नास्माकम्।

—तर्हि द्वित्रैरेव दिनैः कुमारौ हस्त्यश्वबलसनाथौ शुभे क्षणे युद्ध-यात्रां कुर्वाताम्। कः विलम्बोऽत्र?

एतच्छ्रुत्वा प्रधानामात्यः आर्यगुणः कञ्चित् कालं तूष्णीमास्थाय ससङ्कोचं ब्रूते।

—सर्वं सुसम्पन्नं वर्तते। मन्ये देवपादानां विदितमेव कोषस्य क्षीणत्वम्। क्षीणे कोषे समरोपकरणानाम् आहरणं पाथेयानां संग्रहणं तथा पोष्याणां भरणं सर्वमाकुलीभवति। तत्रोपायश्चिन्तनीयः।

—कराधानेन धनसंग्रहं विना कस्तत्रोपायश्चान्यः वर्तते ?

—नूतनकराधानेन अर्थसंग्रहे कालहानिर्भवति। तात्कालिकम् एतत् कर्तव्यम्। रणयात्रायां मुहूर्तमपि न यापनीयम्।

—तर्हि श्रेष्ठिनां सार्थवाहानां सांयात्रिकाणाञ्चागारे सञ्चितान् अर्थान् नगरपालाः चौरधरणिकाश्च गृह्णन्तु अविलम्बम्। चेत् कश्चित् प्रतिकूलतामाचरेत् कार्पण्यं वा प्रदर्शयेत् तं राजापथ्यकारिणं समुद्घोष्य चित्रमण्डूककारागारे रणान्तं निक्षिपन्तु भवन्तः। एषा राजाज्ञा पुरे जनपदे च डिण्डिमवादित्रेण प्रचारणीया अचिरमेव। न चात्र विचार्यमस्ति। न कोऽपि क्षन्तव्यः। उक्तं च नीतिशास्त्रकारैः

अछित्वा परमर्माणि अकृत्वा कर्म दारुणम्।
अहत्वा मत्स्यघातीव नाप्नोति महतीं श्रियम्॥

तस्माद् दारुणं कर्म करणीयं राज्यरक्षार्थम्। आपदर्थं धनं विवर्द्धयेत्, राष्ट्रं कोषभूतं स्यात्, कोषो वेश्मगत इत्यपि समुद्दिष्टम्।

तत् श्रुत्वा प्रधानामात्यः किञ्चित् स्मितं कृत्वा शनैः कथयति।

—नूनं ऋजुरेष पन्थाः। परन्तु प्रजानां वैमनस्यं प्रतिकूलत्वं नास्मिन् समये कार्यसाधकम्। प्रकृतिकोपो महदनर्थाय कल्पेत। अतः परिहर्तव्या प्रतिकूलता, नामन्त्रणीयः प्रकृतिकोपः। योगः समाश्रयणीयः, कौशलेन तथा कार्यं साधनीयं यथा सुखित-दुःखिताः न प्रकुप्यन्ति। यथा च सर्वे पौरजानपदाः स्वल्पधना अपि यथाशक्ति धनं दद्युस्तथा करणीयम्।

—किं तत् कौशलम्? को वा पन्थाः? कस्तत्र योगो यथा धनिनो वणिजः गृहपतयः कर्षुकाश्च स्वयमेव राजकोषस्य पूर्णतामादधति।

—प्रथमं तावद् धनस्य प्रयोजनं प्रदर्शनीयम्। ततश्च राष्ट्रे समुत्पन्नं भयं प्रकटनीयमतिरञ्जनेन। महत् परचक्रभयं यद् आपतितं तेन राज्यं समूलनाशं नश्येत्। फलागमा वेणोर्नाशाय इव इयमापत् सर्वेषामन्ताय कल्पते। मा जीविताशां कोऽपि कुर्यात्। सर्वस्वप्रदानेन रक्षणीयं राज्यं, रक्षणीयाः दाराः पुत्राश्च। पौरजानपदेभ्य एवं निवेदनीयं मधुरया श्लक्ष्णया सोपचारया वाचा।

"अस्यामापदि घोरायां सम्प्राप्ते दारुणे भये।
परित्राणाय भवतः प्रार्थयिष्ये धनानि वः॥

प्रतिदास्ये च भवतां सवृद्धिकं भयक्षये।
नारयः प्रतिदास्यन्ति यद्धरेयुर्बलादितः॥
कलत्रमादितः कृत्वा सर्वं वो विनशेदिति।
अपि चेत् पुत्रदारार्थमर्थसञ्चय इष्यते॥"

एवं देशप्राणाः राज्यरक्षार्थं, गृहपतयः पुत्रदाररक्षायै, यशोऽधिगन्तुं वृद्धिलिप्सया च अर्थगृध्नवो धनिनः स्वयमेव धन-रत्न-सुवर्णानि प्रदास्यन्ति। राजकोषः पूर्णतां यास्यति अचिरात् चेत् देवपादैरनुमन्यते।

—सर्वथा सम्मतो मम। कोऽत्र विलम्बः? त्वरताम्। नारयः प्रतीक्षन्ते।

अथ समर-संभार-संग्रह-कृतप्रयत्नेषु सर्वेषु श्रुतं गौडं बलं समागतमिति। तौ कुमारौ सुप्रतिष्ठितवर्म्मभास्करवर्माख्यौ सूर्याचन्द्रमसाविव प्राप्ते बलिन्यपि गौडबले स्तोकैरेव बलैः स्वीयबले संरम्भतः समुपस्थितौ रणाङ्गणम्। बलाच्युताविव तौ यावत् विजयलक्ष्मीकृतालिङ्गनौ अभवतां तावदेव वन्यानां करिणां घटाभिः व्यावेष्ट्य शत्रुभिः स्वदेशं नीतौ। नीत्वा च कर्णसुवर्णदेशस्थे दुर्गे सानुचरौ तौ निरुद्धौ।

कुमारौ शत्रुवंशगतौ इत्यभूत् वार्ता वार्ताहराणां रणक्षेत्रात् प्राग्ज्योतिषं समागतानाम्। श्रुत्वैव राजा पञ्चत्वं गतः। राजनि दिवं गते शत्रुवशं गतयोः कुमारयोः कदा गौडा आपतिष्यन्ति इति प्रजा भयव्याकुलाः सञ्जाताः। लोकानां लोचनेषु लेपमय्य इव अश्रुस्रुतयः, जल्पनेषु श्वसितानि, हृदयेषु निखातानीव दुःखानि अभवन्। गौडभयादिव अदर्शनतां गतं हसितम्, शोकवेगेन वातरोगाक्रान्तमिव नृत्यं जठरतां गतम्, नाश्रूयत कुत्रापि कथाच्छलेनापि परिहासः, श्रुता सोत्कण्ठजिज्ञासा। न केनापि प्राग्ज्योतिषपुरे अस्नायि, न केनापि अभोजि, दूरं गतानि प्रसाधनानि वनितावदनात्, व्यलीयत हावः, भावश्च तिरोहितस्तद्दिने।

एवं स्थितेषु प्रधानामात्यो विषयामात्यैः सम्मन्त्र्य कथमपि राज्यं पालयति। कुमारौ अचिरमेव लोकानां नयनानन्दकरौ भविष्यत इति प्रसारतां गता वार्ता राज्येषु।

द्वित्रैरनुचरैः बलाध्यक्षेण सोमगुप्तेन च सह कुमारौ समानीतौ अरातिभिः। तत्र च निषिद्ध-प्रवेशनिर्गमे कस्मिंश्चिद् दुर्गे सानुचरौ तौ निरुद्धौ। अहर्निशमतन्द्रं दुर्गो रक्षणीय इति राजशासनं ज्ञापितं दुर्गपालाय बन्धुगुप्ताय। अथ कतिपयैरेव दिवसैः सोमगुप्तस्य बन्धुगुप्तेन सख्यमजनि।

—'प्राग्ज्योतिषाधिपतिना महाराजाधिराजेन चन्द्रमुखवर्मणा पूर्वं नियुक्तोऽहम् अस्य दुर्गस्य रक्षणाय दुर्गपालत्वे' इति विज्ञापितवान् बन्धुगुप्तः। विधिवशाद् गौडैः स्वराज्यान्तर्गतं कृतं कर्णसुवर्णमण्डलं दुर्गञ्च। गौडानां निदेशाद् दुर्गं पालयतः मम वर्षाणां द्विचत्वारिंशद् व्यतीतानि। पञ्चोपधा-परीक्षितं राजसेवकं शशांकनियुक्ताः राजपुरुषाः तृणाय मन्यन्ते। विषयस्यास्य शासनमपनीतं मम। न केवलं तत्। स्त्रीलम्पटेन तेन अपहारिता रक्षिभिर्मम कन्या विपाशा वर्षद्वयात् प्राक्। कन्याविरहकातरा मम पत्नी तेनैव शोकेन परलोकं गता। आः कष्टम्! इदानीमपि स्मरामि रक्षिभिराकृष्यमाणायाः विपाशायाः सकरुण-क्रन्दनमार्तिञ्च। 'भोः पितः! रक्ष माम्। एषाहं क्षणमपि न जीवामि। हा मातः! न जाने केन पापेनाहं दशामिमां गच्छामि। पितरौ युवामात्मानं रक्षत। यो वा स वा भवतु मम, नाहम्........' इत्येवमुक्त्वा यावत् सा भृशं रोदितवती तावत् तस्याः मुखं पिधाय वस्त्रेण रक्षिणस्तां बलादाकृष्य रथेन गौडराजधानीं नीतवन्तः।'

एतावदुक्त्वा वृद्धः क्षणं मौनमास्थाय कोटरगतनयनयोः लोलचर्मजरठ-गण्डयोः निपततः अश्रुबिन्दून् उत्तरीयांशुकेन सम्मार्ज्य सोमगुप्तमुखमव-लोकयति। अन्तर्निहितवह्निः बहिः गन्तुकाम इव नयनयो रक्ततामादधानः दृशा सनाथो भवति। क्रोधाग्निना शोकाश्रूणां दहनादिव वाक् रूक्षतां जाता तस्य। चक्षुषा सोमगुप्तं दिधक्षुरिव वृद्धः परुषं कठोरं च ब्रूते।

—अतः परमपि श्रोतव्यमस्ति। अस्ति चन्द्रपुरिविषये कल्याणवर्मा नाम सीताध्यक्षः प्रभविष्णुः। तस्य पुत्रः शस्त्रे शास्त्रे च निपुणः ध्रुवः। ध्रुवाय प्रदेया विपाशा इति निश्चित्य यावद् विवाहमङ्गलाय द्वावेव कुलौ दिवसं गणयन्तौ आस्तां, बान्धवाश्च उत्सवार्थं कृतोद्यमाः, स्त्रियः वस्त्राभूषणानि समाहृतवत्यः, तावदेव कदाचित् दुर्गपर्यवेक्षणार्थं समागतेन कुलपांशुलेन शशाङ्केन दृष्टा हर्म्योपरि स्थिता विपाशा। दृष्ट्वैव असंयतेन्द्रियः स्त्रीलम्पटः दुष्टो दुर्गान्तरात् सन्देशाहरणाय दूतं प्रेषितवान्। दूतमुखादवगतवृतान्तः गूढपुरुषेण ध्रुवस्यायतीं दूषयित्वा गुप्तघातकेन घातितो ध्रुवः। वर्षीयान् तस्य पितापि मिथ्यापवादेन तिरस्कृतो निगृहीतश्च। ततश्च सपरिवारः स देशान्तरं प्रापितः। उपांशुघातेन घातिते ध्रुवे अपहृतायां विपाशायां मृतायाञ्च मद्भार्यायां प्रभावत्यां प्रेषिते च पुत्रे समरे, जीवामि फलोद्गमविहीनस्तरुरिव मन्दभाग्यः! जीवामि खलु। न मम प्रभवति अन्तकोऽपि यावन् न दुःशासनस्येव भीमेन शशांकस्य शोणितेन मया आत्मा तर्पणीयः। अहो दयालुरीश्वरः! समानीतौ कुमारौ। दुर्गकपाटमुद्घाट्य प्रेषयामि तौ स्वराज्यम्। समाहृतबलाभ्यां ताभ्यां शशांको निग्रहणीयो मम।

भोः सोमगुप्त ! निवेदय सन्देशं कुमाराभ्याम्। त्वमपि प्रस्थानाय कालोचितं कुरु। श्वस्तन्यां समुत्तीर्णसन्ध्यायां यूयं सर्वे उन्मुक्तद्वारेण दुर्गान्निष्क्रम्य द्रुतं गच्छथ स्वदेशम्। दुर्गपरिखायाः बहिः वृक्षच्छायेषु स्थास्यन्ति हयाः।

तं सुचिरमवलोकयन् सोमगुप्तः कथयति।

—स्वाभिमानिनौ कुमारौ प्राणसंशयेऽपि न पलायिष्यतः। विधिवशाद् वन्दित्वं गतावपि कुलोचितवीर्यवत्तया दीप्तौ कुमारौ कालं प्रतीक्षमाणौ तिष्ठतः। प्राप्ते काले अरातीन् विजित्यैव गमिष्यतः।

—धिङ् मूर्ख ! नैतत् पलायनम्। क्षात्रं भीरुत्वञ्च छायातपाविव न परस्परं सहेते। कार्यसाधनमुपदिशामि। तदर्थं च प्राणान् हस्ते कृत्वा राजनिग्रहमविगणय्य यतिष्ये। श्रूयतां सावशेषम्। श्वः शिवचतुर्दश्यां नागरिकाः नगरपालाश्च उत्सवपरायणाः स्थास्यन्ति। मम निदेशस्था दुर्गरक्षका दुर्गद्वारमुद्घाट्य शस्त्रपाणयो यथास्थानमधिस्थास्यन्ति रक्षकत्वेन। एतस्मिन्नेव अवसरे मया प्रेषितानि अस्त्राणि गृहीत्वा कुमारौ भवता अनुगामिभिश्च अनुसृतौ बहिर्निर्गत्य परिखां समुत्तीर्य काष्ठसेतुना वृक्षान्तरालम् आगमिष्यतः। तत्र द्रुतगामिनः अश्वान् पञ्च षड् वा यूयं पश्यथ। अश्वान् समारुह्य नगराद् बहिः यास्यथ, न पुनः प्राकारतोरणद्वारेण। प्रधानद्वारान् नातिदूरे दक्षिणेन कदम्बवृक्षाः सन्ति। तस्मिन्नेव स्थाने मम पुरुषाः प्राचीरं विशीर्य गुप्तद्वारं विधास्यन्ति। तेन गुप्तद्वारेण सर्वैः एकैकशः बहिर्गन्तव्यम्। नगराद् बहिः पूर्वाशायां पन्थाः, तेनैव पथा गच्छन्तः प्रभातप्रायायां शर्वर्यां यूयं महाकालमन्दिरं प्राप्स्यथ पारेकरतोयम्।

सोमगुप्तः सोत्कण्ठं जिज्ञासते।

—अथ चेत् बहिर्गमनात् प्राक् वयम् अवरुद्धाः भवाम शस्त्रपाणिभिः सैनिकैः, तर्हि कथं कुमाररक्षा भवेत् ? महान् एष संशयः।

—बलाध्यक्ष ! त्वं भीरुः कापुरुषो जडधीर्वा। मम निदेशात् अत्रत्याः रक्षिणः न प्रतिकूलतामाचरिष्यन्ति, परं साहाय्याय कल्पेरन्। प्राचीराद् बहिर्यदि यूयं समाक्रान्ताः नगरपालभटैः तर्हि विक्रमेण ते पराजेतव्याः। अदृश्या मम पुरुषाः युष्माकं पृष्ठरक्षां करिष्यन्ति। अपि सम्यग् ज्ञातम् ?

'आम्' इति समाभाष्य सोमगुप्तो द्रुतं गत्वा सर्वं कुमाराभ्यां निवेदयति। परेद्युः समुत्तीर्णायां सन्ध्यायां तमसा समावृते धरणीतले घनान्धकारासु चतसृषु दिक्षु यथानिर्दिष्टं दुर्गद्वारमकस्मात् समुद्घाटितं दुर्गरक्षकेण। प्रकोष्ठद्वारे वारत्रयं यष्ट्यग्रेण प्रहारं कृत्वा सङ्केतितमुद्घाटनम्। कृतसङ्केतौ ससहायौ कुमारौ

निःशब्दं बहिर्गतौ। अग्रतो बलाध्यक्षः सोमगुप्तः, तमनुसरतः कुमारौ, ततश्च सैनिकास्त्रयः। ते एकैकशः काष्ठसेतुना दुर्गपरिखां समुत्तीर्य वृक्षश्रेणीषु निबद्धान् हयान् दृष्टवन्तः। इदानीं यावन् न कोऽपि तान् निवारयतीति दुर्गपाले दृढं सञ्जातप्रत्ययास्ते द्रुतं हयानारुह्य प्राचीरद्वाराभिमुखं गच्छन्ति। तमसाच्छन्ने नभसि ते वृक्षान्तरालस्थं सद्योभग्नं प्राचीरद्वारं कथमपि निर्णेतुं प्रभवन्ति। अथ अश्वादवतीर्य भग्नप्राचीरेण ते बहिर्गताः। यावद् बहिः हयमारुह्य ते गन्तु-कामाः तावदेव नगररक्षकैस्ते समाक्रान्ताः। अनुत्तीर्णसन्ध्यायामेव प्राचीरस्थितिं परीक्षितुं भ्रमन् रक्षकः भग्नप्राचीरं दृष्ट्वा किमप्याशङ्क्य नगरपालाय वस्तु-स्थितिं निवेदितवान्। विदितवृत्तान्तो नगरपालः शत्रुणा कृतमेतत् छिद्रमिति रक्षकाः तत्र नियुक्ताः। अथाभ्यन्तरान् निष्क्रम्य यावत् कुमारप्रमुखा हयान् आरोहन्ति तावत् तान् तथाविधान् दृष्ट्वा रक्षिणः शस्त्रास्त्रपाणयो निहन्तु-मुद्यताः। दूरस्थ एव दुर्गपालो विपरीतं समायातं पश्यन् स्वीयपुरुषान् साहाय्यार्थं प्रेरयति। ते सहसा पश्चाद् रक्षिणः यष्टिभिः असिभिः घातयन्ति, सम्मुखतश्च कुमारौ युध्यतः। एवं प्रवृत्ते तुमुले युद्धे न केनाप्यचिह्नि कः कं हन्ति, को वा शत्रुः किं वा मित्रं, क्व स्थातव्यम्, क्व गन्तव्यम्। घनान्धकारे समुद्यतासीनां तेषाम् असिरेव स्वीयप्रभया सूचितः। असिना असेः संघातेन जनितः स्फुलिङ्गः क्षणं प्रकाशते। अथ युध्यमानः सुस्थितवर्मा तरवारिणा आहतो हयात् पतितः। आर्तस्वरेण समीपस्थः सोमगुप्तः कुमारमभिज्ञाय तं महता कष्टेन हयमारोप्य द्रुतं धावत्यश्वेन। तं धावन्तं दृष्ट्वा यावत् केचन रक्षिणः समुद्यतशस्त्रा अनुसरन्ति तावत् सैनिकसहायः भास्करस्तान् निवारयति असिना। परस्परसंघाते केचन मृताः, हतावशिष्टाः दूरं गताः। भास्करानुगामिनां च द्वौ निहतौ। ततः जीवितेन अनुगामिना भास्करो द्रुतमनुसरति सोमगुप्तम्।

वातप्रमिना अश्वेन धावमानो सोमगुप्तः पश्चादागतं अश्वखुरध्वनिं श्रुत्वा किमरयस्तमनुसरन्तीति समाशङ्क्य ततोऽपि द्रुततरधावनाय कशाघातेन अश्वं नोदयति। एतस्मिन्नन्तरे सैनिकद्वितीयो भास्करो विद्युदिव तूर्णं तत्समीपमागत्य ब्रूते।

—सोमगुप्त! मा भैषीः। एषोऽहं ससैनिकस्तव साहाय्यार्थमागच्छामि। कथं भट्टारकः?

भास्करय वचनं श्रुत्वा सोमगुप्तयः रश्मिसंयमनेन मन्दायति अश्वम्। ततश्च सोत्कण्ठं ब्रूते।

—रुधिरधारासिक्तं भट्टारकस्य वक्षःस्थलम्। रक्तक्षरणाद् अचेतन इव प्रतिभाति। निःश्वसिति खलु।·······ननु किमरयः प्रतिनिवृत्ताः ? नो चेन्नेयम् वेला·······

—मन्ये केचन हताः, हतशेषाः स्वात्मानं रक्षन्ति, नास्मान् अनुसरन्ति।

ततः सोमगुप्तो दृढं सुप्रतिष्ठितं धारयन् तिष्ठति कञ्चित् कालम्। भास्करः सैनिकश्च समीपं गत्वा उत्तरीयाञ्चलेन सुप्रतिष्ठितं सोमगुप्तक्रोडे दृढं बध्नीतः। पुनरपि हयमारुह्य भास्करोऽग्रतः गच्छति मार्गं प्रदर्शयन्, तमनुसरति सभट्टारकः सोमगुप्तः, पृष्ठरक्षां कुर्वन्नास्ते सैनिकः। एवं गच्छत्सु तेषु क्षणं लब्धसंज्ञः सुप्रतिष्ठितः। 'जलं, जलं देहि' इति अस्फुटं जलं याचते। आघातपीडया निपीडितो भृशमार्तिं सूचयन् अव्यक्तं 'कष्टम्', इत्युच्चारयति। क्षणाच्च अचेतनतां गच्छति। जलयाचनां श्रुत्वा सोमगुप्तो न जानाति किं करणीयमिति। जलं नास्ति। जलान्वेषणाय नास्ति अवसरः। जलाभावे भट्टारकः पञ्चत्वं गच्छेदिति समाशङ्क्य सोमगुप्तो नितरां विमूढः। ततश्च जलसिक्तमुत्तरीयाञ्चलं गृहीत्वा स्वात्मगतं कथयति। 'भवतु, पश्यामि जलसिक्तं वस्त्रम्। इदमेव निष्पीड्य भट्टारकस्य मुखे ददामि।' इत्युपांशुप्रायमुक्त्वा सोमगुप्तो भट्टारकस्य मुखे किञ्चिद् जलं वस्त्रं निष्पीड्य ददाति। एतदर्थं तयोरश्वो मन्दायते। अथ यावत् सोमगुप्तो देवस्य मुखे जलबिन्दून् ददाति, तावदग्रणीः हयारोही अग्रतो गतः कियद् दूरम्। अनुस्रियमाणमश्वखुरध्वनिम् अश्रुत्वा परावृत्य घनान्धकारे किमपि अपश्यन् सशङ्कमनुच्चैः सोमगुप्तमाह्वयति कुमारः।

—भोः सोमगुप्त! अयि सोमगुप्त! किं शृणोषि माम्? कुत्र त्वम्? श्रूयते किम्? अपि बलवदस्वस्थो भट्टारकः? अपि निःश्वसिति भट्टारकः? अश्वारोहिसैनिकाः अस्माननुयान्ति किम्?

कुमारस्य वचनं श्रुत्वा सोमगुप्तस्तथैव अनुच्चैरुत्तरं ददाति।

—एते वयं कुमारस्य पृष्ठलग्ना एव। बलवदस्वस्थो भट्टारकः सुप्रतिष्ठितवर्मेति वस्त्राणि निष्पीड्य जलबिन्दवः तस्मै दीयन्ते मया। इदानीं प्राप्तसञ्ज्ञ इव परिलक्ष्यते।

ततस्तेभ्य पश्चादागतः पुरुषो हयारोही दृढं विधृतयष्टिः समन्ताद् विलोक्य सभयोत्कण्ठं ब्रूते।

—दक्षिणेन मार्गाददूरेण वन्यद्विपानां वेणुवने करीरोत्पातनं मार्गशाखिनां शाखाभञ्जनमिव श्रूयते, वामे च पर्वतोपरि वानराणां किल-किलाशब्दैः निशाचराणां पक्षिणां पक्षविधूननैश्च तरक्षूणामुपस्थितिस्तत्र सूचिता। अतः

सावधानैर्भवितव्यमस्माभिः। एषोऽहमुद्यतयष्टिः प्राणैरपि पृष्ठरक्षां करोमि, कुमाररक्षणीयोऽग्रभागः। तिष्ठत्येव सेनापतिरङ्गरक्षको भट्टारकस्य।

एवं कथयति तस्मिन् पुरुषे मार्गशाखिनां शाखासु श्रुतं द्रुतं पक्षविधूननं विहङ्गानाम्, श्रुतिकटुश्च राव उलूकानाम्। सपद्येव वृक्षान्तरालात् कश्चित् श्वापदः पश्चाद्गामिनि हये हयारोहिणि वा उल्लम्फनेन पतितुकामः जिघांसुर्व्याघ्रो यावत् त्रिशंकुरिव शून्य एव तिष्ठति, तावदेव पुरुषेण हस्तधृतयष्ट्या हृदये भृशं विद्धो भूमौ पतति। पुरुषस्तु यष्टिविद्धं तं भूमौ दृढं पातयित्वा यष्ट्यग्रेण घातयति। व्याघ्रो भैरवगर्जनेन सर्वान् भीषयन् अग्रचरणनखरैर्हयग्रीवां विदारयति। इतस्ततो गन्तुमसमर्थो हयो ह्रेषारवेण अग्रपद्भ्यां व्याघ्रं ताडयति शून्ये धावतीव।

व्याघ्रगर्जनं श्रुत्वा द्रुतं धावन्तं हयं कुमारः प्रतोलीसंयमनेन निवारयति महता कष्टेन। अपरोऽपि तुरगस्तूर्णंगमनाय सोल्लम्फनं यावत् चेष्टते तावदेव पतनोन्मुखं भट्टारकं सुप्रतिष्ठवर्माणं महता यत्नेन सुदृढं धारयन् सोमगुप्तोऽश्वं निवारयति धावनात् कथञ्चित्। अथ क्षणादेव कुमारो बलादेव अनिच्छन्तं वाजिनं परावृत्य पुरुषसमीपमागच्छन् दूरादेव पुरुषं पृच्छति।

—अयि भोः पुरुष! मा भैषीः। एषोऽहं धृतासिस्तव रक्षणाय। कुत्र शार्दूलः क्रमते? नाहं पश्यामि। अथ कुशली त्वम्?

—'अथ किम्, देवप्रसादेन अक्षतशरीरस्तिष्ठामि। यष्टिविद्धो व्याघ्रो भूमौ विलुण्ठति। अचिरादेव पञ्चत्वं गमिष्यति। तं निपीडयन् यष्ट्या दृढं हस्तारूढ-स्तिष्ठामि' इति कथयति पुरुषः। क्षणादेव कुमारस्तत्स्थानमागत्य कोषान्निष्का-सितेनासिना व्याघ्रं घातयति। व्याघ्रो निहतः।

निहते द्वीपिनि ते द्रुतमरण्यपथेन गच्छन्ति पूर्वां दिशम्। अथ तेऽरण्या-न्निष्क्रान्ताः रात्रेर्द्वितीये यामे। तृणक्षेत्रं प्राप्य सुनिपुणं दूरमवलोकयति कुमारः। किञ्चिद् दूरं गत्वा सोमगुप्तमुद्दिश्य ब्रूते।

—नातिदूरे मन्दिरमिव दृश्यते अभ्रंलिहशिखरेण। मन्ये तदेव महाकाल-मन्दिरम्। अपि काचिन्नदी तत्र भवेत्। चेद् वर्तते नदी, अस्माकं सर्वेषां तृष्णा-पनोदनं स्यात्। अहो परमकारुणिकश्चन्द्रशेखरः पञ्च-सप्तनिमेषैरेव वयं तत्स्थानमासादयामः।

तच्छ्रुत्वा सोमगुप्तः समन्तात् संवीक्ष्य सहर्षमुत्तरं ददाति।

—आम्, ज्ञातम्। सम्यक् परिज्ञातमिदानीम्। एष खलु चन्द्रपुरिविषयः। अहो महाकालमन्दिरम्। मन्दिरं निकषा करतोया नदी। अस्मिन् चन्द्रपुरिविषये परमभट्टारकेण महाराजाधिराजेन दिवंगतेन सुगृहीतनाम्ना भूतिवर्मणा प्रदत्ता

शाल्मलीविग्रहा गांगणिका अग्रहारभूमिर्विद्यते। तत्र पञ्चविंशतिः श्रोत्रिया वाजसनेयिनो वसन्ति। क्रोशेन सा अग्रहारभूमिरिति मे मतिः। नृत्याचार्यस्य देवस्वामिनस्तु वासभवनं मन्दिराभ्यासे एव। देवकुलिकाश्चात्र वसन्ति भवतु, नृत्याचार्यगृहमेव अन्वेषणीयम्। महता परिजनेनावृतो धनधान्याढ्यो नृत्याचार्योऽस्माकमानुकूल्येन कालोचितं कुर्यात्। अस्मासु तत्र गच्छत्सु·······

असमाप्तकथं सोमगुप्तं मध्येमार्गं सान्तरायं कुमारः पृच्छति।

—कतमन्नृत्याचार्यस्य गृहं कथं जानीमः? कस्मिन् भागे? केनोपलक्षितं तद् गृहम्? चेदन्यस्य कस्यचिद् अस्माकमपथ्यकारिणो गृहं भवेत्, तर्हि महाननर्थो जायेत। त्रयः खलु वयं शस्त्रधारिणो बलवदस्वस्थो भट्टारकः। अरातिभ्यो नाहं बिभेमि, परन्तु भट्टारकः सर्वथा रक्षणीयः। तस्य रक्षार्थमेव समराङ्गणं परित्यज्य वयं द्रुतं प्रत्यागताः। भट्टारकं रक्षिष्याम इति कृत्वैव यद् अयशस्यमकीर्तिकरमनार्यजुष्टम् अस्माभिराचरितं तत् सर्वं वृथारम्भणं भवेत्।

कुमारस्य साशङ्कं वचनं श्रुत्वा सोमगुप्तो ब्रूते।

—अलमन्यथा शङ्कया। चन्द्रपुरिविषयः करतालामलकवदस्य वराकस्य। श्रूयतां, कुमारपादेन। सुगृहीतनामधेयेन महाराजेन सुस्थितवर्मणा नियुक्तोऽहं चन्द्रपुरिविषये जलदुर्ग-गिरिदुर्गरक्षणाय प्रकृतिपुरुषाणामनुरक्तिज्ञानाय च। एकदा मधुमासे मदनत्रयोदश्यां तिथौ अत्रागतोऽहं नानादिग्देशादागतानां पुरुषाणां चरितं ज्ञातुम्। तदैव नृत्याचार्येण देवस्वामिना अभून् मम वार्तालापः। दृष्टा च मया अनिन्द्यसुन्दरी तस्य पालिता कन्या माधवी सप्तदशवर्षदेशीया, नृत्यञ्च तस्या अवेक्षि। अहो! अदृष्टपूर्वं तस्या रूपम् अभूतपूर्वञ्च। नेयं पुरातनी कथा। विगते वसन्ते एव अहमत्रागतः।

एवं कथयति सोमगुप्ते ते समुपागता उद्यानम्। भट्टारकस्तु पीडार्तो दुःखेन मर्मन्तुदमुच्चारयति किञ्चिद् अस्पष्टम्। सोमगुप्तस्तु भट्टारकस्य शिरो हस्तेन सम्मार्ज्य सस्नेहं कथयति।

—भट्टारक! एते वयं प्राप्ता लोकवसतिम्, एतदुद्यानम्। उद्यानैकपार्श्वे गृहम्। क्षणं प्रतिपालयितुमर्हति भवान्।

इत्युक्त्वा सोमगुप्तः सैनिकं चतुःशालाद्वारं प्रेषयति। कुमारस्तु भट्टारकमाच्छाद्य हयारूढ एव तिष्ठति खड्गपाणिः। सोमगुप्तोऽपि तथैव भट्टारकं धृत्वास्ते। पुरुषो यथाज्ञाप्तः चतुःशाला-प्राकारतोरणद्वारमासाद्य दौवारिकमाह्वयति तारस्वरेण।

—भो दौवारिकाधम! पुरुषपांसुल! कथं रासभ इव स्वपिसि? कथं पोत्रीव शयनीयं पङ्कत्वं नयसि? उत्तिष्ठ। बलवदस्वस्थो भट्टारकः सुप्रतिष्ठित-

वर्मदेवः। शीघ्रं, तोरणद्वारमुद्घाटय। किं न जानासि मूढ। क्षणमपि न सहते बाणाघातपीडा!········अरे रे मूढ····! किमिदानीमपि न जागृतोऽसि? निमेषं दास्यामि, निमेषो मया प्रदत्तो द्वारोद्घाटनाय। अवसितप्रायो निमेषः। समुद्घाटय द्वारं नो चेद् मयि पक्षद्वारेण प्रकोष्ठं प्रविष्टे चिरनिद्रां गमिष्यसि। अरे रे····अरे रे रासभ! हतक!

एवं बहु समाक्रोश्य पुरुषो यष्ट्यग्रेण इतस्ततस्ताडयति। यथा यथा शब्दो वर्द्धते तथा तथा पुरुषः सचीत्कारमाक्षिपति दौवारिकं ग्राम्येण। चीत्कार-माघातशब्दश्च श्रुत्वा दौवारिकभार्या रतिप्रिया चिर-रति-परिश्रान्ति-सुप्तं दौवारिकं सञ्चालयति हस्तेनैकेन। भीता त्रस्ता सा तस्य कर्णे मुखं दत्वा नीचैस्तं चेतयति।

—अयि भोः! किं न श्रूयते महान् शब्दो बहिः दण्डाघातश्च। किमिद-मापतितमकस्मात्? उत्तिष्ठ पश्य····आचार्याय निवेदय। नूनं मृता वयम्····

दौवारिकस्तु पार्श्वपरिवर्तनं कृत्वा जृम्भणपूर्वकं पुनरपि शयितुमुपक्रमते। तं तदवस्थमालोक्य श्रुत्वा च यष्ट्याघातं चीत्कारध्वनिश्च रतिप्रिया हस्ताभ्यां तं गले धृत्वा किञ्चिदुत्तोलयति। दौवारिकस्तु धान्यासवपानरक्तकषायितलोचने किञ्चिदुन्मील्य ब्रूते—असंलग्नाक्षरम्।

—किं पुनरपि ते रिरंसा·······

—धिङ् मूर्ख! बहिर्मूर्तिमती जिघांसा, सावहितं शृणु····

—अयि दयिते! तर्हि किं भोजनवेला·······

—अरे हतक! समुपस्थिता ते मरणवेला। उत्तिष्ठ, क्वा स्वाप्सीः।

एवमुक्त्वा सा हस्ताभ्यां भृशं सञ्चालयति तस्य शिरः। ततः स कथमपि शयनादुत्थाय भयविगलितवस्त्रः स्खलितचरणः नृत्याचार्यभवनाभिमुखं धावति पश्चाद् भागस्थितान्तर्द्वारेण निष्क्रम्य। ताडनात् ततो भग्नं पक्षद्वारं प्रकोष्ठस्य। अथ यावत् सैनिकः पक्षद्वारेण प्रकोष्ठाभ्यन्तरं प्रवेष्टुकामस्तावदग्रतो विस्रस्त-वस्त्रां प्रकटितजघनां निद्राजडिम्ना ईषन्निमीलिताक्षीं स्त्रियं पश्यन् वज्राहतवत् चित्रार्पित इव निश्चलो भवति। विस्मयविमूढस्य तस्य मुखान्निर्गतः।

—अये कथमत्र स्त्रीजनः न पुरुषः?

समुद्यतयष्टिं पुरुषं दृष्ट्वाग्रतो रतिप्रिया प्रत्युत्पन्नमतित्वान्निमेषाद् जानीते स्म यदयं सैनिकः। अकारणविलम्बेन लीलया वस्त्रेण समाच्छादितं तयात्मनो यौवनोद्धतं पीवरस्तनयुगलं गात्रे प्रकटितसद्योजातसम्भोगचिह्नञ्च। मनसि चिन्तितं तया—'नूनं तेन दृष्टाहं नाचिराद् रतिसंगरसमुत्तीर्णा। मन्ये मम पीनोन्नतं पयोधरयुगलं विलोकितं तेन। दृष्टिपथं गता तस्य मम निम्ननाभिः, जघनयोः

स्थूलता च। भवतु। स्वात्मवशं करोम्येनं यावद् दौवारिकः प्रत्यागच्छति नृत्याचार्येण। नो चेद् महाननर्थो जायेत। तमसावृतो निशीथः अपुरुषा चाहमेकाकिनी, शस्त्रपाणिः पुरुषः। एवं मनसा विचिन्त्य सा प्रकाशं ब्रूते।

—स्वस्ति सैनिकप्रवराय अमिततेजसे नमः। स्वागतं कन्दर्पसुन्दराय यूने। अथ चेत् समराङ्गणे प्रदर्शितपृष्ठस्तर्हि सम्मुखीभवतु प्रभुर्मम। रतिसंगरार्थमाह्वयन्तीं रतिप्रियामचिरवेगां मां जानीयात्। निशीथोऽयं तमसाच्छन्नः, न युज्यते बहिरवस्थानं प्रभुणा वेतालाद्यध्यूषिते मन्दिरोद्याने। एषाहं भवत्सेवैकपरायणा तिष्ठामि। यदेव रोचते स्वामिने तदेवाज्ञापयितुमर्हति। न नियामकोऽत्रास्ति। दूरं गच्छतु भीतिः; शंका पदं मा कुर्यात्। अलं बहुवितर्केण। त्यज्यतां यष्टिः, गृह्यतां पाणिः, निक्षेपणीयः चेलः, समाश्लेषणीयः निचोलः, नासिना योद्धव्यं, साधनान्तरेण……।

एवमनर्गलं बहु प्रजल्पितायां तस्यां सैनिको ग्रहिल इव अनिमेषेण नयनेन तामेव वीक्षमाणः किंकर्तव्य-विमूढतया किमपि वक्तुं कर्तुंश्चासमर्थः क्षणं मौनं तिष्ठति। सबान्धवं कुमारं द्रष्टुकामस्तां दिशं पश्यति सः। तमसावृता दिगिति न पश्यति दिशं काञ्चित्। क्षणमितः पश्यति क्षणाच्च मुहुर्मुहु रिरंसमानां नारीमवलोकयति। कामालापैः कटाक्षवीक्षणैश्च नितरां विकलतां नीतोऽपि सैनिकः समयं स्वामिनं च स्मरन् तां निवारयितुं यतते।

—'कुत्राचार्यः' इति प्रष्टुकामस्यापि न निःसृता वाणी, न वैखरीत्वमभजत मध्यमा तस्य। भृशं यतमानस्य तस्य गलदेशादस्फुटः शब्द एवाश्रूयत।

इतश्च दौवारिकप्रबोधितो देवस्वामी 'कुतोऽयमनभ्रायां शरदि अशनिसम्पातः' इति चिन्तयित्वा दौवारिकपुरःसरस्तोरणाभिमुखं गच्छति। आचार्येण बहुशः पृष्टोऽपि दौवारिकः असम्बद्धमेव जल्पति, नार्थगर्भं किञ्चित्। गच्छन्नेव देवस्वामी चिन्तयति।

सप्ततिवर्षीयोऽहं महाकालसेवकः। मम धनं देवकुलिकानां पुण्यार्थिनां सेवकानां कृते। अकृतदारस्य अबान्धवस्य किं मम वित्तेन, न वित्तेन तर्पणीयं मनः। चेद् धनकामः, कश्चिद् गृह्यतां धनम्। जिघांसुश्चेत्, कं हनिष्यसि ? माम् ? हन्यताम्। अद्य वर्षशतान्ते वा मरणं भवत्येव। कस्य मया किमपकृतम् ? न मेऽपराधोऽस्ति। तथापि…को नु खलु निशीथे समुपस्थितः! नेदं राज्यमराजकम्। किमाक्रान्तश्चन्द्रपुरिविषयो गौडमालवैः। ते कर्णसुवर्णस्कन्धावारमध्यासत इति गूढपुरुषाः कथयन्ति। तस्मात् केचन अत्रागताः चेत् ? भवतु, किं मम करिष्यन्ति गौडहतका मालवमूर्खा वा। यथा तथा भवतु…आं…न मया चिन्तितम्।

अष्टादशी माधवी धात्रेयिकया मालविकया स्वपिति नृत्यशालाया दक्षिणे कुटीरे। यदि तावद् द्वित्राः सैनिकाः, भवतु। तां सधात्रेयिकां मन्दिरगर्भगृहे गूढं स्थापयामि। एवं विचिन्त्य द्रुतपदेन आचार्यः प्रत्यावृत्तः स्वभवनं मध्येमार्गम्। तं प्रत्यागच्छन्तमवधार्य नितरां भीतो दौवारिकस्तमनुसरन् प्रार्थयति सक्रन्दनम्।

—भोः स्वामिन्! प्रभो! रक्षत्वस्मान्। हा कष्टं। कां दशां गच्छतीदानीं रतिप्रिया मम। नूनं सेदानीं सजलजलदे विद्युदिव चौरस्याश्लिष्यमाणा विचेष्टते। स्वामिन्! आनीयतां सापि भवतश्चतुःशालाम्, त्वरतां प्रभो! कृपालेशं वितरतु....।

तस्य प्रलापं श्रुत्वा क्रुद्धः आचार्यस्तमादिशति।

—शीघ्रं गच्छ तोरणद्वारम्। कथय दर्शनार्थिनम् 'सपद्येवाचार्यः आगच्छति।' त्वरताम्।

एवमुक्त्वाचार्यो माधवीं सधात्रेयिकां मन्दिरगर्भे शय्यायां सुगुप्तां कृत्वा धावन्निव तोरणद्वारमागच्छति। अत्रान्तरे देवस्वामिनः आगमनात् पूर्वमेव कालातिपातमसहमानः कुमारः अश्वादवतीर्य दृढविधृतखड्गः इतस्ततः पश्यन् तत्र समुपस्थितो यत्रास्ते सैनिकः। आकृत्या वयसा परिच्छदेन च प्रायान्धकारेऽपि रतिप्रिया तं राजकुमारं राजपुरुषं वा निश्चित्य स्त्री-सुलभ-मायया भावान्तरं धत्ते। किञ्चिदुच्चैः आक्षिपति सैनिकम्।

—अहो कष्टम्। अमर्यादेन अनार्येण अनेन प्रलपितमशालीनम्। लाम्पट्यमस्य अस्थाने प्रकटितम्। भो महाभाग! निवारयितुमर्हति भवान् पुरुषमेनं साहसात्।

—शान्तम्। अरे पुरुषाधम! इतो वयमपेक्षमाणाः महदुत्कण्ठया तिष्ठामः, भट्टारको भृशमार्तिमाप्नोति, इतस्त्वं कालं नयसि नर्मकथया। 'अपसर' इति तनुत्सारयति कुमारः। ततः कुमाराभिमुखमागत्य रतिप्रिया प्रणामाञ्जलिं रचयति कुमाराय। मधुक्षरया वाचा निवेदयति च।

—नमो महाभागाय। राजपुरुषाणामत्रभवतां दर्शनेन इदानीमस्मि प्रकृतिस्था। कुतोऽत्र भावन्....?

तां निवारयन् कुमारो दृढस्वरेण पृच्छति।

—किमिदं ज्ञातं भवत्या नृत्याचार्यस्य देवस्वामिनो गृहमिदम्। कथय, यदि जानासि। अथ देवस्वामी कुत्रास्ते शीघ्रं नय मां तत्र। कुत्रास्ते देवस्वामी? कस्मिन्....गृहे?

'अयमहमत्रैव' इति तत्रोपस्थितो देवस्वामी ब्रूते। ऋजुतनुयष्टिं समुन्नतकन्धरं दीर्घकायमाचार्यं दृष्ट्वा कुमारस्तस्मै प्रणामपूर्वकं भट्टारकस्य मुमूर्षुत्वं केनाप्यनुपलक्षितत्वं च निवेदयति। सुगुप्तं कियत्कालं तैः स्थातव्यमित्यपि प्रार्थयति। देवस्वामी तु स्वयमेव उल्मुकहस्तो भट्टारकसमीपमागत्य 'स्वस्थो भव, महाकालस्ते सहायः' इति शिरः स्पृष्ट्वा आशीर्वचनपूर्वकं कथयति 'मामनुसर।' सोमगुप्तो महता यत्नेन अचेतनप्रायं भट्टारकं स्कन्धलग्नं हस्तेन परामृशति। अत्रान्तरे रतिप्रिया तत्रागत्य आचार्यहस्तादुल्मुकं गृहीत्वाग्रतो गच्छति। तामनुसरति देवस्वामी तदनु भट्टारकद्वितीयः सोमगुप्तः,ताननुसरति खड्गपाणिः कुमारः सैनिकश्च।

देवस्वामी तान् राजपुरुषान् अभिज्ञाय अभिजननिवासगृहं नयति। तत्र च परिजनसमास्तीर्णायां शय्यायां द्रुतं शाययित्वा आहतं कुमारं देवस्वामी सोमगुप्तेन समाश्वासयति। कुमारं जलं पाययित्वा आचार्यः मधुरं पृच्छति वृत्तान्तम्। ब्रूते च।

—कथ्यतामाद्योपान्तं वृत्तान्तं निःशङ्कम्। नास्त्यत्र प्रवेशः शस्त्रपाणीनां सैनिकानां न वा युध्यमानानां पुरुषाणाम्। अयं जनः प्राणैरपि आहतमतिथिञ्च सेवते। सर्वे मम जनाः आज्ञां मालामिव शिरसि धारयन्तो यथानिर्देशं कार्यं सम्पादयन्ति। ते भवतां सेवायां नियुक्ताः गोपनीयं सुगुप्तं रक्षिष्यन्ति।

तच्छ्रुत्वा भास्करवर्मा सोमगुप्तं समादिशति। 'बलाध्यक्ष! भवता कथ्यतां सावशेषं घटनाजातम्।' कुमारेणाज्ञप्तः सोमगुप्तः कथयति यथावत् तेषां वीरत्वं, ज्ञात्वा च तौ प्राग्ज्योतिषराजकुमारौ देवस्वामी हर्ष-शोकाभ्यां युगपत् समाक्रान्तः मन्दं मन्दं ब्रूते।

—चक्रवत् परिवर्तमानानि सुखानि दुःखानि च। चक्रारपङ्क्तिरिव भाग्यरेखा। नात्र मुह्यन्ति धीराः। अचिरेणैव स्वनगरं प्राप्स्यन्ति भवन्तः। प्राप्ते राज्ये पुनरपि समरायोजनं कुर्य्युः। जयलक्ष्मीः अंकशायिनीति मन्तव्यम्। तावन्तं कालमत्र यथारुचि केनाप्यनुपलक्षिताः मन्दिरप्राकाराभ्यन्तरे स्थातुमर्हन्ति भवन्तः अकुतोभयाः।

निर्दिष्टमाचार्येण तेषां निवासस्थानम्। सेवको नियुक्तः सेवायाम् आहतस्य कुमारस्य भास्करवर्मणश्च।

——— ———

४

प्रत्यहवत् पूजानन्तरं माधवी नृत्यशालामगच्छत्। स्नानानुलिप्तः क्षौम-दुकूलेन कृतोत्तरीयः मार्द्‌ङ्गिको जयदेवः पूर्वमेव समागतः। नातिदीर्घतनुयष्टिर्युवा जयदेवः चन्दनसुशोभितभालः आसने समुपविष्टस्तस्या आगमनं प्रतीक्षमाण इव द्वारदत्तदृष्टिरास्ते। म्लानहास्येन तस्याधरोष्ठं किञ्चित् समुद्भासितमिव परि-लक्ष्यते। अष्टाविंशतिवर्षीयो जयदेवः आत्मनि समाहितोऽपि तस्य नेत्रवक्त्रगतमौदा-सीन्यं कष्टेनाधरीकृतं विषण्णत्वं दृष्टिमाकर्षति। समीपस्थे मृदङ्गे सव्येतरं हस्तं दत्वा स आत्मगतं चिन्तयति—'कतिपयदिवसैरेव नृत्यद्वन्द्वानुष्ठानं भविष्यति। तस्मिन् द्वन्द्वे असंशयं माधवी पदकारुचरणगतिभिः लास्येन अङ्गहारादिभिश्च सर्वा अतिशयीत। माधवी नूनं मुख्या नटी भविष्यति। तस्या जयो ममापि गौरवाय। परन्तु····। माधवी प्रत्यहवन् न नृत्यानुशीलनं करिष्यति। नातः परं मार्द्‌ङ्गिकेन तस्याः प्रयोजनं भवेत्। सा महाकालवधूत्वेन प्रतिष्ठिता नागरिकाणां ध्येया सर्वोत्तमा विराजेत। किं तदा सा स्मरेत् अस्य मार्द्‌ङ्गिकस्य जयदेवस्य ? अहो कष्टमेतत्, अतः परं सा नृत्यानुशीलनं न करिष्यति, न रेचकैर्मयूरीव सञ्चरिष्यति ममाग्रे। न मम नयनयोर्दत्तदृष्टिः सा भ्रूभङ्गिभिः स्मितमधुरकटाक्षेण मामतः परं चन्द्रमा अम्बुधिमिव समुद्वेलं करिष्यति। अविस्मरणीयं वर्षपूगसान्निध्यं, कष्टं सा अतः परं ललिते कलाविधौ न मम शिक्षणीयेति चिन्तनम्। यदा वारं वार-माचार्येण समुपदिष्टापि सा यथातालं पदन्यासे असमर्था उत्तालं यतते स्म, तदा मया तस्या नितम्बे हस्तं दत्वा अपरेण हस्तेन पदमाकृष्य यथा तालानुगं तत् कृतम्····। त्रयो वर्षा व्यतीतास्तथापि तस्या अवयवेषु प्रकटितं रोमहर्षं ममापि प्रकम्पनशिथिलीभूतहस्तस्पर्शं सद्योघटितमिव स्मरामि।' एवं चिन्तयति जयदेवे माधवी नृत्यशालां प्रविष्टा। जयदेवस्तामाह्वयति किञ्चित् सोत्कण्ठम्।

—एह्येहि माधवि ! वेलातिवर्तते। तवागमनं प्रतीक्षमाणस्य मम कियान् कालो गतः। नाद्य आचार्यः समागमिष्यति।

माधवी सनमस्कारं तं प्रसाद्य यथास्थानमुपविशति। जयदेवो मृदु मृदङ्गं वादयति। माधवी लघुहस्तेन द्रुतं मञ्जिरां गृहीत्वा तमनुसृत्य गुरुवन्दनां करोति। एष एव निर्देशो मार्द्‌ङ्गिकस्य। यस्मिन् दिवसे माधवी प्रथमं नृत्यशालां शिक्षार्थं प्रविष्टा तदैव जयदेवेन समादिष्टा माधवी यत्—नृत्यारम्भे गुरुर्वन्दनीयः, नृत्या-वसाने च। न किञ्चिदपि करणीयं गुरुवन्दनं विना। अपि चेत् गुरू रुष्टस्तथापि

वन्दनीयः प्रसादनीयश्च। न चासूया विधेया, न वा मात्सर्यं प्रदर्शनीयं गुरवे। एष आदेशः, एष उपदेशः। एष समयो रक्षितव्यस्त्वया मया च इति तेन प्रदीपे कर्पूरचूर्णं दत्वा शपथो गृहीतः। माधवी तमनुसरति स्म। नववर्षान् यावन् माधवी यथाकालं प्रत्यहमभ्यस्यति नृत्यम्, अनुशीलयति भङ्गि-वृत्ति-मुद्रा-रेचकादीनि।

यदा तया चारी प्रयुक्ता तदा पादस्य जङ्घायाः ऊरोः कट्याश्च समानकरण-चेष्टायां कदाचित् स्खलिता आचार्येण भर्त्सितापि जयदेवेन प्रोत्साहिता। तां शिक्षयति आचार्यः आकाशकीः चारीः षोडश। सा यद्यपि सप्ताहेन दोलपादायां निपुणा जाता, भुजङ्गत्रासिता मृगप्लुता भ्रमरी च कठिनतरा प्रतिभाति तस्याः। मण्डलानि चारीसंयोगजानि यथाशास्त्रं आयत्तीकृतानि तया।

नाट्यं नृत्यमपि अनुशिक्षितं तया आचार्यात्। प्रकृतिप्रवेशः रङ्गे करणीयः नाट्यशास्त्राभिधानेन इति आचार्यः तां पाठयति।

ध्रुवायां संप्रयुक्तायां पटे चैवापकर्षिते।
कार्यः प्रवेशः पात्राणां नानार्थरससम्भवः॥

पात्राणां प्रकृतित्वं त्रिधा इति स व्याख्यानं करोति।

जयदेवस्य नयनाभ्यां स्थूलाश्रुबिन्दवो निपतिताः द्रुतं तेनोत्तरीयेण अश्रूणि सम्मार्जितानि। नोपलक्षितमेतत् कुमारध्याननिरतया माधव्या, नावधारितं तस्यान्तर्गतं शोककारणम्। वृष्ट्यवसाने प्रकटितेन सूर्यकिरणेनेव अश्रुमिश्रितेन हास्येन जयदेवस्तां सगद्गदं कथयति।

—'माधवि! समाप्ता ते नृत्यशिक्षा, अवसितमनुशीलनम्, सम्यग् उद्यापितः सङ्कल्पः। महाकालस्ते सहायः। पन्थानः सन्तु ते शिवाः' इत्येवमुक्त्वा जयदेवो द्रुतं नृत्यशालातो निष्क्रान्तः। सा न जानाति अद्यैव अनुशीलनं समाप्तिं गच्छेत्। अतो जयदेवोक्तस्य 'उद्यापितं व्रतम्। पन्थानः सन्तु ते शिवाः' एतस्य मर्मार्थः तया जयदेवप्रस्थानानन्तरमेव मनसा गृहीतः। तस्य द्रुतं निष्क्रमणे पश्चाद-नवलोकने च किं कारणं, कथं स पलायमान इव गच्छतीति चिन्तयन्त्या माधव्याः सहसा प्रतिभातं ज्ञानं मेघोन्मुक्तहेलिरश्मिवत्। जयदेवो गतः, चिराय गतः। न सः पुनः तां पदकारु-पदसञ्चालनं शिक्षयिष्यति। स मामामन्त्रयते स्म।···· सा सहसा मनसा अकामयत तम्। यदि सा जयदेवमनुयायात्। सुदर्शनो युवा, बलिष्ठः कमनीयकान्तिर्जयदेवः। नृत्यानुशीलनावसरे यथा कदाचिद् जयदेवस्तस्या मुखं वीक्ष्य भ्रष्टतालः अभवत्, यथा च किञ्चित् प्रष्टुकामोऽपि स वारं-वारं कथान्तरं कथयति, यथा च तेन कथितम्—'महद्दुःखं विना न नर्तितव्यं भ्रमरीनृत्यम्। मा त्वं दुःखमनुभूयाः।' किमहमिव सोऽपि मां कामयते स्म?

कथं न मयोपलक्षितं तस्य मनः ? यदा तं स्वामिरूपेण चिन्तयन्ती अहं कथाप्रसङ्गेन तत् सूचितवती 'महाकालवध्वा नैव चिन्तनीयं कथनीयम्' इति मां कथनान्तरासक्तां कृतवान् सः। अहो पुटपाकप्रतीकाशः तस्यानुरागः। सत्यामपि प्रणयाकांक्षायां, प्रवर्द्धमानेऽपि अनुरागे न तेन लङ्घिता मर्यादा मनागपि। महाकालाय समर्पिताहं न कदापि मानुषप्रिया भवेयम् इति जानतैव तेन महता कष्टेन निवारितः प्रणयाभिलाषः। अपि चेत् जयदेवो मम पतिरभविष्यत् ! धिक् कष्टम् ! गतो जयदेवः। अहो किं मया चिन्त्यते। महाकालवधूरहम्····। तर्हि कुमारोऽपि तथैव भवेत् ? नहि, नहि। न कुमारं विना जीवामि। आस्तां महाकालः, दूरे तिष्ठतु शपथः पारम्परीणा पद्धतिश्च। उच्चैः कथयामि—माधवी न महाकालवधूः, कुमारप्रणयिनी सा कुमारं कामयते, सा·······

आचार्यो विष्णुदत्तो माधवीमध्यापयति काव्य-नाटकादिकम्। नृत्यानुशीलनानन्तरं कियन्तं कालं विश्रम्य सा प्रातराशं गृह्णाति। तदनन्तरमध्ययनप्रकोष्ठं गत्वा सा अधीते आचार्येभ्यः। क्रमात् माधवी अधीतेषु विषयेषु विज्ञतमा जाता। आचार्यो विष्णुदत्तः शिष्यायाः प्रतिभामभिनिवेशञ्च विलोक्य आत्मनो विद्यादानं सफलं मनुते। इदानीं सा श्रुतमात्रार्थविबोधे समस्यापूरणे च दक्षा। तस्या नवनवोन्मेषशालिनीं बुद्धिं प्रत्यक्षीकृत्य स आत्मगतं चिन्तयति 'इयमस्या अलौकिकी प्रतिभा अपूर्ववस्तुनिर्माणक्षमा। न जाने कदा कुत्र अस्याः प्रतिभायाः स्फुरणं भविष्यति ?'

माधवी इदानीं युक्त्या तर्केण आचार्यं विस्मापयति। एकदा विष्णुदत्तो नूतनं पुस्तकमेकं समानीय माधवीमब्रवीत्। 'वत्से। माधवि ! श्रुतं त्वया अभिज्ञानशाकुन्तलं नाम नाटकं विरचितं नवीनेन कविना कालिदासेन। कालिदासस्य अभिनवकृतिः 'शाकुन्तलं' त्वया पठनीयम्। इदमेव तन्नाटकम्। शृणु, अहं पठामि।' एवं यावत् स पठितुमारभते तावदेव माधवी सकौतुकं पृच्छति।

—कोऽयमश्रुतपूर्वः कविः कालिदासो नाम ? कुत्र तस्य प्रतिष्ठा यत् सुप्रसिद्धानि नाटकानि परिहाय अस्मिन् नाटके यत्नः करणीयः ?

तस्यामेवं कथयन्त्यामाचार्यो विहस्याकथयत्। यदेवाशङ्कितं कविना तदेव त्वयोक्तम्। आश्चर्यम्।

—सा पृच्छति। किमाशङ्कितं तेनार्वाचीनेन कविना ?

—क्रान्तदर्शिना कविना कालिदासेनोक्तं मालविकाग्निमित्रनामधेये स्वीयनाटके यत् प्रायशो लोकाः परप्रत्ययेन नीयमानाः। अत एव प्रथितयशसां

भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य कथं ते वर्तमानकवेः कालिदासस्य क्रियायां मनो निदध्युरिति आशङ्क्य स्वयमेव निरस्यति तामाशङ्काम्—'पुराणमित्येव न साधु सर्वं, न चापि काव्यं नवमित्यवद्यम्।' अतस्त्वयापि परीक्षणीयमिदं नाटकं भजनाय वर्जनाय वा यथारुचि ।

माधवी विष्णुदत्तोक्तं वचनं श्रुत्वा सप्रतिभमकथयद् विज्ञेव।

—नूनं स्वीयप्रबन्धे लोकानां सावज्ञकथनं कवेः श्रुतिपथमागतम्। अत एव सहृदयान् आह्वयते कविः। यथा तथा भवतु, नूनं कविरयं लोकचरित्राभिज्ञ इति मन्तव्यम् ।

—'अथ किम्, अथ किम्। सर्वथा मन्तव्यम्।' आचार्यः अवदत्। माधवी पुनरपि कथयति ।

—आचार्यपादान् पृच्छामि, तेन कविना काव्यं महाकाव्यमपि विरचितं किम् ?

विष्णुदत्तः सहास्यमवादीत् ।

—श्रूयतां, श्रुत्वा च हृदि धार्यताम्। रघुवंशनामधेयं महाकाव्यं कालिदासस्य सर्वेषां मूर्ध्नि वर्तते। तस्य मेघदूतमभिनवत्वे सर्वमतिशेते, ऋतुसंहारः ऋतुवर्णनात्मकः प्रबन्धः सर्वान् विस्मापयति। शृणु, तस्मादेव ऋतुसंहारात् पठामि वर्षावर्णनम्। अपूर्वं श्रुतिसुखदं वर्णनम्। वर्षणबिन्दुरिव कर्णार्द्रतां जनयति। वर्णध्वनिर्बलाहकानां सान्द्रं गर्जनमिव श्रूयते। साभिनिवेशं पठन्नहं कदाचिन् मन्ये किं मेघाच्छन्नं नभः समुपस्थितं ममाग्रे। शृणु द्वित्राणि पद्यानि।

नितान्तनीलोत्पलपत्रकान्तिभिः क्वचित्, प्रभिन्नाञ्जनराशिसन्निभैः।
क्वचित् सगर्भ-प्रमदास्तनप्रभैः समाचितं व्योम घनैः समन्तात्॥
अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः॥

आचार्ये एवं पठति माधवी तं निवार्य्य सोपहासं ब्रूते ।

—कवियशःप्रार्थी कविरेषः कुम्भीलकवृत्तिमनुसरति। श्रूयतामाचार्यपादैरादिकवेः वर्षावर्णनं रामायणे ।

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति।
क्वचित् क्वचित् पर्वतसंनिरुद्धं रूपं यथा शान्तमहार्णवस्य॥

घनोपगूढं गगनं न तारा न भास्करो दर्शनमभ्युपैति।
नवैर्जलौघैर्धरणी वितृप्ता तमोविलिप्ता न दिशः प्रकाशाः॥

आचार्यः किञ्चित् तूष्णीं स्थित्वा ब्रूते।

—वत्से! श्रुतं ज्ञातञ्च। परं मा मैवं भण। 'सर्वोऽपि परेभ्य एव व्युत्पद्यते।' अतः पूर्वसूरीणाम् आदिकवीनां प्रभावोऽनस्वीकार्यः। परन्तु पश्य कथं घनागमः प्रमदाजनानां रागवृद्धये कल्पत इति कथयता कविना कालिदासेन मर्महृदयं प्रविष्टम्। घनैरन्तःकरणस्य साहित्यं कृतम्।

तच्छ्रुत्वा माधवी पुस्तकमाचार्यहस्ताद् गृहीत्वा स्वयमेव पठति।

वहन्ति वर्षन्ति नदन्ति भान्ति रुदन्ति नृत्यन्ति समाश्रयन्ति।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः॥

श्लोकमेतं पठन्ती सोच्चैः कथयति माधवी।

—आचार्यपादाः स्मरामि खलु एष श्लोकोऽवर्णचिह्ननिगूढनं कुम्भीलकवृत्या गृहीतमिति। श्रूयतामादिकविभणितिः।

वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।
नद्यो घना मत्तगजा वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः॥

—श्रुतं माधवि, श्रुतम्। एषः श्लोकः केनचिदर्वाचीनेन ऋतुसंहारात् प्रक्षिप्तो रामायणे।

—कथं ज्ञातम्? किं तत्र प्रमाणमैकान्तिकम्?

—नूनं न केनापि अविकलः श्लोकः श्लोकार्द्धो वा अन्यतो गृह्यते। कालिदासीयः एष यतः प्रियाविहीनत्वं शिखिनां प्लवङ्गानां च तमाकुलीकरोति।

एतत् सर्वं स्मृतिपथमायाति तस्याः।

प्रत्यहवत् तस्मिन्नपि दिवसे समागता माधवी अध्ययनप्रकोष्ठम्। करणीयमित्येव सा आगता, न अध्ययनाय; न वा जिज्ञासा न शुश्रूषा तां नोदयति। प्रकोष्ठं प्रविश्य सा समुद्यन्तं भानुमन्तं विलोक्य चिन्तयति।

किं कुमारभास्करोऽपि स्वतेजसा भास्करायिष्यति? अथ चेत्, तर्हि मम किम्? किमहमिव सोऽपि मामभिलषति?

कुमारं चिन्तयन्त्यास्तस्या हृदि सहसा जयदेवः आविर्भूतः। सा परं विस्मयमापन्ना स्वात्मगतं कथयति। 'कथं जयदेवः? कुमारमेवाहं कामये।

मम कुमाराकांक्षा कथं जयदेवे पर्यवसिता? नहि, नहि, न जयदेवः, नहि नहि……इति हस्ताभ्यां वक्त्रं पिधाय सा नीचैः क्रन्दति।

तस्मिन्नेव क्षणे विष्णुदत्तस्तत्रागतः। 'नहि नहि' शब्दं श्रुत्वा 'कं निवारयति माधवी'ति विचिन्त्य स सोत्कण्ठं पृच्छति।

—माधवि! किमिदं नहि नहीति। कं कस्माद् विनिवारयसि त्वम्?

आचार्य-वचनं श्रुत्वा द्वारदेशमवलोक्य माधवी समागच्छन्तमाचार्यं पश्यति। कथं कथमपि महता यत्नेनात्मानं संयम्य सा द्रुतमुत्थाय प्रणामपूर्वकमाचार्याय आसनं ददाति। ततः कथयति सा।

—न कमपि निवारयामि। विक्रमोर्वशीयनाटके राज्ञा 'न हि सुलभवियोगा कर्तुमात्मप्रिया' इदि यदुक्तं, तदेव स्मरामि।

आचार्यः सस्मितं ब्रूते।

—साधु, साधु। महदानन्दावहमेतद् यत् कालिदासकृतौ तव रुचिर्वर्द्धते। स्मरसि किं यदा मया ऋतुसंहारः पाठितः प्रथमं तदा त्वया किमुक्तम्? 'कवियशःप्रार्थी सः कुम्भीलकवृत्या पूर्वसूरीणां कृतिभ्यो वर्णचिह्ननिगूहनैः पद्यमाहरन् स्वां कवितां वितनुते' इत्येवं त्वया समीक्षितम्।

—सत्यं स्मरामि। यथा यथाहं पठामि तस्य काव्यं तथा मम जायते श्रद्धा। सहृदयेन तेन कविना नूनमनुभूतं कान्ताविरहगुरुत्वम्, अतस्तस्य हृदयसंवादः प्रायशः सर्वानावर्जयति। न केनापि कविना सजलजलदश्यामत्वं सगर्भप्रमदास्तनकालिम्ना समानधर्मीकृतम्। अनवद्यमपूर्वम्।

विष्णुदत्तः सानन्दं ब्रूते।

—प्रीतोऽस्मि तवोत्कर्षेण। तवाध्ययनं सम्पूर्णं ज़ातम्। त्वया भारतेतिहासादीनि सम्यगधीतानि। वात्स्यायनीये कामसूत्रे पातञ्जले च योगे तवोपपत्तिः जनयतीर्ष्यामन्येषाम्। कालिदासीयमपि ज्ञातं त्वया····

····मदनत्रयोदशी समागतप्राया। नृत्यद्वन्द्वे सम्पत्स्यमाने जयस्त्वामनुगच्छतीति नात्र चित्रम्। मुख्या नटी भूत्वा अचिरादेव त्वं विराजस्वेति कामये। प्रार्थये च महाकालं मङ्गलाय शुभाय च। महाकालस्ते सहायो भवतु। अव्यभिचारिणी ते भवतु भक्तिर्भवे, नृत्ये काव्ये चापराजेया भव।

एवं विष्णुदत्तेन प्रणतायै तस्यै आशीर्वादं दत्वा स्वगृहाभिमुखमगम्यत।

माधवी तु क्षणं मौनमवलम्ब्य मनसि किमपि विचिन्त्य अपसरियमाणामाचार्यमूर्तिं पश्यन्ती असहिष्णुतयैव आत्मगतं ब्रूते।

—किमाश्चर्यम्। अयमपि जनस्तथैव कथयति। किं सर्वेऽपि जना उन्मत्ताः जाताः ? 'नृत्यद्वन्द्वः', 'नटीमुख्या' इति शब्दद्वयादृते किं नास्ति वाग्-वैखरी ? तिक्तायते मम हृदयं, दूयते मनः, चीयते मर्मवेदना। किमाचार्यविष्णुदत्तोऽपि न जानाति नटीनां मुख्या भूत्वा कां दशामहं गमिष्यामि ? जानीयात् चेत्, कथं मम ईदृशी मङ्गलैषणा ? अथवा जानन्नपि हि मेधावी विष्णुदत्तः प्रतिविधातुमसमर्थः लोकयात्रामेवानुगच्छति।

····नहि नहि, माधवी नटी न भविष्यति न वा मुख्या ? न सा कदापि चरिष्यति अप्सरोवृत्तिम्।

धिक् कापट्यं प्रवञ्चनञ्च। महाकालवधूरिति न केवलं लोकप्रवञ्चनं परं सर्वथा आत्मप्रवञ्चनम्। न महाकालो मम भर्ता प्रभुर्दयितः, कुमार एव मम प्रभुर्दयितः, स एव मम भर्ता। कुमारं शरणं गमिष्यामि, तेन जीवामि, तेन स्थास्यामि। तस्मिन्नुपरते प्राणान् त्यक्ष्यामि। विनाशि मम शरीरम्। अविनाशि मम प्रेम। तेन व्याप्तो मम आत्मा, परिव्याप्तानि अङ्गानि, परिव्याप्तं जगत्। शरीरं दीर्यते शीर्यते, न च्यवते मम प्रेम हन्यमाने शरीरे। न कोऽपि तस्य हनने समर्थः, न महाकालोऽपि प्रभवति····।

अहो कदा कुमारं लप्स्ये। कदा तेन परिस्वज्यमानाहं किञ्चिदान्तरं बाह्यं वा न ज्ञास्यामि। कदा, कदा तत् सम्पत्स्यते।····अथ चेन् नटीति कुमारो मां नेष्यति ? मा मैवं चिन्तय। हृदय ! समाश्वसिहि, कुमारो जेतव्यः प्रेम्णा आत्मना मनसा वाचा। अङ्गजेन कामेन तोषणीयानि तस्याङ्गानि। प्रेम्णा आत्मजेन परितर्पणीयं मनः। ननु, सः किं मां नेच्छति ?

श्रूयते रुक्मिणी पूर्वं कृष्णेन मदनातुरा।
गृहीता भ्रातृजायापि कः काममतिलङ्घयेत्॥

किं मां मदनातुरां प्राणैरपि कामयमानां न स कामयेत। मधुरवचनेन स मामाकुलीकरोति, मम मनः सर्वथा तद्गतम्। 'महाकालाय निवेदनीयं प्रेम' इत्याचार्येण कथितम्। 'न मया मानुषो वरणीयो ग्रहणीयः' इति च। आस्तां तत्। गतानुगतिकः खलु आचार्यः। स्निह्यन्नपि मयि न स पश्यति ममायतीम्। न दोषाय देवदासीनाम् अप्सरोवृत्तिः। महाकालप्रीतये समाचरणीया सा····। हा हा न चरिष्यामि तां वृत्तिम् न कदापि, न····

——— ———

कुमारागमनात् परेद्युः सायंकाले सप्तपर्णवेदिकायां समुपविश्य माधवी सम्मुखस्थां पल्लवितां नवमालिकां वीक्षमाणा किमपि चिन्तयति आत्मगतम्। अस्तायमानस्य भास्करस्य रश्मिभिः सा समुज्ज्वलतरेव भाति। वसन्तः समागतप्राय इति वृक्षाणां पत्रशातनं जायते। केषुचिच्च वृक्षेषु किसलयोद्गमो दृश्यते। हठात् मृदुनानिलेन आनीतं पक्वपत्रमेकं तस्याः क्रोडे निपतितम्। पक्वपत्रं पश्यन्ती सात्मगतं कथयति—'किसलयः कालेन पक्वतां गतः वृक्षात् पतितं पत्रम्। पुनरपि पत्रोद्गमो भवति वृक्षे। चक्रवदावर्तते एष नयः। अहमपि बाल्याद् यौवनामारूढा। महाकालसेवानिरता कालान्तरे वृक्षच्युतं पत्रमिव लोकानां निन्दनीया भविष्यामि। अहो गतिः संसारस्य····

—अहं किं चिन्तयामि। समागतप्राया मदनत्रयोदशी। ततः पूर्वमेव मम व्रतोद्यापनं भविष्यति। समुद्यापितव्रता मदनं पूजयिष्यामि। एतावत्कालं प्रतिषिद्धं मदनपूजनमार्येण। त्रयोदश्यां भविष्यति मदनोत्सवः। नृत्यद्वन्द्वश्च भविष्यतीति पूर्वमेव कथितमार्येण। नाहं स्पृहयामि नृत्यद्वन्द्वाय। नृत्यद्वन्द्वेन किं मम भविष्यति? विजयिनी भूत्वा कमहं वरिष्ये, को मां कामयेत। नागराः? तेषां छायास्पर्शनमपि न करिष्यामि। तर्हि, किं मम यौवनेन? ननु महाकालस्तोषणीयः?

एवं विचिन्तयन्त्यां तस्यां धात्रेयिका तत्रागता। तां दृष्ट्वा माधवी पृच्छति।

—आर्ये! कियन्तं कालमहमत्र तिष्ठामि त्वां प्रतीक्षमाणा। वेलाऽपचीयते। भास्करो लोहितायति। अचिरमेव अदर्शनतां गमिष्यति····।

—नहि वत्से माधवि! भास्करः समुज्ज्वलतरो बाभातीति मन्तव्यम्।

—कथम्?

—कथयामि। श्रुतं किं त्वया आचार्येण प्रतिषिद्धो मदनोत्सवः?

—न श्रुतम्। तव मुखादेव प्रथमं श्रुतम्। किमर्थं प्रतिषिद्धः। गुरुणा कारणेन भाव्यमिति मन्ये।

—यथार्थानुमानं तव। महत् संघटनं संघटितम्।

—किं तत्? किमापतितम्।

धात्रेयिका माधव्याः कर्णे मुखं दत्वा अनुच्चैः कथयति।

—सर्वमावेदयामि । परं सुगोपनीयमिदम् । पौण्ड्रवर्द्धनमण्डले युद्धमरातिभिरिति आचार्येण यद्यपि समुद्घोषितं मदनोत्सवप्रतिषेधकारणं, यथार्थतः कारणान्तरमेव तत्रान्वेषणीयम् ।

—किं तत् कारणान्तरम् ?

माधवी तामनुच्चं पृच्छति ।

—विगतायां रजन्यां निशीथे महान् व्यतिकरः समुद्भूतः ।

—जानामि । विद्यते भयं दस्युभ्य इति आवां शयनादुत्थाप्य आचार्येण मन्दिरगर्भगृहे शायिते । प्रातः पुनः निष्कारणमेतदिति कथितम् ।

—गोपनीयमिति सत्यं न प्रकटीकृतमाचार्येण । मया तु समुद्रगृहान्नातिदूरस्थायाम् अतिथिशालायां दृष्टौ द्वौ राजकुमारौ स्कन्दविनायकाविव रक्षिभिः सेवितौ । न कोऽपि गच्छेत् अतिथिशालामिति जनानां प्रवेशोऽपि निषिद्धस्तत्र । समुद्रगृहाभ्यासे एव तिष्ठन्ति गृहरक्षकाः । आचार्यः एकाकी गुह्यसाधने निरत इति रक्षिणो जनान् निवारयति । अहम् आचार्येणाहूता इति मत्वा तैर्न निवारिता ।.......भवतु, तयोर्ज्येष्ठः शस्त्राहतः भृशं कष्टमनुभवति । कनिष्ठो तेजोदीप्तो विराजते ।

माधवी सकुतूहला तां पृच्छति ।

—कुतस्तौ ? कस्माद् देशादागतौ ? कथं वा शस्त्राहतः ? किमर्थं वा आचार्येण तौ सुगुप्तौ रक्षितौ ? जानासि किम् ?

—ज्ञातं परिजनसकाशात् सर्वम् । अस्ति प्राच्यदिग्भागे कामरूपापरनामा प्राग्ज्योतिषाख्यो देशः । अस्य पश्चिमे प्रान्ते प्रवहतीयं सदानीरा करतोया, यन्मध्ये जगत्प्रसूः कामाख्या विराजते, ब्रह्मणः पुत्रः नदराजलोहित्योऽपि यत्रास्ते, तस्य कामरूपस्य मध्यमं प्राग्ज्योतिषं नाम पुरम् । तत्र च कोलरूपिणो विष्णोः औरससम्भूतः पृथिवीपुत्रो नरकः शशास राज्यम् । तस्मिन् भौमान्वये गते बहुतिथे काले महाभूतिर्नाम महाबलो भूपतिः शक्रादनवरो रणे रणैषी राजा गौडान् विजित्य पौण्ड्रवर्द्धनाख्यमिदं राज्यखण्डं स्वमण्डलान्तर्गतं चकार । अथ गच्छता कालेन पराक्रान्तेन गौडाधिपेन तद्राज्यं स्वायत्तीकृतम् । इदानीन्तने काले प्राग्ज्योतिषाधिपतिः सुस्थितवर्मदेवः मृत्युशय्यां शयानो वर्तत इति श्रुत्वा गौडाधिपं जिगीषुर्महता बलेन प्राग्ज्योतिषाभिमुखं गतवान् । यस्मिन् दिवसे गौडबलं समायातीति वार्ताभूत् तस्मिन्नेव दिवसे प्राग्ज्योतिषाधिपतिः अस्वस्थो जातः । अथ बलिनि गौडबले तीर्णकरतोये प्राग्ज्योतिषप्रान्ते समागते तस्य कुमारकौ प्रथमे वयसि स्थितौ

स्तोकैरपि बलैः शत्रून् भयविह्वलान् कृतवन्तौ। प्रवृत्तमाने युद्धे प्राग्ज्योतिषबले क्षीणान् क्षीणतरं गते नीतौ कुमारकौ शत्रुभिः स्वराज्यम्। तत्र च कस्मिंश्चिद् दुर्गे निरुद्धौ कुमारौ। अथ दुर्गपालानुकूल्येन स्वीयभुजबलेन च रक्षिणः निपात्य प्राग्ज्योतिषमागच्छन्तौ तौ कुमारौ अत्र समुपस्थितौ। रक्षिभिर्युद्धमानयोस्तयोः ज्येष्ठो भृशमाहतः शस्त्रास्त्रैः। मुमूर्षुं तमादाय द्रुतमागतः सैनिकाभ्यां सह कनिष्ठः। प्राग्ज्योतिषाधिपतिभिः पूर्वं प्रदत्ता भूमिरिति सानुकम्पेन आचार्येण तेऽत्र संरक्षिताः। यावदाहतः कुमारः स्वास्थ्यं न लभेत तावत् चत्वारस्ते अत्र स्थास्यन्तीति निश्चयः। एतदर्थमेव प्रतिषिद्धो मदनोत्सवः, निवारितो नृत्यद्वन्द्वः।

—अहो महान् अनर्थः सञ्जातः। अपि आहतो भट्टारक इदानीमपि अचेतन एव तिष्ठति? सोत्कण्ठं पृच्छति माधवी।

—सान्तरं समागतं चैतन्यं भृशमार्तिं जनयति। वरमचैतन्यं चैतन्यात्।

—अहो, महत् कष्टम्। कस्तावत्सेवायां नियुक्तः? अस्ति कश्चिन् सेवानिरतो जनः?

—भ्रातरं सैनिकं च विना नास्ति कश्चनापरः सेवकोऽस्ति कश्चित्। अहमादिष्टा गमनागमने। अपराह्णे अद्य मया चन्दनेनालिप्तं वपुस्तस्य। आचार्यः स्वयमेव भेषजैर्लिम्पति क्षतस्थानम्। इदमेव कारणं विलम्बस्य।

—अपि आकृत्या वयसा रूपेण च प्रियदर्शिनौ तौ···इति अर्द्धोक्तौ एव माधवी सलज्जेव विरमति।

—'ज्येष्ठो विंशत्यां कृतपदः कनिष्ठो हायनाभ्यामवरः' इति कथितं सैनिकमहत्तरेण। वयसा नवीनौ कुमारौ जितकामरूपौ कामरूपिणौ रूपेण। तयोर्ज्येष्ठः सुप्रतिष्ठितः, आहतः शोचनीयतां गतः। कनिष्ठो भास्करः सोद्विग्नतया म्लानकान्तिरपि छिन्नाभ्रेण पिहितरश्मिर्भास्करवद् विभाति।

एवं कथयन्त्यामेव धात्रेयिकायां भास्करवर्मा किमपि पश्यन्निव मन्दं मन्दमुद्यानाभिमुखं समागच्छति। तमागच्छन्तं दृष्ट्वा धात्रेयिका माधवीं हस्तेन स्पृष्ट्वा तस्या दृष्टिमाकर्षयति अनुच्चैः कथयति च।

—अये माधवि! पश्य, असौ एव कुमारभास्करवर्मा। वयसा वपुषा वीर्यवत्तरो विभातीति किं मया वृथा प्रजल्पितम्? तिष्ठ क्षणम्। एनमाह्वयामि।

इत्युक्त्वा मालविका कतिचित्पदानि गत्वा किञ्चिदुच्चैः कथयति।

—एषाहं···धात्रेयिका···मालविका। कुत्र गम्यते कुमारपादेन। अत्रागमनेनास्मान् अनुग्रहीतुमर्हति कुमारः।

तच्छ्रुत्वा कुमारो धात्रेयिकां पश्यन् आश्वस्तः सञ्जातः। सः पृच्छति।

—किमत्रभवती मामाह्वयति?

—अथ किम् ! अत्रागमनेनास्मान् सभाजयितुमर्हति कुमारः ।

माधवीं निर्दिश्य पुनरपि कथयति सा ।

—एषा आचार्यदेवस्वामिना पालिता कन्या माधवी नाम। मन्दिरललामभूतामेनां विद्वांकुर्वन्तु भवतीं मालिनीतीरे आश्रमपदे कण्वपालितां शकुन्तलाम् । अष्टादशीयं नृत्ये, गीते कलासु काव्ये च निपुणा परोक्षमन्मथां शकुन्तलामतिशेते । रूपं लावण्यमस्याः स्वयमेव कुमारमावेदयति……।

धात्रेयिकायामेव बहुशो भाषमाणायां माधवी तां हस्तेनाकृष्य 'अः किमसंलग्नं जल्पसे इति निम्नस्वरेण कथयति । ततो धात्रेयिका किञ्चिद् विहस्य तां ब्रूते ।

—माधवि, एषः खलु प्राग्ज्योतिषकुमारः भास्करद्युतिः भास्करो नाम । इदानीमेव यस्यात्रवास्थानकारणमहं कथितवती। ननु कुमारो नाम्नि कीर्तित एव समुपस्थितः दीर्घजीवी भवेत् ।

कुमारः पृच्छति ।

—किमर्थमहं कीर्तितः ? अधिक्षिपत इति मन्ये ।

—गुणानुकीर्तनस्य एवायमवसरः। कुमारस्यान्वयः, रूप-गुणवयोवीर्यादिकं माधव्यै मया निवेदितं यद् आहूतेन ज्येष्ठेन सह कनिष्ठोऽपि अत्र तिष्ठति। मन्ये पक्षं मासं वा भवतामत्रावस्थानं भवेत् ।····आं, कुमारागमनेन सम्यक् स्मारिताहं यत् सायन्तने शिलाजतुघटितः प्रलेपः प्रदेयः भट्टारकस्य क्षतस्थाने इत्याचार्येण निर्दिष्टम् । भवतु, यावदहं प्रलेपं दत्वा आगच्छामि तावदत्रभवानस्मिन् शिलातले समुपविश्य नयनाभिरामं मनोऽनुकूलं पश्यतु इत्युक्त्वा द्रुतं धात्रेयिका चतुःशालामगच्छत् ।

धात्रेयिकामुखात् कुमारवार्ताश्रवणादेव कुमाराभिमुखं मनो माधव्याः कुमारदर्शनानन्तरं तस्मिन्नेव निषण्णमभवत् । विश्रम्भ-मधुरालापेन प्रवर्द्धितमन्मथयोस्तयोः हृद्गतमनिरुद्धं भवति । महाकालार्पितं मनो माधव्याः क्षणादेव तस्मान्निवर्त्तते। दयितत्वेन कल्पितो महाकालः क्षणादेव पाषाणखण्डत्वेन परिणतस्तस्याः ।

अपरेद्युः व्रतस्योद्यापनं ततश्च सप्ताहाभ्यन्तरे मदनत्रयोदश्याम् उत्सव इति पूर्वं निर्दिष्टमासीत् । कुमारागमनात् परं प्रतिषिद्धः उत्सवः। व्रतस्योद्यापनं माधव्या यथाकालं भवेत्। एतदर्थं परेद्युः स्नानार्थं करतोयां प्रभाते गता। माधवी भृशमन्तर्द्वन्द्वेनाकुलीभूता दोलारूढचित्ता तिष्ठति स्म ।

सानुयायिनि कुमारे स्थिते तत्र कानिचित् दिनानि कदाचित् प्रमोदो नाम वार्ताहरः प्राग्ज्योतिषात् समुपस्थितः। ज्ञात्वा च कुमारयोस्तत्रावस्थानं तेन निवेदितं कुलिशसम्पात इव दारुणसन्देशः। 'कुमारौ अरिभिः बन्दीकृत्य नीतौ स्वराज्यमि'ति श्रुत्वैव महाराजः सुस्थितवर्मदेवः मोहमुपगतः। यामेषु गच्छत्सु अपि अलब्धसंज्ञः स राजा तन्निशीथे एव दिवं गतः। राजनि पञ्चत्वं प्राप्ते कुमारयोः शत्रुवशंगतयोः अरातिबले च द्वारस्थिते प्रधानामात्येन आर्यगुणेन महता कौशलेन नयेन साम्ना च प्रजानां सान्त्वनं कृतं, राजपुरुषाणां मर्यादा संरक्षिता शिष्टाश्च शासिता यथा कोऽपि नोत्पथं प्रवर्तेत, मा भूच्च मात्स्यन्यायः। नेयं स्थितिः स्थास्यति चिरम्। अचिरमेव कुमारग्रहणीयं राज्यशासनम्।' श्रुत्वैतत् कुमारभास्करः मोहं गतः।

अथ लब्धसंज्ञस्तत्क्षणादेव प्राग्ज्योतिषप्रस्थानाय आचार्यं निवेदयति। विदितवेदितव्यः आचार्यः कतिपयैः सहचरैः सैनिकद्वयसनाथौ कुमारौ प्रेषयितुं यतते। इतश्च धात्रेयिकामुखात् सर्वं श्रुत्वा माधवी सहसा किमपि निश्चेतुमसमर्था मुह्यन्ती तिष्ठति। तस्मिन्नवसरे अकस्मात् माधवीसमीपमागत्य भास्करवर्मा वाष्परुद्धकण्ठेन कथं कथमपि सगद्गदं ब्रूते।

—माधवि! अस्मिन्नेव मुहूर्ते स्वनगरं गच्छामो वयम्। पिता उपरतः। आमन्त्रये ·· माधवि ·· तिष्ठ, आमन्त्रये पुनर्दर्शनाय।' कुमारं दृष्ट्वा श्रुत्वा च तस्य सकरुणम् आक्रन्दनमिव वचनं माधवी मुहूर्तादेव शोकवेगं परिहाय भस्मसमुत्थिता वह्निशिखेव सुदृढं सुस्पष्टं ब्रूते।

—अपि अनुमन्यते कुमारपादैः स्नेहेन अनुकम्पया वा ममानुगमनम्, इयं वराकी भवन्तं छायेव सर्वदानुगमिष्यति। गच्छामि प्राग्ज्योतिषपुरम्। महाकालेन हृद्गतेनाहमनुज्ञाता गमनाय।

माधवीवचनं श्रुत्वा भास्करः किं सत्यमेतदथवा छलमिति जिज्ञासयेव तस्याः मुखमवलोकयति वारं वारम्। तस्या मुखावयवे नयनयोश्च प्रकटितं ज्योतिः दृढतां च पश्यन् न तस्य मनागपि संशयो जातः। अवसितप्राये वर्षणे समुद्भासितेन सूर्यकिरणेन प्रकाशिता दिगिव तस्य नयनं प्रदीप्तं स्मितेन हास्येन। अथ स किञ्चिदात्मगतमिव पृच्छति – 'अपि नानुज्ञायते आचार्यैः तर्हि····' इत्यर्द्धोक्तौ एव कुमारस्य माधवी उन्मत्तेव 'त्वरतां गमनाय, एषाहमागच्छामि निमेषात्' इत्युच्चैः कथयित्वा द्रुतं धावति चतुःशालसमुद्रगृहम्। गत्वा च वाताहता लतेव आचार्यस्य चरणयोः पतिता सरुदितं वदति।

—पितः! तात! तात! क्षन्तव्यो मेऽपराधः। अपात्रे वर्षितः स्नेहस्त्वया। नाहं महाकालवधूः, परं······! तव इच्छा मोघा कृता मया। नाहं समर्पणयोग्या

महाकालाय····। अनुजानीहि मम प्राग्ज्योतिषगमनम्। अनुजानीहि माम्····। 'अनुजानीहि' इति द्रढनुच्चार्य सा भृशं रोदिति। माधव्याः प्राग्ज्योतिषाभिगमनं श्रुत्वा अवधार्य च तत्र कारणम् आचार्यः परं विस्मयाविष्टो भवति। शोकक्षोभेण क्षुब्धोऽपि आचार्यः क्षणादेव आत्मानं संयम्य माधवीं चरणतलपतिताम् उत्थाप्य वक्षसि धृत्वा स्थितः। तदवस्थस्य देवस्वामिनो नयनयोर्विगलिता अश्रुधारा। कन्याया अमर्यादोक्तिं श्रुत्वापि 'मनोऽभीष्टे पयो-निम्ने कस्तत् पर्यवारयेत्' इति साधूक्तिं स्मरता लोकचरित्राभिज्ञेन वृद्धेनाचार्येण न सा निवारिता न वा आक्रोशिता। मौनं मस्तकमाघ्राय संयतोऽपि सगद्गदं ब्रूते।

—कन्ये माधवि! मा रोदीः, मा रोदीः। यदेव रोचते तुभ्यं, तदेव करणीयम्। अलमन्यथा शंकया। अवश्यमेव त्वया गन्तव्यं प्राग्ज्योतिषपुरम्। गन्तव्यं त्वया। यदेव महाकालाय रोचते तदेव भविष्यति। इच्छति महाकालः तव गमनम्। कथमन्यथा तव एतादृशी मतिर्जायेत। प्रभो! महाकाल! पूर्णतां गच्छतु त्वदीयेच्छा। न त्वया स्वीकृता मया भक्त्युपहृता माधवी। ममानुरक्तिः परा जाता ईश्वरे त्वयि। प्रभो! वितरतु कृपालेशम्····। माधवि! माधवि! वत्से! त्वरतां यात्रालग्नः समुपस्थितः। विलम्बेन विघ्नः स्यात्।

—अये मालविके, चन्दनानुलेपनैः क्षौमदुकूलैश्च माधवीं सुवेशां कुरु! सुमङ्गली इयं वधूः। मालविके! अपि जानासि मम मञ्जूषायां गजमौक्तिकमस्ति शीघ्रम् आनीयतां दीयतां माधव्यै। ····अयि माधवि! गच्छ महाकालस्ते सहायः महाकालस्ते····' इत्येतावदुक्त्वा नोक्तमाचार्येण 'प्रभुर्भर्ता दयितः' इति। क्षणं विरम्य पुनरपि कथयति।

—माधवि।····मुक्तोऽहमिदानीं बन्धनात्। न मम अवस्थानमत्र अतः परम्····प्राग्ज्योतिषं गच्छन्त्या माधव्या अहं मोचितः।····आं····कमाश्रयिष्यति मालविका मयि गते अस्मात् स्थानात्? गच्छतु सापि। अयि मालविके! अनुसर माधवीम्। कथमेकाकिनी गच्छेत् सा। अनुगच्छ त्वम्। आः! वृथा जल्पनेन विलम्बो जातः नातः परं क्षणमपि। माधवि! महाकालस्ते सहायः।

एवमसंलग्नमुक्त्वा देवस्वामी माधवीं बाहुबन्धनादुन्मोच्य प्रेषयति। सा तु कथमपि 'न ययौ न तस्थौ' अवस्थामतिक्रम्य देवस्वामिनं पुनरपि प्रणम्य मौनम्, अश्रूणि विमुच्य गच्छति। मालविका तामनुसरति। देवस्वामी तु गच्छन्तीं माधवीं दशवर्षेभ्यः पूर्वं श्रेष्ठिना वसुमित्रेण समानीतां मन्यमानो व्याकुल इव पश्यन्नास्ते, यतो लोके हि लोभ्यः कठिनतराः स्नेहमया बन्धनपाशाः। धैर्यं धारयन्नपि वृद्धो देवस्वामी साश्रुनयनो बद्धाञ्जलिर्महाकालं प्रणमति।

———

अथ प्रपापालिका दूरात् कोलाहलमिवाकर्ण्य प्रपाया अनिष्क्रामन्ती एव गवाक्षद्वारेण मुखं किञ्चिद् बहिः कृत्वा किमिदमापतितमिति शङ्कोद्विग्नमना दश दिशोऽवलोकयति। सुनिपुणमवलोकयन्ती उत्तरस्यां दिशि राजमार्गं धूलिजालसमाकुलं पश्यति। अकस्मात् कस्माद् धूलिजालः समुत्थितः, किं वास्य कारणमिति तर्कयन्ती धावन्तमश्वं तत्पृष्ठे चारोहिणमवधारयति। अश्वः पञ्चमीं धारामास्थाय दरीं श्वभ्रञ्चागणयन् द्रुतं धावति। पृष्ठलग्नः आरोही अश्वान् न पृथगिव प्रतिभाति। तदानीं तयोः पृथक् स्थितिः गौतमीयः कार्य-कारणभेद इव केवलं प्रतीतिगतासीत्।

अश्वारोहिणं तदभिमुखं धावन्तं दृष्ट्वा मालती, तत् खलु तस्याः पितृदत्तं नाम, तर्कयामास।

'किमसौ पुरुषः एकाकी, उत अन्येऽपि तमनुयान्ति? अपि असौ साधुः हस्तमात्रसहायो वा? किमसौ राजपुरुषः चौरो वा? अथ कारागारात् पलायमानो राजापथ्यकारी? किं राज्यखण्डमिदं महदराजकं सञ्जातम् यदस्येन पुरुषः पलायते? कुतोऽसौ समागच्छति? कां दिशं प्रयास्यति? अथवा दिशं न काञ्चिद् विदिशं न काञ्चिद् गमिष्यति? किममुष्य आगमनकारणम्?.... (सामीप्ये)....कोऽस्याभिप्रायः? किमयं करिष्यति? अथ लुण्ठिष्यति धनानि? अपहरिष्यति दारान्? धनं तावदत्र नास्ति यदयमपहरिष्यति। धनाभावे किमन्यद् रत्नं लप्स्यते पुरुषः? अपहरिष्यति माम्'....इति मनसि कृत्वैव मालती आत्मनः पीनोन्नतस्तनयुगलं साग्रहमिव वीक्षते। ततः परितृप्तेव स्वीयां गात्रलग्नां शाटिकां किञ्चिदूर्ध्वं प्रसार्य्य स्तनयोः प्राकट्यप्रच्छादने विफलप्रयासा तिष्ठति।

अथ निमेषमात्रेण यौवनचाञ्चल्यमनुभवन्ती मालती चिन्तयति।

'किमिदानीमपि मम तारुण्यं पुरुषमुन्मादयेत्। प्रमाथयेत् चित्तम्।' कपोले हस्तं दत्वा अङ्गुलिभिः चर्म्मणो मसृणतां परीक्ष्य किञ्चिदाश्वस्ता जाता। सत्यं, चर्म्मणि लोलत्वं न जायते, कपोले च त्रिवली न सञ्जाता। मुक्तकचोत्करान् सम्मुखमानीय निर्वर्ण्य स्निग्ध-भिन्नाञ्जनश्यामान् ज्ञात्वा आत्मनो दृप्तयौवने श्रद्दधाति सा। तथापि दोलारूढचित्ता पुनरपि शङ्कते—'किमिदानीमहं

प्रौढत्वे कृतपदा ? अथवा मम यौवनमपस्त्रियमाणम् ? किं मे वयो गतम् ? लावण्यं तिरोहितम् ? कमनीयता छिन्नमूला लतेव छायामात्रसारा ? भावाः हावाश्च अवसराभावात् लीनतां गताः···· ?····'किञ्चिद्दीर्घं कवोष्णञ्च निःश्वस्य स्वात्मगतं कथयति—'अहो किमाश्चर्य्यम्—ह्यस्तना इव प्रतिभान्ति विगता वर्षाः ।'

कौमार्य्यहरणदिवसादारभ्य विगतेषु षोडशवर्षेषु यद् यदभवत् सर्वं तस्याः स्मृतिपथम् अलातचक्रवदागतम् ।

'महानन्दातीरे वेतसीतरुतले पुरन्दरेण वैदेशिकेन सशङ्कं रममाणाया मे ते दिवसा गताः । गतः पुरन्दरः । कुत्र अहं कुत्र वा सः ? न जाने ध्रियते मृतो वा । ततस्ततः····मन्दिरे नृत्य-गीतेन देवीं तोषयितुकामाया मे दिवसाः····। क्व इदानीं चारुदत्तः ? वृषायमाणस्य तस्य स्मरामि····यः खलु मम अस्खलितपदं नृत्यं दृष्ट्वा वीणानुरणनसनाथं गीतं च श्रुत्वा मामन्तरेण यौवनं निरर्थकं, जीवनं निःश्वसनमात्रं, चारुताम् असौभाग्यफलाम्, अवनीतलं रसातलमिति मत्वा अहर्निशं मामेव भजते स्म । सर्वस्वं मम चरणलग्नं कृत्वा स्वाधिकारे प्रमत्तोऽभवत्···· । ततश्चौरैरपहृताहं देशान्तरं समानीता । मदनत्रयोदश्यां राजान्तःपुरे उदकक्ष्वेलिकां क्रीडन्त्या मे राजानुग्रहः····ततस्ततः····किं रोमन्थनेन । सर्वे जना गताः, सर्वं गतम् । न गतं सुखाश्वासि मनः, नोपरता तृष्णा····

इत्थं चिन्तयन्त्यां तस्यां हयारोही पुरुषस्तत्र क्षणेन समुपस्थितः । यावत् समुपस्थितस्तावदेव अश्वादवतीर्य पुरुषः प्रपापालिकां लावण्यवतीं दृष्ट्वा विस्मितो जातः । अश्वं वीथिकास्थिते वृक्षे दाम्ना बद्ध्वा पुरुषो मालतीं नेत्राभ्यां पिबन्निव सुचिरमवलोकयति । अध्वश्रमेण क्लान्तोऽपि महता यत्नेन हृत्कम्पं निरुध्य सोत्कण्ठं पुरुषो वदति ।

—भद्रे पिपासा मां बाधते । पायय जलम् । अपनीयतां पिपासा ।

कोमलं मधुरं कथयितुकामस्यापि तस्य पुरुषस्य वाक्यं स्वकर्णे एव श्रुति-कटुकठोरमिव प्रतीयते । मालती अपरिज्ञातं पुरुषं दृष्ट्वा तस्य आभाषणं श्रुत्वापि यक्षग्रस्तेव निर्णिमेषं तमेव ध्यायन्ती किञ्चिन्नोवाच । तां तथाविधां पश्यन् पुरुषः पुनरपि संस्कृतमाश्रित्य जलं याचते ।

—योषिल्ललामभूते ! वरानने ! श्रोतव्यं चित्तश्रोत्रैः प्रसादिभिः । प्रणय-वाक्यानि ग्रहीतुमर्हन्ति अत्रभवत्यः । एष जनः पिपासार्त्तः, अध्वश्रमेण नितरां क्लान्तः । पातुमिच्छति पानीयम् अयं वराकः । कालहरणं न सहते मे पिपासा । यदि तावन् नास्ति प्रतिषेधात्मिका राजाज्ञा तर्हि·······

तत् श्रुत्वा सुप्तोत्थितेव मालती स्नेहविगलितस्वरेण प्रीति-मधुरं वदति।

—सौम्य! नमस्कारेण प्रसादयति अत्रभवन्तं प्रथमं प्रपापालिका। यथासुखं पीयतां यथाकामं गृह्यतां जलम्। पिपासार्त्ताय जलदानार्थमेव नियुक्तेयं राजपुरुषैः। एहि, इदं जलम् अञ्जलौ गृह्यताम्, एषाहं ददामि। इत्युक्त्वा मालती दर्व्या जलपात्राद् जलमानीय पिपासतः पुरुषस्य अञ्जलौ ददाति। जलदानावसरे तस्य मुखं निरीक्षमाणाया मालत्या दर्व्या जलं यदा अनवधानतया भूमौ पतति तदा किमिदमिति पुरुषस्तस्या मुखमवलोकयन् स्मितहास्येन कथयति।

—कल्याणि! मल्लक्षणो जनः खलु पिपासार्त्तः, न भूमिः।

तच् श्रुत्वा किञ्चिल्लज्जितेव मालती पुनरपि तस्मै जलं ददाति। दूरित-पिपासोऽपि पुरुषः जलपानसुखार्थमेव पुनः पुनः जलं पिबति, सापि ददाति। पुरुषस्ततः कथयति।

—भवतु, नाधिकं प्रदेयम्। विरम्यतामिदानीम्। जीवनदानेन भवत्या अहं सञ्जीवितः। मम प्राणा इदानीं स्वस्थतां भजन्ते। केनोपायेन अहमात्मा-नमनृणिनं करोमि?

इत्युक्त्वा पुरुषो मालत्या मुखाम्भोजे अधरोष्ठे स्वीये नेत्रे व्यापारयति। मालती तस्मिन्नेव ध्यानपरापि प्रीततया अस्खलितमेव वदति।

—अविदितचरोऽपि अत्रभवान् राजपुरुष इव मे प्रतिभाति। तद् यदि कार्य्यातिपातो न भवेत् तर्हि अस्यामेव अश्वत्थवेदिकायां क्षणमुपविश्य मार्गश्रमं हयारोहणजनिताम् अङ्गवेदनाञ्च अपनेतुमर्हति भवान्। इयं प्रपापालिका अपि क्षणसम्भ्रच्छायातुल्यं भवतां सङ्गसुखमनुभवतु।

पुरुषः कथयति।

—यथा भवतीभ्यो रोचते, तदेव करणीयम्। अप्रसवधर्म्मी पुरुष इति पुरुषे-च्छायाः स्वातन्त्र्याभावात् अत्रभवती एवात्र प्रमाणम्। भवतु अहमुपविशामि।

इत्युक्त्वा पुरुषः अश्वत्थवेदिकायामुपविष्टः। मालती अपि प्रपाया बहिरा-गत्य तस्य समीपे वेदिकायामुपविष्टा। वसन्तस्य प्रथमो मासः। सान्ध्यसमीरणः मन्दं मन्दं नुदति। अश्वत्थशाखासु मारुताहत-पत्राणि जिर्जिरं शब्दायमानानि कयाचित् षोडश्या वराङ्गसौन्दर्य्येण पराभूतानीति भीत्या भृशं कम्पन्ते। अस्तायमानः सूर्य्यः पश्चिमायां दिशि लज्जारक्तमुखो वृक्षान्तरालेषु आत्मानं गोपयितुं चेष्टते। वसन्तावताररमणीये काले निभृतमुपविशतोस्तयोः तारामैत्रं

जातम्। पुरुषसान्निध्यात् क्षुब्धा प्रकृतिरिव अश्वारोहिपुरुषसान्निध्यं मालतीं नोदयति। सा कथयति।

—अत्रभवान् दूरादागत इव प्रतिभाति। को वा देशो भवता निवासेन अलंक्रियते? कं वा नियोगमशून्यं करोति भवान्? का सा सौभाग्यवती या इदानीं 'वसतेरन्तर्हेतुत्वाद् वसन्त' इति संज्ञाभाजि मदनोन्माथिनि मधौ यक्षजायेव विरहदुःखमनुभवति? कः खलु निर्वहनीयो गुरुभारः यदर्थम् आकृतिसूचित-गुण-निलयेन भवता मार्गश्रमः स्वीकृतः? कुत्र गन्तव्यम्? यदि नाम न गोपनीयम्, इयं च जरती तच् श्रोतुमर्हतीति मन्यते भवान् तर्हि कथयितुमर्हति। महत् कौतूहलं मे जायते।

—शुभानने। ननु प्रथमं तावत् मया पृच्छयते—लावण्यं यस्यामचल-प्रतिष्ठं, चलमपि यौवनं स्थिरत्वयोगेन यस्यामचञ्चलतां भजते, आगन्तुकामपि प्रौढत्वं यस्या हाव-भाव-भीत्या दूरात् पलायमानं तिष्ठति, अचञ्चलतारुण्येन अप्सरायमाना सा योषित् यदि जरती का नाम युवतीसंज्ञां भजते? सौजन्य-विनयार्थमपि विकत्थनं न शोभते। इत्थं न वाच्यम्। भवतु। भवत्याः किञ्चिद् गोपनीयं मे नास्ति। सप्रतिभं मधुरं च भाषमाणा भवती पूर्वमेव मम हृदया-भ्यन्तरे प्रविष्टा इति कथं तत्र गोपनीयत्वं भवेत्। भिन्ने च गोपनीयता, अभिन्ने कुत्र तस्यावकाशः? सर्वं कथयामि! परन्तु अहमपि श्रोतुमिच्छामि केनात्रभवती प्रपापालने नियुक्ता? किमर्थं वा भवत्या कार्य्यमिदं स्वीकृतम्? अन्यच्च स्वकीयं संसारयात्रादिकम्....

तस्मिन् एवं कथयति मालती सोत्कण्ठेव तूर्णं वदति।

—अहो! ममापि वृत्तं भवता श्रोतव्यम्। आश्चर्य्यम्! किं तत्र श्रोतव्यं विद्यते?

—यथा तथा वा भवतु। शुश्रूषा मे जायते।

—तर्हि श्रूयताम्, अश्लाघनीयो वृत्तान्तः।

—दत्तावधानोऽहं, कथयतु आर्य्या।

—अस्ति हिमवत्-प्रभवयोः करतोयाकौशिक्योः नद्योरन्तर्गतः अपरब्रह्मावर्त्त इव सकलभुवनसारभूतः देशानामुत्तमो देशः पौण्ड्रवर्द्धनो नाम—यस्योत्तरस्यां दिशि गन्धर्वानामावासः उत्तुङ्गशृङ्गमण्डितो हेमकूटो नाम गिरिः, दक्षिणे च भगीरथेनानीयमाना त्रिपथगा गङ्गा दक्षिणवाहिनी सागरं याति। हरकरोद्भवा सदानीरा करतोया पौण्ड्रान् नित्यं प्लावयति, यां खलु माधवः कदा-

चिदुत्तीर्य पूर्वदेशं गतवान्। तत्र बलीसूनुना पुण्ड्रेण महानन्दातीरे पौण्ड्रवर्द्धनं नाम नगरं स्थापितम्। तस्मिन् वसुदेवो नाम राजा बभूव। तस्य पुत्रो वासुदेवः यदुवंशोद्भवं वासुदेवं शङ्ख-चक्र-गदा-पद्मधारिणं स्पर्द्धमानो राज्यं शशास। तमसहमानो यादवो वासुदेवः पौण्ड्रवासुदेवं समरे जघान। एतत् सर्वं भवतां श्रुतिपथमायाति किम्?

—एवमेवम्। पौराणिकाः किल कथयन्ति। ततस्ततः?

—ततो यादवजनानामाधिपत्ये पौण्ड्रे पौण्ड्रवासिनो जनाः तीर्णकरतोयाःजल्पीशं शरणं गताः।

—एषा खलु पौराणिकी कथा। कथ्यतां साम्प्रतिकी कथा भवत्याश्चरितम्।

—शोभनं, तदेव कथयामि। महानन्दातीरे पौण्ड्रवर्द्धने नगरे पाटलीपीठः। तत्र देवी पाटली स्वर्णमन्दिरे विराजते। पाटली-देव्या दर्शनार्थं देशाद् देशान्तरेभ्यश्च आगतैः जनैः समाकीर्णं पौण्ड्रवर्द्धनम्। सार्थवाहाश्च तत्र वाणिज्येन दूरदेशादागत्य वसन्ति। श्रेष्ठिचत्वरे पट्टदुकूलानां मृगमदानां चमरीकस्तरीणां पूर्वदेशीयपण्यानां नित्यं क्रयविक्रयो बाहुल्येन भवति। महाचीनेभ्यः किन्नरवर्षेभ्यश्च वणिजस्तत्र समागच्छन्ति। किं बहुना। नगतुल्याः प्रासादास्तत्र सन्तीति ततस्थानं नगरमिति अन्वर्थनाम, पौण्ड्राश्च तत्र वरीवर्द्धन्त इति पौण्ड्रवर्द्धनम्। तस्मिन् नगरे मणिदत्तो नाम श्रेष्ठी प्रतिवसति स्म। मालवानां गणस्थितिरिव पौण्ड्रश्रेष्ठिनां गणस्थितिस्तं नेतृत्वे अवृणुत। श्रेष्ठिप्रधानो मणिदत्तः श्रेष्ठिचत्वरे विपणनं कुर्वतां श्रेष्ठिजनानां नियामक आसीत्। स धनाढ्यः सञ्जातः। धनकोषे तस्य रत्नानि अपरिमितानि पण्यागारे च पण्यानि। तथापि अपुत्रकतया स क्षणमपि सुखं न लभते स्म। ततो व्रतोपचारनियमैः स पुत्रार्थं पाटलीदेवीमाराधयामास। तपसा तुष्टा पाटली 'कन्यारत्नं ते जनिष्यते' इति वरं प्रत्यक्षतो दत्तवती। तथा इदमपि उक्तम्—'यौवने पदं क्रियमाणा कन्या ते अस्मन्मन्दिरे नृत्यगीतार्थं प्रदेया।

—इयमेव वराकी पाटलीवरप्रसूता कन्या, रत्नं न वेति न जाने, देवी एव तत्र प्रमाणम्। अथवा किं⋯?

इत्यर्द्धोक्तौ पुरुषः सस्मितमभिधत्ते।

—नहि पाटलीप्रदत्ते वरे अन्यथा शङ्कनीयम्। तत् कन्यायाः रत्नत्वं प्रत्यक्षमेव। नहि प्रत्यक्षसिद्धः प्रमाणान्तरमपेक्षते। न च प्रत्यक्षमपह्नवमर्हति। प्रत्यक्षमेव वस्तुसत्तावगमे नः शरणम्। रत्नमिदं मृग्यमाणं तिष्ठति।

—अथ केन ?

मालती पृच्छति ।

पुरुषः कथयति ।

—ननु पार्श्वस्थेन जनेन ।

तं वारयन्ती मालती पूर्व्वानुवृत्तमनुसरति ।

—जातास्मि धनिनां कुले । इदानीं प्रपापालिका । भवतु बाल्ये व्याकरणं काव्यं च श्रुत्वा नृत्यं गीतं च परिशीलयन्ती यौवने कृतपदा वात्स्यायनीयं कामशास्त्रं पठितवती । स्नेहातिशयात् पिता मम पाटलीदेव्या अनुशासनमविगणय्य मां तस्यै न समर्पितवान् । परन्तु कुलधर्म्मे मां नियोज्य स्वयं वाणिज्यार्थं विदेशं गतवान् । ततोऽहं देव्या शप्ता । 'स्थानात् स्थानान्तरं परिभ्रम्य इतरेव तिष्ठसि त्वम् ।'

—अथ केन श्रुतः तत्शापः ?

पुरुषः पृच्छति ।

मालती कथयति ।

—नहि, स शापो न मया न वा मम पित्रा श्रुतः । तथापि कार्य्यात् कारणानुमाननियमेन शापोऽनुमीयते । अन्यथा कथं धनिनां कुले जाता नृत्यगीतपटीयसी शास्त्रागमनिपुणा वणिक्सुता प्रपापालिका भवेत् ?

अथ मम पितरि मां स्वीयकर्म्मणि नियुज्य वाणिज्यार्थं पारेसमुद्रं गतवति अहमेव आयातानां निर्य्यातानाञ्च पण्यानां क्रयविक्रये प्रात्याहिकं कर्म्म कुर्व्वती आसम् । एकदा पुरन्दरो नाम वणिग्युवा तत्रागतः । कमनीयकान्ति पुरन्दरं दृष्ट्वा जातकुतूहलापि शालीनतामनुरुन्धाना तस्य नामधामादिकं नाहं पृष्टवती । तेन स्वयमेव कथाप्रसङ्गेन कथितम् । सः खलु ताम्रलितिपत्तनात् नौकायानेन पौण्ड्रवर्द्धनमागतो वाणिज्यार्थम् । अत्र मासषट्कम् उषित्वा पुनरपि ताम्रलितिं प्रत्यावर्त्तिष्यते ।

अविदितगुणा अपि कविभणितिर्यथा कर्णे मधुधारां वर्षति तथैव अपरिज्ञातकुलशीलस्यापि तस्य स्नेहविगलितं वाक्यं मम हृदयमाप्लावयति स्म । पुरा किल दानवानां पुराणां दारणात् मघवा पुरन्दर इति यथा ख्यातस्तथैव मम मनसः पुरं दारयन् स पुरन्दरः सार्थकनामा जातः ।

—पुरन्दरः अहल्यां जीर्णां चकार इति 'इन्द्रो अहल्यायै जारः' इति वैदिकी श्रुतिरपि अन्वर्थतामस्मिन् भजते किम् ?

पुरुषः साकूतं पृच्छति । मालती कथयति ।

—कुतस्तस्यावसरः ? अहल्या एव इन्द्रं चकमे । दिव्यरतिकौतुकात् देवराजसङ्गमाभिलाषिणी दुर्मेधा सा मतिं चकार । अथ मुनेरन्तरं विदित्वा

आश्रमवासि-सर्वप्राणिशङ्कानिरासाय अहल्या मुनिवेशधारिणं शचीपतिं स्वीये उटजे प्रवेशयामास। रतिसङ्गमानन्तरं कृतार्थेनान्तरात्मना अहल्या सस्मितं सुरश्रेष्ठमब्रवीत्। 'देवेन्द्र। परितुष्टास्मि। प्रभो! शीघ्रमितः गच्छ। आत्मानं माञ्च गौतमात् रक्ष।' तत् श्रुत्वा देवेन्द्रः प्रहसन्निवाब्रवीत्। 'सुश्रोणि। परितृप्तोऽहम्। नात्र शङ्का कार्य्या, यथागतस्तथा गमिष्यामि। आमन्त्रये पुनर्दर्शनाये'ति।.........आस्तां तावत् किमनेन प्रसङ्गेन।

एकदा महानन्दातीरं गताहं पुरन्दरेण दृष्टा। ततः सः ममागमनकारणमपृच्छत्। भ्रमणार्थमिति मया यदा कथितं तदा स हृष्टमना मामवोचत्।

'आगम्यताम् एतस्मिन्नेव नदीतीरे वेतसीकुञ्जे उपविशावः।'

निभृतं मनोरमं स्थानम्। शीतलो वायुः। ततः कुञ्जे उपविशतोः आवयोः रिरंसा सञ्जाता। तस्य क्रोडे शिरो निधाय यदा अहं सुप्ता आसम् तदा तत्कण्ठम् एवं बाहुभ्यामापीड्य अधरे अधरं निवेशितुकामा....' इत्युक्त्वा तत्क्षणमेव तत् नाटयितुं सा यावत् प्रक्रमते तावदेव दूरे महान् कोलाहलः समुत्थितः। तच् श्रुत्वा चकितः पुरुषस्तत्क्षणादुत्थितो दूरमवलोकयति। मालती अपि अनुपदं तमेव याति। यावत् सुनिपुणमीक्षते पुरुषस् तावत् शस्त्रपाणीन् अश्वारोहिणो द्रुतं तत्स्थानं प्रति आगतान् दृष्टवान्। दृष्ट्वैव पुरुषो हयारोहिणो जनान् मालतीं हस्ताभ्याम् अश्वपृष्ठे स्थापयित्वा तूर्णं हयमारुह्य निमेषमात्रेण तत्स्थानात् द्रुतं पलायितः।

अथ व्रजतस्तयोः सन्ध्या समुपस्थिता। अस्तायमानस्य दिवाकरस्य रश्मिजालं रक्ततां ततश्च पिङ्गलत्वं भजते। क्रमाद् दश दिश आलिम्पतीव तमः पदं करोति। युगपद् आविर्भवन्ति नक्षत्राणि नभस्तले। तासु तारकासु सकलाभिः कलाभिराविर्भूतः पित्र्यन्नभूतश्चन्द्रमा राजयक्ष्मणा मुक्तो विराजते। सायन्तनी आरतिः श्रुतिपथमायाति दूरात्।

अश्वो द्रुतं धावति। अश्वपृष्ठे पुरुषः, तस्य वक्षोलग्ना मालती। पुरुषो वामहस्तेन मालतीमावेष्ट्य दक्षिणहस्तेन रश्मिं गृहीत्वा क्षणं परावृत्य पश्यति क्षणञ्चाग्रं निरीक्षते। अश्वस्य गतिवेगात् कदाचित् मालती पुरुषवक्षसि दृढं संश्लिष्टा भवति। अश्वारोहणदक्षः पुरुषः क्लेशं नानुभवति, पटुताभावान् मालती भीता सङ्कुचिता पीडामनुभवति। पुरुषहस्तः कदाचित् मालत्याः स्तनयोरधोभागं क्षणं च चूचुकौ स्पृशति। अभिनवघटनासङ्घातेन स्तनस्पर्शाच्च रोमाञ्चमनुभवन्ती मालती मुहुर्मुहुः पुरुषमुखं पश्यति। वदनविगलित-घर्म्माम्भः वस्त्रे पतति। परिश्रान्तमपि पुरुषं स्मितहास्येन समुज्ज्वलं पश्यन्ती मालती परमां

तृप्तिमाप्नोति। दस्युभिरनुस्रियत इति पुरुषान्तःप्रवेष्टुकामेव सा तद्वक्षसि भृशं लीनतां गता। वाताहतोऽलकः पुरुषस्य नयने पिदधाति, क्षणं च मुखे पतित्वा कण्डूयनं जनयति। मालत्या वस्त्रं विस्रस्तं, चोलकाभ्यन्तरस्थितेन स्तनयुग्मेन मुखं न प्रकटीकृतम्, तथापि तयोः पीनत्वं नयनसुखाय जातम्। स्खलितधम्मिल्लान् मुक्ताः कचोत्कराः सौरभमातन्वन्ति। केशदामनिर्गतेन सौरभेनोन्मादितः पुरुषश्चिबुकाग्रेण मालतीग्रीवां दृढं पीडयति।

एवं परस्परगात्रसंस्पर्शात् सानुरागदर्शनाच्च तयोः रिरंसा संजाता, सौरभेन अभिवर्द्धिता। रूप-गन्ध-स्पर्शादिभि तौ कामवशं यातौ। रिरंसुः पुरुषः पद्भ्यामश्वमाहत्य तस्य गतिवेगं वर्द्धयति पुनः पुनः। मालती कवोष्णं निःश्वसिति। वेपथुश्च तस्या गात्रे।

किमिदानीं कर्तव्यं, कुत्र वा गन्तव्यमिति सहसा निश्चेतुमसमर्थः पुरुषः। किमिदानीमपि दस्यवस्तौ अनुसरन्ति उत प्रतिनिवृत्ता इति वारं वारं सुचिरं पश्चादवलोकयन् अपि यावत् पुरुषो दस्यूनां छायामपि न पश्यति तावत् किञ्चिदाश्वस्तः अश्वस्य रश्मिं संयच्छति। रश्मिसंयमनादश्वस्य मन्दीभूतो वेगः। 'कथमश्वो मन्दायते? किं पदक्रमेण परिश्रान्तो हयः' इत्येवं विचिन्तयन्ती कारणजिज्ञासया मालती परावृत्य पुरुषमुखं पश्यन्ती सकौतुकं पृच्छति।

—सौम्य! अविदितगुणसुन्दर! किमनुयायिनो निवृत्ताः यदश्वो मन्दं धावति? उत इदानीमपि ते आवामनुसरन्ति? कियत्संख्यकास्ते, किं जानाति भवान्? नूनं खलु ते शस्त्रपाणयः। कस्तेषामभिप्रायः? किं ते आवां हनिष्यन्ति अथवा शृङ्खलितौ करिष्यन्ति? अपि तान् पश्यति भवान्? वेपते मे हृदयम्, गात्राणि सीदन्ति।

पुरुषः सस्मितं कथयति।

—भद्रे! न भेतव्यम्। अलमति शङ्कया। निवृत्तास्ते। अथ अनिवृता अपि धृतासौ मयि स्थिते……

—धृतासिर्भवान् एकाकी, ते तु बहवः।

मालती ब्रूते।

पुरुषः सहासं कथयति।

—किं न श्रुतं लावण्यवारांनिधिभूतया अत्रभवत्या 'एकश्चन्द्रस्तमो हन्ति?' सा कथयति।

—कथं न श्रुतम्। इदमपि श्रुतिपथमायाति यदेकाकी रथी योधिनां सहस्रं योधयेत्, परन्तु........

इति मालती यावद् वाक्यशेषं यतते तावदेव पुरुषः सोपहासं ब्रूते।

—परन्तु नाहं रथी। अश्वारोही इत्यत्र तु नास्ति संशयः।

मालती सलज्जं कथयति।

—रथी वा अश्वारोही वा यथा तथा वा भवतु। नाशङ्केऽहं भवतो वीर्य्यवत्तायां शौर्य्ये पाणिलाघवे च। तथापि एकाकी कथं बहून् योधयेदिति महती शङ्का मां बाधते। अथवा निष्कारणम् अमङ्गलाशङ्कि मे मनः।

—ननु, 'स्नेहः अमङ्गलाशङ्की' इति कालिदासोक्तमेव साधु मन्तव्यम्।

पुरुषः साकूतं मालतीं विलोक्य कथयति।

मालती प्रसङ्गान्तरं सूचयति।

—कुत्र मां नयति भवान्? आवां क्व गच्छावः। विभावरी सम्प्रवर्त्तते। कुत्रावां रात्रिं यापयावः?

पुरुषो मालतीं हस्ताभ्यां दृढमावेष्ट्य ब्रूते।

—शुचिस्मिते! अलमुत्कण्ठया। रात्रिं ससुखमेव यापयावः। क्षणदा क्षणमिव यास्यति। किं निद्रा अत्रभवतीं बाधते, उत अङ्गवेदनां हन्तुमिच्छति भवती नागरसङ्गमात्? किं चेतः समुत्कण्ठते........

—नहि, नहि, मैवं भणितव्यं भवद्भिः, इति मालती तं अर्द्धोक्तौ विनिवार्य्यं कथयति। ततो दूरादागतं जयध्वनिं श्रुत्वा पुरुषः सोत्कर्णः क्षणं स्थित्वा पुनरपि कथयति।

—एषा सायन्तनी जयघोषणा दुर्गरक्षकाणां सैनिकानाम्। अस्मिन्नेव दुर्गाभ्यन्तरे कस्यचिद् धनिनो राजपुरुषस्य वा गृहे रात्रिं यापयावः। पश्य राजमार्गाद् दक्षिणेन प्राकार इव दृश्यते। प्रस्तरप्राकारवेष्टितः अयं खलु शैलदुर्गः। तमेव गच्छावः।

क्षणमितस्ततो विलोक्य दक्षिणगं मार्गं दृष्ट्वा पुरुषः अश्वं दक्षिणाभिमुखं प्रहिणोति। कियद्दूरं गत्वा यावद् दुर्गतोरणं प्राप्य प्रवेष्टुकामः पुरस्तावद् द्वौ रक्षिणौ मध्येमार्गं तं वारयतः। तयोरन्यतमः तारस्वरेण पुरुषमादिशति।

—अरे रे अश्वारोहिन्! कस्त्वम्? तिष्ठ तिष्ठ क्षणं मूढ! असिं यावन्निष्कासयामि कोषात्।

ततश्चापररक्षिणमुद्दिश्य कथयति ।

—अरे रक्षिजनाधम ! किं न पश्यसि चक्षुर्भ्यां यत् पुरुषोऽश्वेन दुर्गाभ्यन्तरं गच्छति ?

—कथं न पश्यामि ? न मम दृष्टिरसत्पुरुषसेवेव विफलतां गता । पश्यामि न केवलं पुरुषम्, अश्वञ्च पुरुषवक्षोलग्नां स्त्रियमपि ।

—किं स्त्रीजनोऽपि अत्र ? कुतः अकाण्डे प्रथनम् ? स्त्रीजनोऽपि अश्वेन पलायते किम् ? अहो किमाश्चर्य्यम् ? अश्वमारोहति स्त्री ? सत्यं कथय किमश्वः स्त्रियमारोहति उत अश्वमारोहति स्त्री ? अहो अश्वमारोहन्त्याः स्त्रियः विपरीत एव कल्पः ।

—स्वाभाविको वा विपरीतो वा स्वयमेव पश्य । पश्य एषोऽश्वः, एषा स्त्री, एष पुरुषः ।

—पश्यामि, पश्यामि अश्वस्योपरिस्थितं पुरुषं, तस्योपरिस्थिताञ्च रमणीम् । ननु पृच्छामि, एतेषां कः सम्बन्धः संयोगः समवायो वा नाहं तावद् जाने ।

—आस्तां तावत् सम्बन्धविचारः । मार्गावरोधं कुरु, यथा दम्पती न पलायेताम् ।

—एषोऽहं मुक्तासिर्दृढं मार्गावरोधं कुर्व्वन् तिष्ठामि । का कथा अश्वारोहिणः, बालकः बालिकापि वा मामतिक्रम्य गन्तुं न शक्नुयात् ।

—अरे मूर्ख ! बालको गन्तुं न शक्नोति बालिका च । एषः खलु वीर्य्यवान् अश्वारोही । किं वैपरीत्येन कथयसि । सावधानं तिष्ठ । ते त्रयः, आवां द्वावेव ।

—अरे पण्डिताग्रगण्य ! कुत्र त्रयः ? तावपि द्वौ, आवामपि द्वौ, द्वौ द्वौ द्वन्द्व इति किं न कथितं कात्यायनेन ।

—धिङ् मूर्ख ! किं न पश्यसि त्रित्वम्—एकः पुरुषः, एका स्त्री, एकः अश्वः इति त्रयः । त्रित्वं तावद् व्यासज्यवृत्त्या भवति । पुरुषः स्त्रियमाश्लिष्य अश्वोपरि तिष्ठतीति व्यासज्यवृत्तिः ।

—अहो दार्शनिकप्रवर ! तिष्ठ तिष्ठ । द्वितीय उद्योतकरः त्वम् । त्वया न्यायस्थितिरिदानीं सुप्रतिष्ठिता भवेत्.........

एवं परस्परमधिक्षिप्य प्रजल्पतोस्तयोः पुरुषोऽश्वादवतीर्य्य हस्तेनैकेन मालत्याः प्रसारितं हस्तं धृत्वा अपरेण हस्तेन तस्या नितम्बमावेष्ट्य तामश्वा-

दवरोहयति। तौ अश्वादवतीर्णौ दृष्ट्वा एको रक्षी बाहू वितत्य मार्गमवरोधयन् स्थितः। अपरः अन्तर्भीतोऽपि पौरुषं प्रकटयन् तारस्वरेण पुरुषमधिक्षिपति।

—अरे रे पुरुषाधम! पाटच्चर! स्त्रीलम्पटोऽसि यत् स्त्रियमपहरन् पलायसे। किमस्माकं दुर्गाध्यक्षे परममाहेश्वरे परमभट्टारके सुगृहीतनाम्नि पर्णदत्ते शासति अस्मिन् कर्णसुवर्णविषये त्वं न बिभेषि राजदण्डेभ्यः? किं न जानासि स्त्रीरत्नापहारी खलु आततायी? किं न श्रूयते चौरेण त्वया यत् 'नाततायिवधे दोषो हन्तुर्भवति कश्चन' इति मनुभाषितम्? आततायिनं स्त्रीचौरं त्वामहमद्य यमसदनं नयामि। एह्येहि····

अपरो रक्षी समीपमागत्य उपांशु कथयति।

—मैवं वद। किं न पश्यसि आकृति-वेश-भूषा-सूचिताभिजात्या एषा रमणी भृशमाशङ्कमाना सङ्कुचिता आत्मानं गोपायतीति। मा एनां भीषय। एषा कस्यापि········इत्यर्द्धोक्ते द्वितीयरक्षी कथयति।

—पश्यामि, पश्यामि। जानामि खलु एषा वाजिगमनकातरा आत्मानं विनोदयितुमिच्छति। अतस्त्वं नय पुरुषम् अश्वञ्च दुर्गपालाय। अहमेनां नयामि पानशालाम्। त्वं यावत् पुरुषं दुर्गपालाय निवेदयसि तावदहमेनां पानभोजनादिभिः सुतृप्तां करोमि। अस्या विनोदनाय आत्मानं कैङ्कर्य्ये च नियोजयामि।

—अरे मूर्ख! महिलाया अस्या विनोदनाय किं तव महत् साधनमस्ति?

—धिङ् मूर्ख! अस्ति नवेति विचारणा न कर्त्तव्या। किं न जानासि पत्रेण, पुष्पेण, फलेनापि भक्त्युपहृतेन देवता तुष्टा भवति।

—जानामि, जानामि खलु। देवता प्रीतिमाप्नोति सत्यम्। एषा खलु कलानिपुणा वराङ्गना········

—अहो बालिशता वैधेयस्य। किं न पश्यसि नयनाभ्यां लावण्येन सौन्दर्येण चैषा अप्सरोविनिन्दिता देवतायते। अविलम्बमेनां मद्हस्तगतां कृत्वा त्वं स्वनिदेशं पालय।

रक्षिणोरेवं कथयतोर्हयारोही पुरुषः एकेन हस्तेन कोषस्थस्यासेः त्सरुं सुदृढं गृहीत्वा अपरेण हस्तेनाश्वस्य रश्मिं धारयन् मालतीं स्वगात्रेणापवार्य्य स्थितः। मालती तयोरशालीनं भाषणं श्रुत्वा क्रोधकषायितलोचना भ्रुकुटिं कृत्वाधोमुखी तिष्ठति। रक्षिणौ पुरुषं तर्ज्जयन् वारं वारं पृच्छतः।

—कस्त्वम्? कुत आयातः? समर्पय रमणीम्, नो चेद् यमसदनं नयामि····

तयोर्भृशं तर्ज्जनं वारयन् यावत् पुरुषः किञ्चित् कथयितुमुपक्रमते तावत्

कश्चित् सेनानीस्तत्र समुपस्थितः। तं दृष्ट्वैव रक्षिणौ सभूमिस्पर्शं तं प्रणम्य युक्तकरौ तिष्ठतः। सेनानीस्तौ पृच्छति।

—कोयं पुरुषः? किमर्थं युवां तर्ज्जयथः पुरुषम्? किं कृतमनेन यद् युवामेनं यमसदनं नेतुं कृतसङ्कल्पौ भवथः? कथय, शीघ्रं कथय।

रक्षिणौ तच्छ्रुत्वा भीतिविह्वलं सगद्गदमसंलग्नं कथयतः।

—भोः! स्वामिन्! प्रभो! नात्रास्माकमपराधः। वयं खलु, आवां हि निरपराधिनौ। एषः हतकोऽपराध्यति। चौरः खलु एषः.......

सेनानीः कृत्रिमक्रोधेन ब्रूते।

—कथं राजशासनं पृष्ठे कृत्वा पुरुषं तर्ज्जयथः? राजापथ्यकारिणौ युवाम्। सत्यं कथय।

तौ कथयतः।

—नहि, नहि। नैतत् वक्तव्यं नैतत् श्रोतव्यम्। आवां खलु राजभक्तौ....नहि, नहि अत्रभवतां किङ्करौ आज्ञावहौ। अहर्निशं दिवा मध्याह्ने निशि सन्ध्यायां स्वप्ने सुषुप्तौ स्वामिनः आज्ञां मालामिव शिरसि मस्तके धारयन्तौ तिष्ठावः, आज्ञापयतु स्वामी।

सेनानीः पुनरपि कठोरं पृच्छति।

—आस्तामाज्ञापालनम्। कथयतम्, किमर्थमेनं प्राणदण्डेन भीषयथः? सत्यं वद, नो चेत्.......

—स्वामिन्! सत्यं कथयामि। नाहं किञ्चिदपि जाने। अयं लम्बोदरः सर्वं जानाति। अहं दुर्गतोरणद्वारम् अतन्द्रो रक्षामि। न मम किञ्चिदन्यत् कार्य्यमस्ति.......लम्बोदरः खलु मार्गं गत्वा एनं धृत्वानीतवान्.......

सेनानीः लम्बोदरं पृच्छति।

—लम्बोदर! सत्यं भण, भण रे भण। किं कृतमनेन? किं वृत्तम्? का युवयोश्चिकीर्षा? कालापहरणं न सहते मम परिपृच्छा।

तच्छ्रुत्वा लम्बोदरो भूमौ पतित्वा सेनाध्यक्षस्य पादौ स्पृष्ट्वा सकरुणं कथयति।

—भोः स्वामिन्! यथार्थवादिनो ममात्रापराधो न ग्रहणीयः। अनेन मूर्खेण गजकेतुना निरलसं दुर्गतोरणरक्षकाय मह्यं कथितम्—'चौरः स्त्रियमपहरन् अश्वेन पलायते। चौरो हन्तव्यः' इति। तच्छ्रुत्वा केशाग्रगतान् मम प्राणान्

सन्धारयन् अहं चौरस्य मार्गमवरुध्य यावदासम्, तावदयं गजकेतुर्भीत्या पलायितुमिच्छति····

तं वारयन् गजकेतुः किञ्चिदुच्चैः कथयति।

—नहि नहि स्वामिन्! न श्रोतव्यं वैधेयस्य मिथ्याभाषणम्। मिथ्यावादी खल्वेषः। यथार्थतस्तु मयैव मार्गावरोधः कृतः। यावदयं चौरः स्त्रियं स्कन्धे कृत्वा ताम्रलिप्तिं गन्तुकामोऽनेन मार्गेण तावदत्रभवान् समुपस्थितः।

सेनानीस्तमाक्षिपन् ब्रूते।

—धिङ्मूर्ख! नायं पन्थास्ताम्रलिप्तिमुपतिष्ठते। मा मिथ्याप्रजल्पनं कुरु। ततः पुरुषाभिमुखो भूत्वा मधुरं पृच्छति सेनानीः।

—क्व गन्तव्यं भवता? कस्माद् आगतः? को वा देशो भवता जन्मना अलङ्क्रियते? किं सुगृहीतं नाम? सर्वं स्वैरं कथ्यताम्। न भेतव्यम्।

अश्वारोही पुरुषः कथयति।

—भोः सेनाध्यक्ष! अभिवादये भवन्तं श्रद्धावनतमस्तकः। राजसेवकंमां माधवं विजानीयात्। राजनिदेशात् पौण्ड्रवर्द्धनाद् गौडराजधानीं प्रत्यागच्छन्तं मामेतौ रक्षिणौ प्राणदण्डेन भीषयतः।

माधवस्य भाषणे वर्णानामुच्चारणस्थानप्रयत्नं विचिन्त्य 'नायं पूर्वदेशीय' इति सेनानीः स्वात्मगतं कथयति। 'नूनमयं गौडदेशीयः अङ्गदेशीयो वा। अतः पृच्छामि किमस्यागमनकारणम्। को वा राजनिदेश' इति। प्रकाशं ब्रूते।

—अकथितोऽपि आकृत्या प्रकृत्या च ज्ञायते यदत्रभवान् प्रधानो राजपुरुषः। कः खलु स राजा यस्य निदेशं पालयन् देशाद् देशान्तरं भ्रमति भवान्। कस्तत्र निदेशः?

—साधु! साधु!! सम्यक् पृष्टम्। कथयामि। एक एव पुरुषोऽस्मिन् धरणीतले अधुना राजसंज्ञां भजते यथा एकः सूर्यः पृथिवीमुद्भासयति। तस्यैव राज-सूर्य्यस्य भासा अहं भवान् अन्ये च सर्व्वे अधिकारिणः राजपुरुषा विभान्ति। यः खलुः स्वीययशोधवलिम्ना शशलाञ्छनमपि तिरस्करोतीति जनैः शशाङ्क इति उद्गीयते, निखिलारातिद्विजिह्वेषु नरेन्द्रायमानः पञ्चगौडाधिपः स नरेन्द्रगुप्त इति च जगतीतले विश्रुतः मां नियोजयति राजकार्य्यनिर्वहणे।

—साधु साधु। एकस्यैव चक्रवर्तिनो वयं सर्व्वे सेवकाः। ज्ञायतां तेनैव परमभट्टारकेण महासामन्तः पर्णदत्तः कर्णसुवर्णविषये नियुक्तः शासयिता।

—ज्ञातम्। कर्णसुवर्ण-विषयमहमागतः किम्?

—अथ किम्!

—नाम्ना केन प्रसिद्धोऽयं दुर्गः । कोऽत्र दुर्गपालः ?

—श्रूयतां महासामन्तेन पर्णदत्तेन कर्णसुवर्णविषयो यथा सुरक्षितो भवेत् तथा विचिन्त्य सिंहवर्म्मा अस्य महानददुर्गस्य रक्षायै नियुक्तः। महासामन्तस्य पर्णदत्तस्य शासनमनुसृत्य दुर्गपालः सिंहवर्म्मा आदिशति यत् समुत्तीर्णायां सायं सन्ध्यायां सर्व्वे आगन्तुकाः प्रष्टव्याः 'कुत्र निवासः, कस्मादागतः, क्व गन्तव्यम्, किं गमनकारणमिति।' एतानि सर्व्वाणि ज्ञात्वैव आगन्तुकः विसर्ज्जनीयो नान्यथा। इदमेवानुशासनं मां नोदयति परिप्रश्ने। पृच्छ्यते भवान् केयं रमणी ?

सेनाध्यक्षस्य प्रश्नं श्रुत्वा सहसोत्तरदाने असमर्थः माधवो जडताविष्टः कथयति।

—एषा, इयं, इ····यं म····म मम धर्म्मपत्नी।

इति कथयन् एव माधवो मालतीमुखं निरीक्ष्य तस्या नयने दृष्टिं निपात्य वक्त्र-विकारं निश्चेतुं यतते। मालत्या नयने मुखे च समुपस्थितं भावान्तरं नक्षत्रालोके माधवेन सम्यक् नोपलक्षितम्। यदि तावत् निरैक्षिष्यत तर्हि तेन अज्ञास्यत मालती किञ्चिद् विस्मयाविष्टापि न क्रुद्धा, साकूतं विलोकयति। किं धर्म्मपत्नीति कथनात् मालती क्रुद्धा, उद्विग्ना अथवा प्रमुदिता इति निर्णेतुमशक्यो माधवस्तूष्णीं स्थितः।

तयोर्मौनमवधार्य सेनानीः पुनरपि पृच्छति।

—शोभनम्। भवतः साहचर्य्यं चित्राचन्द्रमसोरिव प्रतिभाति। जिज्ञासा मां मुखरीकरोति पुनरपि प्रष्टुम्। किमत्रभवती अपि राजनियोगं पालयन्ती देशाद् देशान्तरं भ्रमति ?

—नहि नहि, मा मैवं मन्तव्यम्। कथं पुरुषजनपालनीयः राजनिदेशः स्त्रीजने सार्थकतां सफलतां वा भजेत। एषा चरितव्रता स्वामिद्वितीया छायेव सर्व्वत्र मामनुगच्छति। अनन्याश्रया किं वा वराकी करोतु। नात्र किञ्चित् शङ्कनीयमस्ति।

—ज्ञातम्, विदितम्। अधुना उत्तीर्णा सन्ध्या। विभावरी राक्षसीव धरातलं कवलयति अन्धेन तमसा। चन्द्रालोको न प्रभवति तमो विहन्तुम्। राजमार्गो दस्युसमाकुलः। भवान् स्त्रीसनाथः, एकाकी। अस्यां वेलायां गमनं नोपदिष्टं शास्त्रकारैः। अतो जिज्ञास्यते का अत्र राजाज्ञा यद् विश्रामकालः गमनकालः कृतो भवता ?

—साधु पृष्टम्। कार्य्यगुरुत्वमेवात्र कारणम्। विश्रामे कार्य्यातिपातः गमने कार्य्यसाधनमिति विचिन्त्य एव एतत् कृतम्। श्रुतं भवति भवतः 'अनाक्रम्य जगत्कृत्स्नं नो सन्ध्यां भजते रवि'रिति। कार्यसम्पादनानन्तरमेव विश्रामो मम निश्चितः।

—अहो यथार्थवादी भवान्। धन्यो राजाज्ञाकारी। कुशलं भवते। इदानीमागम्यतां दुर्गाभ्यन्तरे रात्रियापनाय। श्वः प्रभाते यथास्थानं गमिष्यति। इत्युक्त्वा सेनानीर्माधवमाह्वयन् अग्रतो गतः। माधवो मालतीं हस्तेन धृत्वा तमनुसरति। रक्षिणौ अश्वस्य दमनीं धृत्वा तं दूरं नयतः। दुर्गाभ्यन्तरात् सायन्तनी विजयघोषणा श्रुता।

पथि गच्छन् सेनानीः पुनरपि कथयति।

—रात्रिं यापयताम् अतिथिशालायाम्। श्वः प्रभाते दुर्गपालाय युवां निवेदयामि। ततस्तेनानुज्ञातः स्वाभिमतं देशं गमिष्यथः। इत्युक्त्वा स गतः।

अथ प्रैषमनुसरन् मालत्या सह माधवोऽतिथिशालां प्रविष्टः। अतिथिशालायाः स्वागतकक्षं प्रविष्टयोस्तयोः अतिथिशालापालिका स्वागतं व्याहरति। स्मितमधुरं ब्रूते सा।

—स्वागतं युवाभ्याम्। मार्गश्रमेण नितरां परिश्रान्तौ युवाम्। अत्रासने समुपविश्य मार्गश्रममपनयितुमर्हथः। आतिथ्यं मां नोदयति जिज्ञासायाम्। किं प्रष्टुमर्हामि—अथ किं नाम पानीयं रोचते भवद्भ्यः? शर्करामधुमिश्रितं तक्रम्, उत यवासवम्? यदि तावत् सुरापानाय स्पृहा तर्हि नामधेयमुच्यताम्। बहुविधाः सुमिष्टाः सुरा वर्त्तन्ते अतिथीनां सेवायाम्—गौडी-पैष्टीमाध्वीति। तासु कतमा स्वादुत्तमा मन्यते भवद्भिः? यथाभिरुचि सेवनीया। सर्व्वाः सुलभा अस्यामतिथिशालायाम्। अभाव इतिशब्दो न्यायशास्त्रे एव, नास्तीति चार्व्वाकेष्वेव विद्यते नास्माकमतिथिशालायाम्।

मालतीमुखं निरीक्ष्य कस्तस्या अभिप्राय इति निर्णतुकामो माधवः शनैः कथयति।

—अभिवादये अत्रभवतीमतिथिशालापालिकाम्। भवत्या मधुरवचनेन वायुना मेघ इव, अहिमकिरणेन तम इव अस्माकं मार्गश्रमो दूरीकृतः। अहो यथा मनोरमा पान्थशाला तथैव तस्याः पालिका। योग्यस्य योग्यसंयोगः। पान्थानां नेत्रविलोभजननानि मनोज्ञानि भित्तिचित्राणि। विचित्राः शालभञ्जिका आलपन्तीव। अहो नैपुण्यं शिल्पीनाम्। परन्तु चित्रेषु शालभञ्जिकासु च अत्रभवती सर्व्वाणि तिरस्कृत्य अप्सरायमाना अतिथिशालामिमां द्वितीयाममरावतीं करोति। एषा भवती सौन्दर्य्येण…………

तं वारयन्ती शालापालिका अनङ्गमेखला ब्रूते।

—भवतु, भवतु। कृतज्ञास्मि। कतरत् पानीयं प्रदेयमिति। यदि मया ज्ञायते तर्हि………कथयन्तु आर्य्याः।

—ननु गौडेषु गौडी एव शोभनेति मे मतिः।

—'किं गौड़ी अत्रभवत्यै अपि रोचते' इति पृष्ट्वा अनङ्गमेखला मालतीं पश्यति ।

—नात्र वैमत्यस्य कारणं पश्यामि ।

मालती ब्रूते

तच्छ्रुत्वा आकर्णविस्तृतहास्येन अनङ्गमेखला सपरिहासं कथयति ।

—अहो मधुरं दाम्पत्यं समरुचित्वात् । यदेव पुरुषोऽभिलषति, तदेव धर्म्मपत्न्यै रोचते । नैतन्निष्कारणम् । पुरुषेच्छामनुरुन्धाना स्त्री: । भवद्भ्यां सुनिर्व्वाचितं पानीयम् । सुरासु गौड़ी स्वादुतमेति पानशौण्डैराद्रियते । मादकतायामेषा अन्या: सर्व्वा: सुरा अतिशेत इति युवजनै: स्वीक्रियते । शीघ्रमेव एषा जनयति क्षीबतामिति कामिजनप्रिया । कान्ति: दीप्तिकारित्वं दीपनत्वञ्च गौड्या गुणम् । अत: गौडी एव मोदयतां दम्पती ।.......आं स्मरामि । पानेन सह भक्षणीयमपि प्रदेयं भवेत् । ऐणेयो मांस: शूलीकृतो विद्यते । रुरुवराहगोधानपि सुपक्वान् भक्षितुमर्हन्ति भवन्त: । सारसो मयूरोऽपि घृतपक्व: सुवासितो वर्त्तते । रोचते चेदेतेषां कश्चित् तर्हि कथ्यताम् । अथवा भृष्टयवा:, शालीगोधूमचूर्णा:, चिपिटका:, सुमिष्टगुड़लड्डुका: पानीयेन सह सुसमञ्जसा भवेयुरिति मन्येथे युवाम्, तर्हि तेषामन्यतमं दास्यामि पानीयेन सह । ननु पानीयनिर्व्वाचने पुरुष: प्रमाणम्, भक्ष्यनिर्णये तु अत्रभवती प्रभवतीति मन्ये ।

तच्छ्रुत्वा कियत्कालं विमृश्य माधवाभिप्रायजिज्ञासया तन्मुखमवलोकयन्ती मालती अनङ्गमेखलां ब्रूते ।

—अत्रभवती एव उत्तमभक्ष्यविनिर्णये प्रमाणम् । भवतीमृते कस्तावत् वक्तुं शक्नोति ? वक्तव्यमिति कृत्वैव ब्रवीमि । ऐणेयो मांस: रस-वीर्य-विपाकादिगुणैर्य्युत इति वैद्यके गीयते । कषायत्व-मधुरत्व-रोचनत्व-वलकारित्वादीनि यस्य गुणानि । स एव गौड़ीं सङ्गच्छते । अतो दीयतां गौड़ी सुरा, शूलीकृत ऐणेयो मांस:, लड्डुकश्च गुडमिश्रित: । गोधामांसमपि दातुमर्हसि, यतो गोधामांस: रक्तशुक्रबलकारक इति वैद्या: कथयन्ति ।

तच्छ्रुत्वा अनङ्गमेखला करतालीं दत्त्वा विहस्य सपरिहासं ब्रूते ।

—ज्ञातम् । ज्ञातमत्रभवती बडवा ।

—कथं मयि बडवात्वम् ?

मालती पृच्छति ।

—ननु मृगाभिलाषात् ।

—मृगाभिलाषेण किम् ।

—किं न कथितं वात्स्यायनेन यद् बडवाया मृगेण सङ्गम:.......इति अर्द्धोक्तौ

लज्जारक्तमुखीं मालतीमालोक्य वाक्यमसमाप्य विरमति अनङ्गमेखला। ततश्च प्रकृतमनुसृत्य पृच्छति।

—किं कथितम्? ऐणेयो मांसः, गौडी च सुरेति? भवतु, यद् यद् रोचते तदेव दास्यामि। इतोऽन्यदपि यदि किञ्चिदपेक्ष्यते तर्हि निःसङ्कोचं कथ्यताम्, यदेव रोचते तदेव भक्षणीयम्।

एवं कथयन्त्या अनङ्गमेखलाया स्मितोद्भासिते कपोले स्वर्णकुण्डलाभया समुज्ज्वलतरे जाते। अधरोष्ठे सकौतुकं स्मितं समुद्भासितम्। लास्येन ततः नियोगपालनाय गच्छति।

× × ×

अथ शयनकक्षे दुग्धफेननिभे शयनीये अर्द्धशयानो माधव उपधाने हस्तौ दत्त्वा नेत्राभ्यामाबन्निव मणिकुट्टिमानि अवलोकयति। पार्श्वे समुपविष्टा मालती किञ्चित् प्रष्टुकामेव माधवं निरीक्ष्यास्ते। भित्तिचित्राणि विलोक्य समुत्कण्ठितो माधवस्तरलस्वरेण मालतीमाहूय कथयति।

—सुभगे। पश्य भित्तिचित्राणि। अहो रूपम्! अहो अपूर्व्वः वर्णसमावेशः। जानासि किमेतेषामाख्यानम्? ननु कथयामि यथाक्रमम्।

एषा स्वर्वेश्या मेना शृङ्गारं नाटयन्ती विश्वामित्रतपोभङ्गाय साभिलासं नरीनर्त्ति तस्याग्रतः। नृत्यपरायणायाः स्खलितदुकूलायाः स्तनयोः पीनोत्तुङ्गत्वं यथा दृष्टिविलोभं जनयेत् तथा कृतं चित्रकारेण। विव्वोकादिहावा अन्ये च भावास्तस्या मुखे नयनयोः प्रकटिता दृश्यन्ते। तपोनिरतस्य मुनेर्विश्वामित्रस्य तपोभङ्गात् तस्य नयनयुगलं दिवाकरकरैर्विकाशितः कैरवकोरक इव समुद्भासितम्। अहो मन्मथस्य प्रभावः! मुनेर्नयनयोः प्रकटिता रिरंसा परिलक्ष्यते।

इतः पश्य, इयमुर्व्वशी पुरूरवसा संयुक्ता। कथमुर्व्वशी समुत्पन्ना ज्ञायते किम्? कथयामि। कदाचिन् नरनारायणाख्यौ मुनी तपस्यानिरतौ आस्ताम्। अथ समाधिभीरुणा देवेन्द्रेण तयोस्तपोभङ्गाय प्रेषिताः स्वर्वेश्याः। ताः तयोरग्रतः किलकिञ्चितादिकं प्रदर्श्य यदा नृत्यपरायणास्तिष्ठन्ति, तदा नारायणेन मुनिना वृक्षपत्रे आम्रवृक्षादाहृतेन स्नेहेन अङ्किता अनिन्द्यसुन्दरी काचित् योषा। चित्रिता योषा लावण्येन सौन्दर्य्येण च ताः धिक् करोतीति ताः तस्मात् पलायिताः। मुनिना चित्रे प्राणाः सञ्चारिताः। यतः सा उग्रकामनां जनयति अत एव सा उर्व्वशीति स्वर्लोकयोः प्रसिद्धिं गता।

तच्छ्रुत्वा मालती कथयति।

—अपूर्व्वमाख्यानम्। ननु उर्व्वशी पुरूरवसा वियुक्तेति श्रूयते। कथं सा वियुक्ता?

—श्रूयताम्। यदा स्वर्वेश्या उर्व्वशी जरामरणवशगं पुरूरवसं चकमे तदा समयः कृतः सुरतव्यापारे। चेत् समये भंगे सा तं परित्यज्य यास्यतीति। अथ कदाचित् पुरूरवसा स समयो न रक्षितः। तद्दृष्ट्वा उर्व्वशी तं विहाय दूरं गता।
—ततः किं कृतं पुरूरवसा ?
—स वराको विरहदुःखमसहमानस्तां सकरुणं ययाचे। 'एहि वयं वाचा वाचं मिश्रयामः। मा याहि। त्वयि एव मम जीवितम्। त्वां विना नाहं जीवामि, म्रिये।'
—तदा तया किं कृतम् ?
—तयोक्तम्। शृणु पुरूरवः! 'न वै स्त्रीणां सख्यमस्ति, शालावृकाणां हृदयान्येताः।' तासां सख्यं न विश्वसनीयम्। त्वं मा मृथाः।
—अहो मर्म्महृदयं प्रकाशितम्। जरामरणधर्म्मी नरः आमृत्यु स्त्रियः सख्यमिच्छति। जायायाः जायात्वं पत्युश्च पतित्वमिति दाम्पत्ये मनुष्याः कामयन्ते। स्थिरयौवनाः स्वर्वेश्यास्तु भस्मान्तं शरीरम् इव सुरतान्तं प्रेम इति मन्यन्ते। अतो विरहकातरं पुरूरवसमुर्व्वशी सोपहासं जहौ।

एवं कथयन्त्यां मालत्यां माधवः पुनरपि चित्रान्तरं प्रदर्शयन् ब्रूते।
—इतः दृश्यताम्। अयं विभाण्डकसुतः ऋष्यशृंगः गणिकाभिः प्रलुभ्यते। पश्य तासामनावृतं वक्षः जघनञ्च। एषः दृशा दग्धः मदनः दृशैव सञ्जीवितः। पश्य, पश्य, एतानि बहूनि चित्राणि। एषा अहल्या देवराजं कुतूहलात् कामयते। अन्यानि तानि !

मालती यथोक्तं चित्रजातं सम्पश्यन्ती तृप्तिं नाप्नोति। सा पुनः पुनस्तर्कयति—केनाभिप्रायेणाहं माधवेन तस्य धर्म्मपत्नीति कथिता ? किं सेनानीप्रवञ्चनाय, उत गूढाभिप्रायेण। गौडीपानोन्मत्ता मालती कालक्षयमसहमाना ब्रूते सप्रगल्भम्।
—सत्यम्, अपूर्व्वं चित्रजातम्। आस्तां तावदिदानीं चित्रतत्त्वव्याख्यानम्। चित्राणां मर्म्मार्थो ग्राह्यः; आचरणीयश्चेति मे मतिः। किं त्रियामा शुष्कवार्तायामेवं व्यर्थतां यास्यति, उत सार्थकतां भजेत ?

माधवो जानन्नपि तस्या अभिप्रायं पृच्छति।
—कथमत्रभवती व्यर्थतां कथयति नाहं जाने। यदि सर्व्वं विस्पष्टं कथ्यते भवत्या तर्हि अयं मूढो जानाति। मन्दबुद्धित्वात् न मे सप्रतिभत्वम्।
—भो राजपुरुष ! मां भवतो धर्म्मपत्नीत्वेन ख्यापयतो भवतः कस्तावदभिप्रायः ?
—प्रथमतस्तावत्सेनानीप्रवञ्चनम्।
—अथ द्वितीयतः किम् ?

—एकत्र रात्रियापनम्। किं न ज्ञायते यद् दम्पत्योरेव एकत्र रात्रियापनं विहितम्, अन्येषां प्रतिषिद्धम्।

—किमवसितः प्रथमः कल्पः ?

—अथ किम्।

—तर्हि इदानीं किं द्वितीयः समायाति ?

—सर्व्वथा, नात्र संशयः कार्य्यः।

—तर्हि मयाधुना किं करणीयम् ?

—धर्म्मपत्नी भूत्वा सह-धर्म्माचरणं नाम।

—कतमः स धर्म्मः।

—'यौवनधर्म्मः' इति कथयति माधवे मालती तन्मुखं हस्तेनैकेन पिधाय स्मितमुखी तस्य नयने दृष्टिं व्यापारयति। माधवो हस्तेन मालतीहस्तं धृत्वा अपरेण कण्ठमालिङ्ग्य तस्या अधरं पातुं यावद् यतते तावन् मालती मुखं किञ्चिदपनीय विस्मितेव सान्तर्हासं कथयति।

—अपि स्मरसि, एवमुपक्रामस्त्वं मयि प्रपावेदिकायां दस्युभिर्विघ्नितः उपक्रमः।

कथं न स्मरामि। सर्व्वं स्मरामि यथा पुरन्दरेण निपीतः ओष्ठः, यथा वा तेन वेतसीतरुतले चैत्रक्षपासु··· । नात्र दस्यूनां प्रवेशोऽस्ति। अतो न विघ्नावसरः। तर्हि····

— भवतु, भवतु। किमधरास्वादे बलवती तृष्णा ?

—किं तदपि प्रष्टव्यम्। इत्युक्त्वा माधवो मालत्या रक्तोत्पलनिभम —धरं स्वीयाधरोष्ठे निवेश्य सुचिरं पिबन् जले वदरपाततुल्यं शब्दं कृत्वा त्यजति। ततो मालती पृच्छति।

—पौण्ड्रवर्द्धनादागत इति श्रुतम्। किमर्थं भवान् तत्र गतः ? कथं वा प्रत्यावृत्तः ? विश्रब्धं कथ्यताम्।

—वरानने ! यद्यपि गोपनीयं तथापि श्रूयताम् ! तुभ्यं किञ्चिदपि मम गोपनीयं नास्ति।

माधवो मालत्या नेत्रवक्त्र-विकारादिकं सुनिपुणं निर्वर्ण्यापि तस्याः स्वरूपं निर्णेतुमसमर्थः आत्मपरिचयप्रदानमुचितं न वेति जातसंशयो महद् वैकल्य-माप्नोति। सकुण्ठः स आत्मगतमेव विचिन्तयति। किमेषा अज्ञातकुलशीला विश्वासभूमिः ? कथं वा एषा अप्सरायमाना महिला प्रपापालने अत्मानं नियोज-यति ? किमेषा जीवद्भर्तृका, विधवा उत स्वैरिणी ? अथ किमियं कस्यचिद् राज्ञः प्रणिधिः ? तथा चोक्तं कौटिल्येन 'शिल्पवत्यः स्त्रियः····परापसर्पज्ञानार्थं

मुख्यस्थानेषु वासयेत् ।' किमेषापि वासिता तथैव केनचिद्राज्ञा राजमार्गे ? किं करोमि ? अकथने एषा विमनायते, कथने च प्रतिज्ञाभङ्ग इति उभयतः पाशारज्जू । एवं मनसा तर्कयन् यावद् माधवस्तूष्णीमास्ते तावत्तस्य भावन्तरमुपलक्ष्य मालती सकृतकाभिमानं ब्रूते ।

—अयि भोः कन्दर्पकोटिजित् ! कथं भवान् मौनी ? किमियं वराकी वचसा भवन्तमुद्वेजयति ? अथवा कायेन विरुद्धमाचरति ? अथवा मम साहचर्य्यं मनोऽनुकूलं न भवति चेत् तर्हि दूर तिष्ठामि । नाहमपराद्धुमिच्छामि । अलं विनिद्रतया, सुखं स्वपिहि ।

इत्युक्त्वा मालती स्मेरालसदृष्ट्या माधवस्य मुखं पश्यन्ती यावत् किञ्चिद् दूरम् अपसरति तावन् माधवस्तस्याः कण्ठाश्लेषं कृत्वा सुमधुरं कथयति ।

—सुन्दरि ! मैवं मन्तव्यम्, मैवं मन्तव्यम् । तव दर्शनात् प्रभृति अयं जनस्त्वामेव सकलभुवनसारभूतां मन्यते । इदानीं धरणीतलमेव अहं नन्दनं मन्ये न मन्ये वसुधातलम् । कथं न कथयामि तुभ्यम् । परमं शङ्के विरसो वृत्तान्तो नवनीतकोमलाङ्ग्यास्ततोऽपि सुकोमलं हृदयं विरसायते । भवतु यदि शुश्रूषा प्रबलतरा जागते तर्हि अश्लाघनीयोऽपि वृत्तान्तः श्रोतव्यः । 'अस्ति सकलभुवनसारभूतो देशानामुत्तमो देश उत्कलो नाम । तं देशं शासति मत्पितरि कदाचित् गौडाधिपः शशाङ्कः चतुरङ्गबलेन तं विजितवान् । हतो मम पिता रणे ! कुमारोऽहं शशाङ्केनानीतो गौडदेशम् । ततश्चाहं तत्रैव संवर्द्धितः । इदानीं राजकार्ये नियुक्तः ।

—तर्हि अहमिदानीं पट्टमहिषी संजाता ।

इत्युक्त्वा मालती माधवस्य क्रोडे आत्मानं विस्तार्य्य अर्द्धशयाना बाहुभ्यां कण्ठमावेष्टय चुम्बितुकामा हास्योज्ज्वलनयना स्मेरकटाक्षेण तिष्ठति । तया दृढमाश्लिष्टो माधवः सव्येन हस्तेन तस्या आबाहुमूलाद् उरः परिमार्ज्य दक्षिणेन पाणिना मुखं किञ्चिदुत्तोल्य ललाटालक-कपोल-नयन-वक्षस्-स्तनोष्ठ-मुखेषु वारं वारं चुम्बन्नास्ते । माधवो यथा यथा चुम्बति तथा तथा प्रतिचुम्बितेन मालती रागं वर्द्धयन्ती निमीलितनयना क्षणं तिष्ठति । माधवो यथा आत्म-सचेतनत्वं जहाति यथा च सर्व्वं स्ववृत्तान्तं यथार्थतः कथयति तथा मालती यतते । पात्रात् चशके मदिरां गृहीत्वा तं पुनः पुनः पाययति ।

ततो माधवः कथयति ।

—अयि लावण्यवति ! तव रूपमदिरयैव नितरां मत्तः मा तावत् पानीयं बहुशो देहि । नैतत् शास्त्रकृद्भिरनुमन्यते । 'पानादर्थश्च कामश्च धर्म्मश्च परिहीयते' इति गीतं महर्षिणा वाल्मीकिना । अन्यच्च........।

पानयोगाच्च निवृत्तलज्जा मालती असमाप्तवाक्यं माधवं निवार्य्य सपरिहासं ब्रूते ।

—अहो पाण्डित्यं वाचोयुक्तिश्च। एकदेशदर्शित्वं न शोभनम्। किं रामायणे न पठितमादिकविना वर्णितं सुराप्रदानम् ? कालिन्दीमध्यगतया सीतया निर्विघ्नंसमुत्तरणाय कालिन्द्यै सुराघटप्रदानं प्रतिश्रुतम् 'यक्षे त्वां···· सुराघट-शतेन च' इति। अत एव मनुनोक्तम्—

'न मांसभक्षणे दोषो न मद्ये न च मैथुने'

मांसभक्षणं पूर्व्वमेवावसितं, मद्यपानं तु प्रवर्त्तते। मैथुनं प्रारभ्यत इति वात्स्यायनेनोक्तं चुम्बनद्यूतं प्रवर्त्तयितुमिच्छामि, रोचते चेद् भवते ?

—द्यूतस्य स्पृहयामि, विशेषतः सुन्दर्य्याः चुम्बनद्यूतस्य। ननु जिज्ञास्यते कस्तावत् पणबन्धः ?

—पराजयं स्वीकृतेन जयिने चुम्बनशतं प्रदेयम्। एषः पणबन्धः किं तव रोचते ?

—सर्वथा रोचते यदि क्षीर-नीरालिङ्गनसनाथं स्यात्।

—कथं न भवेत्। स एव दशस्मरकर्म्मसु क्रमः।

—कानि तानि दशस्मरकर्म्माणि। एकेनैव स्मरकर्मणा अन्यानि तिरोहितानि।

—न तिरोहितानि। सर्व्वाणि तानि 'अहं पूर्वम् अहं पूर्व्वं' मिति परागतिष्यन्तीदानीमेव।

—अयि मदालसे ! स्मारय तानि कायेन वचसा।

—प्रथमं तावद् वचसा स्मारणं भवतु—

आलिङ्गनं चुम्बनं दन्तकर्म्म नखक्षतं सीत्कृत-पाणिघातम्।
सम्वेशनं चोपसृतोपरिष्टं नरायितं चेति दशाङ्गमाहुः॥

ततस्तयोः मदिरामत्तमानसयोः प्रवृत्ते चुम्बनद्यूते मालती सपदि 'मया जितं मया जितं पाणी मह्यं देयः, मया आदेयः' इति सार्द्धरुदितं करविधूननेन मुहुर्मुहुः तं चुम्बयन्ती भृशमाकुलीकरोति। ततोऽनु उरुव्यत्यासं भुजव्यत्यासञ्च घनं सस्वजमानौ परस्परमनुविशत इव यावत् श्वसितौ वर्तेते तावन् मालती श्लक्ष्णेन वचसा मधुरतरं पृच्छति।

—अयि कन्दर्परूपोज्ज्वल ! तवाश्लेष-निपीडिताहं प्रकृतं विस्मृता। न श्रुतं सावशेषम्। किमस्मिन् जने न विश्वासः यदर्द्धकथिते एव स्ववृत्तान्ते विरतः ? किं नाहं विश्वासभूमिः? यदि तावद् गोपनीयं तर्हि न प्रकाशनीयम्। अपि चेद् गोपितव्यमिति कृतसमयस्त्वं तर्हि एतज्जनस्य कृते शपथो न लङ्घनीयः। क्वाहं वराकी क्व च शपथः ? आस्तां तावत्।

इत्युक्त्वा यावन् मालती पुनरपि चुम्बनाश्लेषैः चन्द्रोदयः समुद्रमिव माधवं भृशमाकुलीकरोति, तावत् 'प्राणात्ययेऽपि गूढपुरुषैः राजनिदेशो न प्रकाशनीय'

इति समयं स्मरतः कथितुकामस्यापि सहसा वाक्यं न निःसरति मुखात्। अकथने च सर्व्वं विपर्य्यस्तं स्यादिति कथयति।

— अयि रतिनिपुणे! मा मा एवं वद। मम हृदयनिकृन्तनं मा कुरु। त्वमेव जगतीतले विश्वासभूमिः। त्वया पूर्व्वमेव हृदयं प्रविष्टमिति मर्म्महृदये स्थितायाः किं गोपनीयमस्ति? गौडाधिपेन राज्ञा शशाङ्केन ·· ····

तत् सर्व्वं जानामि राजकार्य्ये नियुक्तोऽसि। मम जिज्ञासा तावत् किं तत् कार्य्यम्? केनोपायेन तत् साधनीयम्?

—शृणु, सर्वं कथयामि। शशाङ्केनाहं परराष्ट्रस्य बलाबलज्ञानाय प्रेषितः।

माधवे एवं कथयति मालती हृद्गतं चिन्तयति।

— अयं शशाङ्कप्रणिधिः? यन्मया शङ्कितं तदेव भूतार्थतां गतम्। भवतु, अद्य मे सफलं जीवनम्, यदर्थमहं नियुक्ता तदधिगतम्। अनेन किमासादितं किं वा कृतमिति सर्वमज्ञात्वा मालती नैनं मोक्षयिष्यति।' प्रकाशं ब्रूते।

—कोऽसौ अरातिः?

—अरातिः खलु प्राग्ज्योतिषाधिपतिः।

— अथ प्राग्ज्योतिषं गतवान् त्वम्?

—अथ किम्। तत एवेदानीं प्रत्यावृत्तो गौडराजधानीं गच्छामि।

—त्वया तु कथितं पौण्ड्रवर्द्धनादागत इति।

—यथा त्वं मम धर्मपत्नी तथैवैतत्।

—श्रूयते प्राग्ज्योतिषपुरं खलु गिरिदुर्गसमाकीर्णं पारेलौहित्यम्। अपि सत्यं गतवान्, अथवा सर्वमुपन्यासः?

— कथमुपन्यासः, सर्वं भूतार्थमिति। यदि प्रमाणमपेक्षते तर्हि प्रमाणानि सन्ति नागदन्तावलम्बितायां पेटिकायाम्।

—नहि, नहि, न मया प्रमाणमन्विष्यते। भवानेव अत्र प्रमाणम्।

—तर्हि श्रूयताम्। प्राग्ज्योतिषपुरेषु नरकान्वयसम्भवः कुमारभास्करवर्म्मा विराजते। सः खलु कर्णसुवर्णविजयाय यतत इति चारमुखाद् ज्ञात्वा गौडाधिपस्तस्य यानासन-द्वैधीभावानां स्वरूपज्ञानाय मां तत्र प्रेषितवान् ····

इतः परं माधवेन यत् कथितं तस्य वर्णोऽपि मालत्याः कर्णकुहरं न प्रविशति। कुमार-नामश्रवणादेव मालती तडित्स्पृष्टेव शिथिलीकृताश्लेषा भवति। स्मरणानुभवैर्विरहविद्वेषादिभिर्भावैः युगपदभिभूता मालती स्वात्मगतं कथयति। किमयं हतकः स्नेह-करुणैकनिधानं कमनीयकान्ति कुमारं जानाति? किमनेन तस्य विपत्तिः कृता? नायं प्रभवति तस्यानिष्टसाधने। ·· अहो, अकरुणेन

विधिना विडम्बितोऽहं विरहदुःखं दिवारात्रमनुभवामि। न जाने कियान् कालो व्यतीतः तमहं न पश्यामि। कष्टम्, कुमारविहीना चन्दनवृक्षच्युता लतेव क्लेशेन दिन-यामिन्यौ यापयामि। कुमारेण दृढमालिङ्गिताया ममाधरो यदा तस्याधरोष्ठे विलीयते··· यदा च तेन कण्ठाश्लेषपूर्वकं पाणिना मम नीवीबन्धः···· आः नाहं स्मरामि ततः। अहो सर्वं विस्मृतप्रायम् नियुक्तास्मि कुमारेण परविषये सामदानाभ्यां कृत्याकृत्यनिरूपणे। अत एव प्रपापालिका भूत्वा अन्यान् गूढपुरुषान् भीतवर्गाणां लुब्धवर्गाणां मानिवर्गाणां च चेष्टितं ज्ञापयामि। परप्रणिधीनां गमनागमनं च जानामि। ······ एवं विचिन्तयन्त्या तया स्थानकालपात्राणि विस्मृतानि। कुमारदर्शनेच्छया गन्तुकामेव यावन् मालती शयनादुत्थातुमिच्छति तावन् माधवेन दृढमालिङ्गितामात्मानं विदित्वा जुगुप्सया क्रोधेन क्षोभेण च व्याकुलिता भवति। पदाघातेन माधवं दूरीकर्तुं चिकीर्षति। तथापि प्रयोजनमुद्दिश्य चिन्तयति।

'क्व कुमारः क्व चायं वदेशिकहतकः? कुमारैकजीविताहं गूढपुरुषेणालिङ्गिता रतिसुखमनुभवामि। अहो महत् कष्टम्! तस्य कृते एव सर्वं स्वीकरोमि, स्वैरणीव चरामि। मम काय एवात्रापराध्यति न चरित्रं न वा मनो व्यभिचरति।' एवं तर्कयन्ती मालती महता यत्नेन आत्मानं संयम्य तिष्ठति। तां तथाविधां शुश्रूषाविमुखीं विमनस्कां शिथिलीकृताश्लेषां समालोक्य माधवो साश्चर्यं ब्रूते।

—सुन्दरि! किमिदमापतितम्? अपि ते शुश्रूषा तिरोहिता? अथवा वृत्तान्तस्तिक्तायते? कथं प्रारब्धासु सुरतक्रियासु मन्दादरेव परिलक्ष्यसे त्वम्? चेदेतत् क्षीर-नीरालिङ्गनं वेदनां जनयति तर्हि सौवर्णनाभोक्तमन्यत् आचरामि। कथय तव अभिमतोपगूहनम्।

—अयि नागरोत्तम! महती मे शुश्रूषा। परं चिन्तयामि, कथं शशाङ्कप्रणिधिः प्राग्ज्योतिषपुरं गतवान्, कथं वा सीमान्ताध्यक्षैरलक्षितः प्रत्यावृतवान्? यदि तावत् केनचिद् रक्षिणा परिज्ञायेत, तर्हि

—तर्हि मम स्कन्धात् शिरो विछिन्नमभविष्यत् ······ ····

—न खलु, न खलु कथनीयम्। स्मरणमात्रेण वेपते मे हृदयम्। हस्तपादं शिथिलं जायते। शान्तं पापं शुभं भवतु। ननु, कथमपरिज्ञातः प्राग्ज्योतिषविषये भवान् आसीत्?

—देशान्तरादागतः रत्नवणिगिति कृत्वा। तदर्थं मया शुल्काध्यक्षादभिज्ञानं लब्धम्।

—यदि किञ्चिदन्यथा न मन्यते तर्हि पृच्छामि—शशाङ्कप्रणिधिः इत्यत्र किं प्रमाणम् ।

—अपि तदपि प्रष्टव्यम् ? पश्य, एतत्' इति माधवः शशाङ्कनामाङ्कितमंगुलीयकं तस्यै दर्शयति । अंगुरीयकं दृष्ट्वा कथमेतद् हस्तगतं करोमीति सा माधवं नोदयति ।

—अपि पत्न्यै अंगुरीयकप्रदानप्रथा गौडानां नास्ति ?

सर्वथा विद्यते ।

—तर्हि कथं न दीयते अंगुरीयकम् अन्यै धर्मपत्न्यै ? अथवा कापट्यं सर्व्वम् ।

—मा····मैवम् । रसातलं यातु कपटी कापट्यश्च । मा पुनः पुनः निर्दयभाषणेन निधुवनविरसतां कुरु ।

—तर्हि दीयताम् ।

—ददामि, दास्यामि, कात्र त्वरा ?

ततो मालती माधवस्य सांगुरीयकमगुलीं सन्मुखमानीय स्मितहास्येन कथयति ।

—'कियद् मनोरमं हीरकखण्डम् ? नीले नभसि नक्षत्रमिव देदीप्यते । रोचते मे भृशम् ।' इत्युक्त्वा मालती तस्य अङ्गुल्या अंगुरीयकमुन्मोच्य स्वांगुल्यां पिदधाति । माधवो भृशं शङ्कितोऽपि तां निवारयितुमसमर्थो व्याकुलं पश्यति । मालती तस्य मनोभावं परिज्ञाय सान्तर्हासं क्षुद्येव ब्रूते ।

—यदि तावद् एतदंगुरीयकं कस्यैचिद् गौडसुन्दर्य्यै प्रतिश्रुतं, तर्हि नाहं मनोवेदनाकारणं भवामि । दीयतां स्वप्रियायै । तां संस्मरतः अन्यां रमयतस्तव धूर्त्ततां जानामि । एहि प्रतिगृह्यताम् इति कथयन्ती यावन् मालती स्वांगुलीतः अगुरीयाकर्षणं नाटयति तावन् माधवो निर्भराश्लेषेण तस्याः पीनोन्नतौ स्तनौ वामनीकृत्य सखेदं ब्रूते ।

—राजनामाङ्कितमंगुरीयकं राज्ञा अभिज्ञानार्थं प्रदत्तम् । अंगुरीयकप्रभावेण मम गतिः सर्व्वत्र अनिरुद्धा । कार्य्यशेषे पुनः नरपतये प्रदातव्यमंगुरीयकम् । अत एव चिन्तयामि, नान्यत् कारणं विद्यते ।

—आं ज्ञातम् । परम् अद्य रात्रौ तु न प्रत्यर्पयिष्यति, काल्यं प्रदेयम् । तिष्ठतु ममांगुल्याम् अगुरीयकमाप्रभातम् । किमेतदपि प्रतिषिद्धम् ?

—एवमेव मन्तव्यम् । यथा तथा वा भवतु । इदानीं तवांगुलीम् अंगुरीयकमलंकरोतु ।

—तर्हि यथार्थत इदानीमहं तव धर्म्मपत्नी सञ्जाता।
— ननु, प्रागेव।
—अतः परं तर्हि कामार्थं पत्नीति मन्तव्यम्।
— मालती कथयति।
—आम् एवम्……मदविह्वलं प्रत्युत्तरं ददाति माधवः।
—कामात् परः किम्?
पुनरपि पृच्छति सा।
—ननु मोक्षः, मोक्षार्थं पत्नीति कथनं युज्यते।
'कथं' माधवः पृच्छति।
—'नीवीमोक्षो हि मोक्षः' इति किं न श्रुतम्?
—'न केवलं श्रूयते, अवबुध्यते, आचर्य्यते च। अन्यथा अश्रुतस्य कथं नीवीमोक्षाय ममेदानीं प्रयत्नो भवेत्' इत्युक्त्वा माधवो मालत्या नीवीमोक्षं करोति।

तस्य हस्तावरोधं कृत्वा मालती सहासं कथयति।

—ज्ञायते, अधीति-बोधाचरणैः खलु भवान् कृती। यथाधीतं यथा ज्ञातं तथैवाचरणं दृश्यते। भवतु। किं ज्ञातं किं वानीतं प्राग्ज्योतिषपुरतः?
— 'किं पुनः पुनः गौड-प्राग्ज्योतिषपुरकथया अकाण्डप्रथनेन स्मरसङ्गरं सप्रतिघत्वं करोषि? आस्तां सा कथा। प्रस्तुतमाचर। ननु दशस्मरकर्म्मसु चुम्बनाश्लेषानन्तरं किम्? तवाधरसुधापानेन मत्तः क्रमो विस्मृतः। स्मारय कायेन कर्म्मणा। अन्यथा व्युत्क्रमेण कामं कामं सेयमानो ग्रामीण इव भवामि' इति माधवः कथयति।
मालती ब्रूते।
—क्रमस्तावद् रसातलं गच्छतु। यदेव रोचते तदेव आचरणीयम्। आत्मनस्तुष्टिरेव अत्र प्रमाणम्। भवतु सुवर्णनाभोक्तं स्मारयामि।

शास्त्रस्य विषयस्तावद् यावन् मन्दरसा नराः।
रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः॥

अस्मिन् मत्कण्ठाश्लेषप्रणयिनि जने तु मन्दत्वस्य नामापि नास्ति, खरवेगत्वं चण्डत्वमेव मूर्द्धानमधिरोहद् वर्त्तते। अतः वर्द्धितराग एव प्रमाणम्।

माधवो विमूढ इव पृच्छति।

—आं, बुध्यते। एका मम महती शङ्का—'नरा' इति पुरुषबहुत्वं प्रोक्तम्, अयं खलु वराक एकाकी। तर्हि किं……

तं निवार्य्य सा विहस्य ब्रूते।

—अहो प्रतिभा ! अलमाशङ्कया। 'वसन्ते कपिञ्जलान् आलभेत' इतिवदत्र न पुरुषबहुत्वं विवक्षितं मन्दरसाभावत्मेव।

—कदा अमन्दरसत्वं जायेत ?

—अधुनैव अस्मिन् भवल्लक्षणे जने अमन्दरसत्त्वं चुम्बनात् प्रभृति वरीवर्ति।

—अथ चेद् व्युत्क्रमे 'नरा' अपेक्षन्ते ?

—तर्हि अयं जनः बहुत्वं भजेत।

— कथम्।

—यथा अर्जुनस्य एक एव शरः सन्धाने दशधा भवति, तथा एकोऽपि भवान् रतिसङ्गरे दशपुरुषान् अतिशयीत।

—कथमनुमीयते ?

—ननु साधनोपक्रमाभ्याम्।

—हेतुसाध्ययोरव्यभिचारित्वमस्ति किम् ?

·······प्रस्तुतं विहाय मालती पुनरपि पृच्छति।

—आं स्मरामि ! प्राग्ज्योतिषपुरात् किमधिगतं न कथितम्।

—मा पुनः पुनः कथान्तरेण प्रकृतान्तरायं कुर्य्याः। नाहं कालहरणे क्षणमपि समर्थः।

—इतः परं किञ्चिदपि न पृच्छामि। एतावन्मात्रे कथिते यथारुचि स्मर- कर्म्मसु आत्मानं नियोजयावः।

—सत्यम् ?

—सत्यं वदामि।

—शृणु, प्राग्ज्योतिषपुरस्य जल—दुर्ग—गिरिदुर्गाणां राजान्तःपुरस्य आयुधागारस्य च मानचित्राणि समधिगतानि। हस्त्यश्व-रथपादातिकस्य बलानां परिमाणं यच्चान्यत् समरसाधनं विद्यते तत्सर्व्वं परिज्ञातम्। महामात्राणाममात्यानाञ्च आनुकूल्यं प्रातिकूल्यं च परिलक्षितम्, सङ्केतलिपिरपि समासादिता। अपि परितृप्ता जिज्ञासा ?

—अथ किम्। ननु कुत्र तानि मानचित्रादीनि ?

—पेटिकायां मानचित्राणि, उष्णीषाभ्यन्तरे सङ्केतलिपिः। आः ! नातः परमेकाक्षरमपि वक्तुं समर्थः। महती रिरंसा मां भृशं बाधते। नाहं क्षणमपि वृथा यापयितुं समर्थः।

—न खलु, न खलु वृथा यापयितव्यम्। क्षणं सफलं कुरु।
—तर्हि कथं विलम्बसे ?
—असहिष्णुर्माधवः पृच्छति।
—'नाहं विलम्बना, परम् उत्तानशयाना तिष्ठामि'—पानयोगाद् विगतत्रपा मालती सभ्रूभङ्गं द्व्यर्थकत्वेन कथयति।
—किं तर्हि उत्तानशायितमेव एतद्देशप्रसूतानां ललनानां प्रियम्? माधवो जिज्ञासति।
—किमेतद् गौडजनाय न रोचते? तर्हि कथय, कतरत् संवेशनमनुतिष्ठामि? सम्पुटितं जृम्भितकं वा। अस्ति मम महत् कौतूहलं गौडजनेषु—कथं ते सुरतेषु प्रवर्त्तन्ते इति।
—कथमेतत् कौतूहलम्?
—माधवः पृच्छति।
—स्त्रीप्रकृत्या। देवराजकुतूहलादेव अहल्या इन्द्रम् चकमे।
—तर्हि किमिदानीं त्वमपि अहल्यायसे?
—नहि। इन्द्राणी भूत्वा इन्द्रं कामये।
—तर्हि ऐन्द्राणिकमनुष्ठातव्यं त्वया।
—ऐन्द्राणिके कृताभ्यासा शक्नुयां तदनुष्ठाने। परं तु प्रयोजनाभावः।
—प्रयोजनमस्ति न वेति इदानीमेव जानासि।
—माधवो ब्रूते।
—वेणुदारितकम्······ नहि नहि न रोचते।···· ····वराहघातः ············ यथेष्टम्····· हुम्······हुम् मा ··मामति भवतु ······ एतदेव ·। शौनम् ······ ऐणेयम् ··आश्वम् रोचते ··· स्पृहयामि ····· एवं मालती अस्पष्टम् व्यक्तमव्यक्तञ्च ब्रूते।
—किं देशसात्म्यमनुष्ठास्यामि?
यथाभिरुचि ·अहो शोभनमिदम् प्रियम् ··। ·· गौडानामिदं सुकुमारतरम्······
—किमन्यदिच्छसि किमधः··· ?
—नहि नहि ·· तद्दाक्षिणात्यानामेव····दीयताम्·······गृह्यताम्····।
– जानामि पुरुषायितमिच्छसि? मह्यमपि रोचते तत्। स्वैरं यथासुखम्···· माधवो ब्रूते।
—आम्·········एवम्··········कथम्? नाहं नाहं मोक्ष्यामि·········· तिष्ठ ······· किम्? अलम्··········अलम्? नालम्···········इति मालती स्खलितधम्मिला

भ्रष्टहारा विस्रस्तवसना घर्माम्भःपूरिततनुः सहासं कथयन्ती माधवं पर्य्याकुली करोति। माधवोऽपि यथाकालमाचरन् तामानन्दयति।

अथ यामेषु गच्छत्सु त्रियामा क्षीणतां गता, न तयोः रिरंसा। विलुप्तः अधररागः, न तु रतिरागः। नूपुराणां वलयानां च शिञ्जनी श्रुता न वैखरी वाक्। कृत्रिमरुदितं श्वसितेन व्याहतम्, न तु रतिसङ्गरः। एवं क्रमेण व्युत्क्रमेण च कामं सेवमानयोस्तयोः अभिनव एव उपक्रमः········।

अथ प्रभातप्रायायां रजन्यां रतिश्रान्ते च माधवे निर्भरं प्रसुप्ते मालती तस्यालिङ्गनान् मुक्ता शनकैरुत्थाय नागदन्तात् पेटिकामानयति। पेटिकातः मानचित्राणि गृहीत्वा उष्णीषाभ्यन्तराच्च सङ्केतलिपिम् आदाय वस्त्रेण तानि समाच्छादयति। ततश्च माधवस्य गात्राद् द्रापिमधोवासश्च द्रुतं लघुहस्तेन अपनीय वस्त्रान्तरेण तदाच्छादयति। तदनु सा स्वीयवासांसि विहाय माधवस्य द्रापिमधोवासश्च परिधाय चिकुरान् द्विफालबद्धान् मस्तके कुण्डलीकृत्य तस्योपरि गैरिकमुष्णीषं दृढं बध्नाति। कुड्यस्थे मुकुरे आत्मानं सन्दृश्य सान्तर्हासमात्मगतं कथयति। 'पुरुषायितात् परमहमिदानीं भूतार्थतः पुरुषायते। पुरुषाधोवासेन द्रापिणा उष्णीषेण च अहं सत्यं पुरुषः।' वक्षाजौ विलोक्य चिन्तयति—'किमेतयोस्तुङ्गत्वं जनानां दृष्टिमाकर्षयेत्? कथमेतद् गोपयामि? भवतु, उत्तरीयांशुकं श्रमणवत् परिधाय पीनोत्तुङ्गत्वं वक्षोजयोरप्रकटितं करोमि।' तथा कृत्वा पुनरपि आत्मानं विलोक्य ब्रूते—नेदानीं कोऽपि मां स्त्रियं कथयेत्। किञ्चिद् विहस्य कथयति—'एतेनांगुरीयकेन मालती माधवः सञ्जातः। महिष इव अयं बालिशः स्वपितु।' इत्येवं विचिन्त्य सा स्वीयवस्त्राणि पेटिकायां कृत्वा बहिर्जिगमिषति। ततः शयनीयैकपार्श्वे स्थितमसिं दृष्ट्वा चिन्तयति—'एषः सकोषः असिः मया धारणीयः। ततः सैनिको भवामि सेनानीर्वा स्याम्।' ततः सा शय्यातः शनकैरसिं गृहीत्वा चर्म्मरज्जुना कटिं वेष्टयित्वा कोषं बध्नाति। असिं पुनरपि हस्ताभ्यां धृत्वा स्तौति।

असिर्विशसनः खड्ग धर्म्मपाल नमोस्तु ते।
पाहि मां सङ्कटान् नित्यं शत्रुं नाशय सर्व्वदा॥

एवं पुरुषवेशधारिणी मालती उषसि अतिथिशालाया निष्क्रान्ता। तां दृष्ट्वा द्वारपालो यदा पृच्छति 'कस्त्वं कुत्र वा त्वया गन्तव्यमिति' सा हस्तस्थितमंगुरीयकं तस्मै दर्शयति। अभिज्ञान पश्यन् द्वारपालस्तां नमस्कारेण तोषयित्वा मार्गं दर्शयति। मालती द्रुतं तस्माद् दूरं गच्छति केनापि अलक्षिता।

८

कतिपयैरेव दिवसैः स्तोकेनानुयायिना अनुगम्यमानौ सुप्रतिष्ठितभास्करवर्माणौ प्राग्ज्योतिषपुरं सम्प्राप्तौ। प्रजाभिः प्रकृतिपुरुषैश्च अभिसंवर्द्धितौ तौ कुमारौ स्वीयनगरं प्रविष्टौ। शत्रुभिर्नीयमानौ कुमारौ दिष्ट्या शत्रून् पराभूय प्रत्यावृत्ता-विति नरपतिवियोगशोकेन मुह्यमाना अपि नगरनिवासिनो नरा नयनान्दकरौ अश्विनीकुमाराविव तौ दृष्ट्वा भृशं नन्दन्ति। परं सपद्येव तयोर्ज्येष्ठं सुप्रतिष्ठित-वर्माणं बाणाहतं बलवदस्वस्थं ज्ञात्वा परं विषादमाप्नुवन्ति हर्षोत्फुल्लाः प्रजाः।

'अहो दैवहतकेन किमिदं कृतम्? कथमिदानीं भविष्यति राज्यम्? का गतिर्भवेत् प्रजानाम्? प्रबलारातीन् को बाधेत? कः करिष्यति दस्युभ्यो राज्यरक्षाम्? नूनं राजापथ्यकारिणः प्रबला भवेयुः।' एवं बहुशो विलपन्ति जनाः सोद्वेगम्।

तान् कथमपि सान्त्वयन् प्रधानामात्यार्यगुणः सुप्रतिष्ठितवर्माणं नाययति सेवकैः शुश्रूषार्थं समुद्रगृहम्। भास्करस्तु नरपतिनिधनव्यतिकरं बलवदस्वस्थञ्च भ्रातरं विलोक्य भृशं समुद्विग्नो जातः। कथं कथमपि धैर्य्यमालम्ब्य शोकसन्त-प्तोऽपि स कालोचितकरणाय प्रधानराजपुरुषैरार्यगुणप्रमुखैः मन्त्रयति। न कोऽपि वीक्षते पृच्छति वा माधवीं कुशलाकुश ादिकम्? का सा, कुतो वा आगतेति। अन्तर्वंशिकस्तां कुमारानुगामिनीं विज्ञाय प्रापयति चेटिकाभिः कन्यान्तःपुरम्।

'कुतस्त्येयं कन्या अप्सरोविनिन्दिता' इति सकुतूहलं तर्कयन्तो राजावरोध-सेवकाः समादिष्टा अन्तर्वंशिकेन स्थापयन्ति तां कन्यान्तःपुरकक्षे। नियुक्ताश्च नयनिकाप्रमुखा कन्यकास्तस्याः सेवार्थं कञ्चुकिना।

अपनीते पथश्रमे स्नानानुलिप्ता माधवी क्षणं प्रतीक्षते कुमारदर्शनाय। कुमारस्तु 'अराजकं राज्यं सर्वथा रक्षणीयम्' इति चिन्तापरो दिवसं रजनीमपि न जानाति कार्यव्यापृतहृदयः। अहर्निशं ध्यायन्नपि न स प्रभवति माधवी-समीपं गन्तुम्।

इतश्च कन्यान्तःपुरे सेविकाभिरुपचार्यमाणा माधवी 'कदा कुमार आग-मिष्यति कदा सा तं द्रक्ष्यति' इत्येवं चिन्तयन्ती प्रहरं यापयति। कुत्र सा कुत्र कुमार

इदानीं तिष्ठति—सा न जानाति। अनभ्यस्ततया राजान्तःपुरवासस्य माधवी न जानाति किं करणीयमिति। 'कुत्र कुमारः, कदा स कन्यान्तःपुरमागमिष्यति' इति प्रष्टुमपि लज्जया नियमेन भीत्या चासमर्था माधवी व्याधहस्तगता कुररीव विचेष्टते।

भोजनानन्तरं शय्यायां शयाना सा चिन्तयति भृशमुद्विग्ना। 'किं शोभनं कृतं मया? किं मम प्रतिश्रुतिभंगदोषान् निरयगमनं न भवेत्? महाकालाय समर्पिताहं देवस्वामिना। तेन प्रतिश्रुतं मम महाकालवधूत्वम्। परं तस्य प्रतिश्रुतिर्मया विघ्निता। नूनं महाकालः क्रुद्धो भवेत्। ततः····! असमाप्तव्रताहं परित्यज्य महाकालं, अविगण्य देवस्वामिनं, समुल्लंघ्य पारम्परीणां रीतिं, देवं हित्वा कुमारप्रणयिनी जाता, समागता च विदेशम्। देवरोषात् क इदानीं मां रक्षेत्। किं सञ्जीवयिष्यति कुमारः प्रेम्णा मृतकल्पां माम्? अथ चेत् कुमारो वीतस्पृहो जायेत? यदि मयि नानुरक्तं तस्य मनः? तर्हि····? कथमिदानीमपि कुमारो मां न पश्यति। इदानीमपि नायाति कथम्। निशीथो जातः। किं क्रियते निशीथे तेन। यदि स नागच्छति? किं करणीयं मया? कथं छिन्नमूला लतेव जीवामि?'

इत्येवं बहुशो विचिन्त्य सा कथञ्चिदपि कुमारवार्तां पृच्छति सेविकाभ्यः। सेविकास्तु तद्वाक्यं निशम्य सोपहासं ब्रुवन्ति।

—भट्टारिके! किं समुत्कण्ठते ते चेतः? जानीमो वयं तव हृद्गतम्। मातिचिन्तनेन। सुखं स्वपिहि। स्वप्ने नूनं तस्य दर्शनं भवेत्। कन्यान्तःपुरे न कस्यापि प्रवेशोऽसूचितो भवितुमर्हति। यथाकालं सूचितो भवेत्। नियमानभिज्ञतया त्वया पृष्टमसदृशम्। बहुवल्लभा हि राजानः। सानुकम्पा हि राजानः प्रत्यहं कन्यामेकैकां सभाजयन्ति स्नानानुलिप्तां स्निग्धाम्। कुमार-भास्करवर्मदेवस्तु राजकार्यव्यापृतो दिवसं रजनीं च न जानाति स्नानभोजनादिकमपि विस्मरति स्मरति केवलं राज्यचिन्तनम्। विशेषतो बाणाहतो ज्येष्ठो मृत्युशय्यायां शयानस्तिष्ठतीति श्रूयते। भवतु कालं प्रतीक्षस्व। यथाकालं समागमो भविष्यति। स्नानप्रसाधनैः सुवेशां

कुमारः प्रेम्णा द्रक्ष्यति त्वाम् । सुखं स्वपिहि यामिन्यामद्य । किं रोचते शय्या ते ? स्मरकर्मसु विदग्धतां तव शय्येयं प्रत्यक्षीकरिष्यति । किमभिमता तव ? अथवा किं शय्यया । हृदयङ्गमो यदि पतिरवनीतलमेव साधु । हृदयङ्गमः कुमार इत्यत्र भवत्येव प्रमाणम् । किं जल्पनेन बहुना ? योग्याया योग्यसमागमो विधिना विहितः ' मा माति शंकया···· ।'

इति सान्तर्हासाः कन्यकाः कथयन्ति ।

अथ निशीथे माधवी स्वप्नायते ।

हिमाद्रेः सानुदेशे स्फटिकाश्मालये सुरम्यं तपोवनं विचित्रपुष्पवल्लीभिः प्रफुल्लकुसुमितद्रुमैश्च सुशोभितम् । प्रफुल्लपङ्केरुहैर्नीलोत्पलैश्च विराजितं सरः । कलनादं कुर्वद्भिः सारसैर्हंसैश्च व्याप्तं सरः । सरस्तीरे नातिदूरे अप्सरोभिः किन्नरीभिश्च सह देवा गन्धर्वाश्च नृत्यन्ति । हावं भावं च प्रकटयन्त्यस्ताः स्त्रियो नरीनृत्यमानाः रिरंसां ज्ञापयन्ति । कोकिलकुहुराविते भ्रमरगुञ्जिते तस्मिन् तपोवने स्फटिकशिलाखण्डे ध्याननिमीलितनयनो जटाजूटेन धूर्जटिः पाषाणलिंगादाविर्भूतो विराजते । दूरे च्युतवृक्षतले साचीकृतचापो मदनः महादेवं शरव्यं कृत्वा तिष्ठति । हस्ताभ्यां मालतीमालां गृहीत्वा माधवी हरस्य कण्ठे यावदर्पितुकामा हस्तौ प्रसार्य सम्मुखीभवति तावद् हरोऽपि उन्मीलितनेत्रो माधव्या मुखाम्भोजे बिम्बफलाधरोष्ठे विलोचनानि व्यापारयति । हरं तथाविधं दृष्ट्वा 'नायं महाकालः पाषाणखण्डः । मूर्तिमान्नेषः । ममाकूतिर्मोघा न भवति । विग्रहवान् एष इदानीमेव मामाश्लिष्यति, चुम्बनेन मामाकुली करिष्यति । एष मे दयितः' इति हर्षोत्फुल्लनयना प्रकटितकामा माधवी यावन् मालामर्पयति तस्मै तावत् सा कुमारं पश्यति तत्स्थाने । तस्यैव गले मालामर्पयति न हरस्य । महाकालः पाषाणखण्डे विलीनः । कुमारं दृष्ट्वा सा सहसा 'एह्येहि कियान् कालो व्यतीतः । न दृष्टोऽसि····एहि निर्भराश्लेषेण मां वक्षोविलग्नां कुरु—एहि' इति स्वप्ने शून्ये हस्तौ प्रसार्य क्षणं तिष्ठति । ··· क्षणादेव सुप्तोत्थिता कुमारदर्शनाकांक्षिणी तमपश्यन्ती बाहू वितत्य धावनाय यतते ।

तां तथाविधां दृष्ट्वा सेविका निवारयन्ति गमनात् ।

अहो मया स्वप्नायितमिति सा कथमपि स्वस्थतां गता ।

अथान्येद्युः समुपस्थितायां सायाह्नस्नानवेलायां धात्रेयिकापुरःसराः कन्यका माधव्या नृत्यव्यायामेन अमांसलं गात्रं प्रथमं हरिद्राचूर्णेन सम्मार्जयन्ति । ततश्च हैयंगवीनेन लिम्पन्ति । ततश्चौषधिनिर्यासमिश्रितेन तैलेन सम्मार्ज्य नयन्ति तां स्नानागारम् । कर्पूरवासितजलेन तां स्नापयित्वा कवोष्णजलेन सिञ्चन्ति ताः ।

स्नानकाले माधव्याः पीनोत्तुगत्वं स्तनयोः जघनयोः स्थूलत्वं जघनसन्धौ कूर्मपृष्ठत्वम् उदरस्य च क्षीणत्वं युगपद् विलोक्य कथमेतेषां विरुद्धधर्माणामेकत्र समावेशो जात इति विचिन्त्यैव कन्यका विस्मयविमुग्धाः परस्परमुखावलोकन-पूर्वकं स्मितेन तां सेवन्ते ।

स्नानानन्तरं लोध्रकुसुमरेणुभिः उशीनरानुलेपनैः प्रसाधितां चन्दनचर्चित-कलेवरां माधवीं सुगन्धिधूपैः केशेषु बाहुसन्धिजघनमूलयोर्वासयित्वा सुमनोज्ञं सुरभिकक्षं नयन्ति कन्यकाः । ततश्च चीनांशुकेन कृतोत्तरीयां मञ्जिष्ठाराग-रञ्जितेन पट्टदुकूलेन कल्पितस्तनाभरणां तामधोवासं परिधापयन्ति कन्यकाः । काचित् तस्याः केशपाशान् नरीनृत्यमानस्य बर्हिणः पुच्छमिव हारितमेचकान् करोति विविधानुलेपनैः । अपरा तस्याश्चरणयोः लाक्षारागेण रक्ततां विदधाति । अन्या च रक्तेन रेणुनिर्यासेन अधरौष्ठौ बिम्बफलरक्तिमविनिन्दितौ करोति । काचिद् हारमर्पयति ग्रीवायाम् । अपरा च बध्नाति किङ्किणीं कट्याम् । यथा यथा तां वासयन्ति भूषयन्ति च सेविकास्तथा तथा सहस्ततालं नृत्यन्त्य इव ता निष्कारणं हसन्ति । काचित् कथयति कर्णमूले द्वितीयायाः ।

—किमलूनमनाघ्रातं पुष्पमुत पर्य्युषितं देवाय समर्पितं स्यात् ?

—किं चिन्तयास्माकम् ! न वयं देवेन तत्स्थानाभिषिक्ताः करिष्यामहे ।

× × ×

अस्तायमानो दिवाकरः प्रणयरागेणेव रक्तिमानं भजमानः पश्चिमाशां प्रविशति । तत्समागमप्रार्थनयैव सन्ध्या निसर्गमनोहरा चारुरूपिणी नभसि

अवगुण्ठनमपाकृत्य मुखं दर्शयति रक्तिमरागेण। प्रखररश्मिः कान्तकोमलतामाश्रित्य सन्ध्यां दृढं समाश्लिष्य रतोत्सवाय लोकालोकदरीं प्रविशति। तमस्तयोरानुकूल्यं करोति।.... माधवी क्षौमदुकूलं वसाना मनसा कुमारं ध्यायन्ती वलभ्यामुपविशति। पार्श्वे च धात्रेयिका व्यजनहस्ता मौनमास्ते।

पूर्वमेव कन्यान्तःपुराध्यक्षेण सूचितं यदद्य देवश्चन्दनभवने यामिनीं यापयिष्यतीति। सेविकाः प्रेष्याश्च धूपैः कक्षं सुरभि कृत्वा दुग्धफेननिभं शयनं चन्दनपुष्पैः सुवासितं विधाय वकुलमालाभिः शालभञ्जिकाः सुमनोहराः कुर्वन्ति। शयनीयैकपार्श्वे काष्ठासनम्। भद्रासनं च। ताम्बूलकरङ्कवाहिनी एलाफलमिश्रितानि पूगफलानि सनागपर्णानि करङ्के कृत्वा शयनीयसमीपे स्थापयति। नागदन्तविलम्बितानि चित्राणि नयनाह्लादकराणि मनोऽनुकूलानि दृश्यन्ते। सर्वा देवागमनं प्रतीक्षमाणाः कालं गणयन्ति।

धात्रेयिका प्रेरिता नयनिका सायाह्न एव देवाय निवेदितवती।

—देव! स्नाताद्य तिष्ठति देवदर्शनाभिलाषिणी महाकालमन्दिरात् समागता माधवी नाम कन्यका सुमङ्गलीः। प्रथमारुढयौवनां चतुषष्ट्यां निपुणां शीलेन श्लाघनीयां वृत्तेन महनीयां सर्वांगसुन्दरीं कन्यामेनां सभाजयितुमर्हति देवपादः। सा देवस्य विदितचरेति न मया किञ्चिदधिकं निवेदनीयम्।

'यथा निवेदितं तथैव करणीयं मया' इति प्रतिश्रुते कुमारे लब्धप्रश्रया सा सान्तर्हासं पुनरपि कथयति।

—तर्कयामि खलु मालती कां दशामिदानीं गमिष्यति। नूनं वराकी तिरस्कृता स्थानच्युता आत्मनो भागधेयमेव निन्दिष्यति।

—किमर्थम्? यथापूर्वं स्वीयकर्मसु निरता स्वस्थाने स्थास्यति सा। कोऽत्र व्यतिकरः?

नयनिका कुमारमुखं विलोक्य नीचैः कथयति।

—माधवी अन्याः सर्वा अतिशेत इत्यत्र नास्ति सन्देहः। माधवीं हित्वा कथं मालत्यां देवस्य स्नेहाभिलाषो भवेदिति शङ्का मां बाधते।

—मैवं शङ्कनीयम्। मा मालतीं वृथा विमनस्कां कुरु। नात्र कार्पण्यं न वेतर-विशेषता। त्वमपि कालोचितं कुरु, इति स्मितं कृत्वा देवो विसर्जयति ताम्।

एवं विसृष्टा कुमारेण नयनिका माधवीनिवेशनं प्रत्यागच्छति ज्ञापयति च याथातथ्येन सर्वं यद् यत् कुमारेण कथितम्। कुमारवृत्तान्तं श्रुत्वा माधवी भृशं हृष्टा। चेतस्तस्याः समुत्कण्ठते कुमारदर्शनाय। वेपते हृदय वेपथुश्च जायते गात्रे।

कालोचितविधानेन कृतप्रसाधनाया माधव्याः कवोष्णनिःश्वासेन वक्षः समुद्वेलितम्। वेपमानं हृदयं कथं कथमपि धारयन्ती कालं यापयति सा। पतति पतत्रे विचलति पत्रे तदुपयानमाशंक्य द्वारे दत्तदृष्टिः यापयति यामम्। प्रथमो द्वितीयत्वं गतः। द्वितीयोऽपि निष्फलतायां पर्य्यवसितः। निशीथोऽपि समुत्कण्ठां समुद्वेलितां कृत्वा त्रियामायास्तुरीययामे परिणत इव प्रतिभाति। त्रियामा गतप्राया नागतः कुमारः। विहगानां कलकूजनं प्राक्प्रभाते श्रुत्वा माधवी नितरां क्लिष्टा खिन्ना। वासकसज्जा नायिकेव भृशमात्मग्लानि-मनुभवन्ती माधवी आत्मनो जीवने यौवने च न श्रद्दधाति। 'महाकालच्युता दयितेन विप्रलब्धा कथमहं जीवामि' इति सा जीवितशेषं चिन्तयति। चिन्ता-मग्नायास्तस्यास्तन्द्रा जाता। तन्द्रायां प्रभातकाले सा स्वप्नायते।

दृष्टस्तया स्वप्ने शूलपाणिर्महादेवः। महाकालः शूलमुद्यम्य क्रोधरक्तेन वक्त्रेण दिधक्षुरिव तां नेत्राभ्यां पश्यन्नास्ते। महाकालं क्रुद्धं दृष्ट्वा तं द्रष्टुमक्षमा माधवी भयाद् वेपमाना यावद् धावति तावदेव तां देवस्वामी धारयति। देवस्वामिना धृता सा भृशं कम्पमाना रोदिति। 'मा मा मा रोदीः' इति देवस्वामी तां सान्त्वयति। सा तु महाकालं परावृत्य वीक्ष्य 'एषाहं मृता' इति धावति दूरम्। यदा सा स्वप्ने धावितुकामा तावदेव शय्यातः भूमौ पतिता।

रात्रिजागरणक्लिष्टा चिन्तोद्भ्रान्ता सा भयादेव तत्स्थानाद् द्रुतं धावति। न जानाति सा कुत्र गच्छति, न जानाति मार्गं न वा रक्षणावेक्षणादिकम्। सा धावत्येव। सूर्यो नेदानीं यावदुदेति। अरुणोदयात् प्रागेव दिशो धवलतां काञ्चिद्

भजन्ते। एतस्मिन्नेव काले माधवी समुपस्थिता लौहित्यतटम्। दृष्टा तया तीर्थावतरणसोपानपंक्तिः नाति दूरे। वामभागे किञ्चिदुपरिस्थितं मन्दिरं पश्यति सा। तदभिमुखं द्रुतं गत्वा सा मन्दिरमुन्मुक्तद्वारं पश्यति। अन्तः प्रविश्य गर्भगृहे कामेश्वरेण महागौरीमालिंगनाबद्धां विलोक्य क्षणं तिष्ठति माधवी। सहसा भूमिन्यस्तजानू सा कामेश्वरमहागौर्यौ प्रणम्य चिन्तयति। 'एष महाकालो महागौरीं समालिङ्ग्य चिरं तिष्ठति तस्य नयनयोर्वक्त्रे च प्रकटितः प्रणयानुरागः। न मां कदाचिदपि देवो निर्भरमाश्लिष्यति। कुपितो भृशं मह्यम्। देवद्वेषाद् दिशं न पश्यामि। त्यक्ताहं कुमारेणापि यदर्थं मयापराद्धो देवादिदेवः।'

यद् यद् घटितं कुमारदर्शनादारभ्य तत् सर्वम् अलातचक्रवत् तस्या मनसि प्रतिभातम्। युगपद् हर्षशोकक्षोभैः समाकुलिता सा आत्मनो जीवितं वृथेति मन्यते। सपद्येव सा लौहित्याम्भसि आत्मानं विलीनां कर्तुं द्रुतं सोपानपङ्क्तौ धावति। सहसा बलवद् उल्लम्फनेन माधवी स्रोतसि निमज्जिता। स्रोतोजवेन नीयमाना सा कदाचिदुन्मज्जति क्षणाच्च निमज्जति सलिले।

× × ×

इतश्च नयनिकानिवेदितं सन्देशं श्रुत्वा हर्षावेगपरिप्लुतहृदयो भास्करवर्मा माधवीसंगमाय यावद् गन्तुकामः पदक्रमं कुरुते तावदेव कुरंगको वार्ताहरो द्रुतं समागत्य सप्रणामं निवेदयति भास्कराय।

—क्षन्तव्यो मेऽपराधो देवपादैः। अदेशकालोऽपि विज्ञापनस्य विपत्प्रतिकाराय कार्यानुरोधाद् निवेदयामि। अद्य सायंसन्ध्यायां प्रवर्तमानायां तमसावृते च जगति परममाहेश्वरः सुप्रतिष्ठितवर्मदेवो बाणाहतव्रणो दुश्चिकित्स्यः पाञ्चभौतिकं देहं विहाय यशःकायेन तिष्ठति। श्रुत्वा देवः प्रमाणम्।'

श्रुत्वैव हृदयनिकृन्तनं वचः पितृहीनोऽपि कुमारः पुनरपि आत्मानं पित्रा इव वियुज्यमानं मन्यमानः शोकाभिभूतः किंकर्तव्यविमूढो जातः। धैर्येण

धारयन् धियः चित्तं चिन्ताक्रान्तं कथमपि अचञ्चलं कृत्वा स्वात्मगतं ध्यायति मुह्यमानः।

'मृतः पिता, उपरतो ज्यायान् भ्राता। राज्यादर्धमपहृतं वैरिभिः। शत्रुश्च प्रबलायते।...... एकाकी अहम्। पितृपैतामहं राज्यं प्राणैरपि पालनीयम्........। प्रकटिते क्लैब्ये अस्मिन् विपत्काले अनर्था नूनं बहुलीभविष्यन्ति। नरकान्वयस्य महदयशस्यं भविष्यति यदि राज्यमिदं परिभ्रष्टं भवेत्। तत् सर्वथा परिहर्तव्यम्। किं करोमि? इतश्च माधवी मदागमनं प्रतीक्षमाणा विरहोत्कण्ठिता भविष्यति। सा खलु महाकालमन्दिरागमनात् समुद्विग्ना क्षणं यापयति मम दर्शनाकांक्षया। यदि तावदहं न गच्छाम्यद्य निशायां सा वराकी न जाने कां गतिं गमिष्यति। सा किं करिष्यति?....नाहं जानामि किं करोमि.... ? वृथा चिन्तनेन। नास्त्यत्र विकल्पः। दिवंगतस्य भ्रातुरौर्ध्वदेहिकं सर्वथा कर्तव्यम्। विलम्बे महान् अनर्थो जायेत। राज्ञा प्रथमं राज्य रक्षणीयम्। नात्र हृदयवृत्तेः प्रकाशावसरः। माधवी? तिष्ठतु सा।' . . . .

एवं बहुशो विचिन्त्य भास्करवर्मा द्रुतं गच्छति सपरिजनः तत्र यत्र भ्राता मृतस्तिष्ठति।

राजोचितविधानेन सुसम्पन्ने और्ध्वदेहिकादिकार्यजाते प्रभातप्रायायां रजन्यां लौहित्याम्भसि अवगाहनाय लौहित्यतटं गच्छति अनुयायिभिरनुगम्यमानो भास्करः। अथ यावदवगाहनाय नाभिमात्रजले स्थितो भास्करः समन्तात् पश्यति तावदेव स्रोतसा नीयमानं वस्त्रपुञ्जं कृष्णचिह्नेनोपलक्षितं वीक्षते। सुनिपुणं निर्वर्ण्य ज्ञातं तेन अम्भसि निमज्जिता काचिन् नारी स्रोतसा नीयते। परिज्ञाय परिजनप्रतिषेधात् प्रागेव तामुद्धर्तुं तदभिमुखं सन्तरति भास्करः। गृहीत्वा केशेषु स्रोतोऽनुकूलं तामानयति तीरम्। विचेतनां निःश्वासमात्रसूचितजीवितां नारीं माधवीं परिज्ञाय भास्करो विस्मयाविष्टः परं समुद्विग्नो जातः। सप्रतिभतया तेन कलोचितं करणीयमिति जलमुदरान् निःसारयति माधव्याः। ततश्च तां वाहयति परिजनैः कन्यान्तःपुरमचिरम्।

अथ माधवी स्वस्थतां गता त्रिभिरेव दिवसैः। एतेषु दिनेषु सा भृशमनुशोचति यत् तया चेष्टितम्। अन्येद्युः सा कुमारागमनं प्रतीक्षते। समागते कुमारे सा हर्षोत्फुल्लनयनयुगलप्रसारितदृष्ट्या तस्य मौनं स्वागतं व्याहरति।

शय्यायामर्द्धं शयाना सा कुमारस्य क्रोडे मस्तकं दत्वा तन्मुखं पश्यन्त्यास्ते। कुमारस्तु तस्याः केशेषु हस्तं लघु परामृश्य सानुयोगं ब्रूते।

—माधवि! निष्करुणासि। कृत्रिमस्तवानुरागो मयि। अन्यथा कथं मां परित्यज्य तव जिगमिषा? त्वया न चिन्तितं क्षणमपि कथं माधवीविहीनः कुमारो जीविष्यति? कां दशां कुमारो गमिष्यति……?

—मा मा मातिकथनेन! नैवं वाच्यमित्थं कुमारपादेन इति माधवी हस्ततलेन कुमारस्य मुखं पिदधाति कथयति च।

—महाकालमन्दिरात् च्युता देवरोषेण क्लिष्टा देवस्वामिनाचार्येण त्यक्ता कुमारेणोपेक्षिता निष्कुटुम्बा माधवी छिन्नमूला माधवीलतेव कमाश्रित्य जीविष्यति? किमर्थं तस्या जीवितं स्यात्? किं भवता नावधारितमेतत्?

कुमारस्तां सान्त्वयन् ब्रूते।

—यथा तथा भवतु। मा पुनः साहसं कार्षीः। जीवति कुमारे न त्वया किमपि अन्यथा चिन्तनीयम्।

—न मया चिन्त्यते। परं किमहं करोमि। कुमारमपश्यन्त्या मम……

—ननु एषोऽहं तव नयनपथे····

इत्युक्त्वा कुमारस्तस्या मुखमुन्नमय्य सुचिरं चुम्बति। माधवी सस्मितं तस्य गलं बाहुभ्यां संवेष्ट्य वक्षोविलग्ना भवति। चिरं प्रतीक्षमाणयोस्तयोः समाश्लेषः सुचिरं भवति। अन्तःप्रवेष्टुकामयोस्तयोः पृथक्स्थितिर्लज्जयेव दूरं गता। नातः परं न बहु जल्पनं तयोः। परं निःश्वसनमेव कालोचितं त्रियामां मुखरितामिव करोति।

कुसुमाकरस्य प्रथमो मासः । रात्रेः प्रथमो यामः । यामिकानां यामोद्घोषणं श्रूयते दूरात् । गतप्रायोऽपि शीतः प्रणयिजन इव आगच्छति पुनः पुनः । रवेस्तापो नानुभूयत इदानीं यावत् । राजभीत्येव कोमलतामाश्रयति रौद्र इति प्रतिभाति । उद्यानेषु वीथिषु च ताम्राभैः पल्लवैः समलंकृता लता वृक्षाश्च स्निग्धतामातन्वन्ति दिक्षु । केतकगन्धिनो वाताः कुसुमसौरभमावहन्ति ।

प्रतीहारप्रदर्शित-मार्गेण मन्त्रणाकक्षं प्रविशति कुमारभास्करवर्मदेवः । अकम्पपदक्रमेण शनैः कक्षं प्रविशन् शालप्रांशुर्महाभुजः कुमारो भ्रमन् रुक्मस्तम्भ इव तेजसा देदीप्यमानो विराजते । कक्षाभ्यन्तरं प्रविश्य इतस्ततो महता यत्नेन सुनिपुणं निर्वर्ण्य रक्षिभिः परीक्षितमासनमुपविशति कुमारः । समुपविष्टे कुमारे प्रतीहारः ससम्भ्रमं कुमारं बहुशो प्रणम्य अदर्शितपृष्ठो यथागतस्तथैव निर्गत इति तथागतत्वं न प्राप्नोति, परन्तु प्रतीहारमशून्यं करोति । आसनस्थः कुमारो मुक्तवातायनेन कक्षाभ्यन्तरं चौरमिव प्रविशन्तं रौद्रं दूरादेव सेवमानस्तेनैव गवाक्षद्वारेण किमपि द्रष्टुकाम इव बहिः पश्यन्नास्ते । चामरधारिण्य कङ्कन-वलयहस्ताः रूपयौवन-शीलसम्पन्ना गणिकाः राजानमुपतिष्ठन्ते । गवाक्षद्वारान् नातिदूरे आम्रकुञ्जे चूतमुकुलपानमत्ताः पिका मुहुर्मुहुः कुहुस्वरेण पञ्चमं कूजन्ति । कोकिलानां कूजनं श्रुत्वा तेषां नर्त्तनमिव शाखात् शाखान्तरगमनं दृष्ट्वा च कुमारो विस्मृतं स्मरन्निव बहिर्दत्तदृष्टिरपि आत्मगतं किञ्चिद् ध्यायति । कृताह्निकस्य कालागुरुगोरोचनादिभिः स्नानानुलिप्तस्य कुमारस्य तप्त-काञ्चनाभं कपोलयुगलं नितरां विभाति । 'स्थेयात् स्थाणुपादारविन्दात् ऋते नान्यमहं नमस्करोमी'ति शैशव एव कृतसंकल्पस्य कुमारस्य भालस्त्रिपुण्ड-रेखाभिर्विभूषितः पारमेश्वरत्वं नितरां सूचयति । ईषत्स्थूलनासिकया किञ्चित् प्रकटितहनुभ्यां कुमारस्य मुखमण्डलमधिकमनोज्ञं भवति । तस्य पौरुषज्ञापके स्वभावारुणे समुद्दीपितकन्दर्पनयने नातिविस्तृततया दृढ़तां सूचयतः स्थूलाक्षि-ट-लाभ्यां किञ्चित् समाछादितत्वात् अक्षियुगलमनतिबृहद्दनायतमिव प्रतिभाति । शिरसि द्विफालबद्धाश्चिकुरा निसर्गकृष्णत्वेन पश्यतां दृष्टिमाकर्षन्ति । रत्नख-चितो निचोलो दुकूलं स्कन्धस्थितं तस्य गात्रस्यामांसलत्वं ख्यापयति ।

अथ प्रतीहारः प्रविश्य पृथ्वीपृष्ठप्रतिष्ठापितपाणि-पल्लवो विज्ञापितवान् ।

—देव ! गौड़राज्यात् समागतो गूढ़पुरुषः समाधिरन्तरंगतोरणमध्यास्ते ।' श्रुत्वा कुमारस्तु 'तमाशु प्रवेशय' इति समादिशति । अथ भावज्ञतया क्षितिपालादराच्च प्रतीहारः स्वयमेव निर्गच्छति । गूढ़पुरुषस्तु प्रविश्य आरादेव पञ्चाङ्गालिङ्गिताङ्गनः प्रणामं करोति । ततो देवः तिरश्चीं तनुमीषदिव दधानश्चामरग्राहिणीमन्तरालवर्त्तिनीं समुत्सार्य्य सम्मुखीनं तं पृच्छति ।

—भो गूढ़पुरुष ! कथ्यतां याथातथ्येन किं त्वया ज्ञातम् ? किं श्रुतमधिगतं वा ?

समाधिः भूयोऽपि राजानं प्रणम्य सप्रश्रयं कथयति ।

- यथार्थवादिनो हि चाराः, अतएव 'चारचक्षुर्महीपति' रिति साधूक्तिः । तस्माद् भूतार्थमविकलं कथयतो ममाप्रियवादित्वं देवपादैककुशलनिधानमिति विदितवेदितव्यैर्देवैः क्षन्तव्यम् ।

राजा तु 'भद्र ! भण भण । निःशङ्कं कथय' इति वदति । ततः समाधिः कञ्चित्कालं मौनमास्थाय सुविस्पष्टं कथयति ।

- देव ! प्राग्ज्योतिषाख्यमस्मत्पुरं परित्यज्याहं गतवान् गौड़ान् प्रति । प्राप्ता गौड़ा मासेन । तत्र पुण्यकृतामधिवासो वासवावास इव शतदलो नाम महान् जनपदः । तस्मिन् जनपदे गन्धवणिग्रूपेण कस्तूरीणां विक्रयं श्रीखण्डानां क्रयं च कुर्वन्नहं प्रकृति-पुरुषाणां महामात्रामात्यानां कम्शनेशानां राजकुमाराणां वणिजां राज्ञश्च चरितानि, अभीप्सितानि कार्य्याणि च याथातथ्येन समीक्षमाण आसम् । ज्ञातञ्च—गुप्तान्वयजः शशाङ्कापरनामा नरेन्द्रगुप्त इदानीं षाड्गुण्यमाश्रयन् दक्षतया राज्य शास्ति ।

अधुना प्राग्ज्योतिषपुरं जेयं लभ्यमिति निश्चित्य विषवैद्योपमेन नरेन्द्रगुप्तेन समरोपकरणानां संग्रहणं बलानां च वर्द्धनं श्रियः समाकर्षणं मित्राणामुन्नतिः अमित्राणाञ्च विनाशः क्रियते। शालावृकहृदयो राजा न स्निह्यति प्रकृतिभ्यो नो वामात्येभ्यः। विजिगीषुः शशाङ्कः कदाचिन् मालवराजो वैरायमाणो गौड़ानभिभवेदिति भृशमाशङ्कमानस्तं दान-मानोपहारैरावर्जयति। नरेन्द्रगुप्तो मिथ्याप्रणयैः मालवाधिपतिं बुधगुप्तं मौखरिभिर्भीषयते। मौखरिराजः स्थाण्वीश्वराधिपतये कदाचित् स्पर्धेत इति प्रभाकरः मौखरिकुमाराय ग्रहवर्मणे अपरां श्रियमिव स्वां दुहितरं राज्यश्रियं दत्तवान्। स्थाण्वीश्वर-कान्यकुब्जानां मैत्री मालवानां नाशायेति नरेन्द्रगुप्तो बुधगुप्तं चेतयति। बुधगुप्तोऽपि जातप्रत्ययो ग्रहवर्मनाशाय पिशाच इव छिद्रप्रहारी कालं प्रतीक्षते स्म। अतो यस्मिन्नहनि अवनीपतिः प्रभाकर उपरत इत्यभूद् वार्त्ता तस्मिन्नेव काले ग्रहवर्मा दुरात्मना बुधगुप्तेन जीवलोकमात्मनः सुकृतेन सह त्याजितः। अथ विदितवृत्तान्तः राज्यवर्द्धनो मालवाधिपतेः स्थाण्वीश्वराभियानमाशङ्क्य भ्रातरं हर्षवर्द्धनमेवं कथयति।

'आयुष्मन्! श्रुतः पुष्पभूतिवंशस्य परिभवो मालवेन। किमतः परमपि श्रोतव्यमस्ति? तिष्ठ त्वं, तिष्ठन्तु सर्वे सेनाध्यक्षाः अमात्याश्च। गतोऽहमद्य एकाकी मालवकुलप्रलयाय। राज्यरक्षार्थं बलानामर्धं तिष्ठतु अत्र। भण्डिरर्द्धं बलं गृहीत्वा मामनुयातु। अचिरादेव मालवपिशाचं लौहश्रृंखलेन श्रृंखलितम् अत्रानेष्यामि।'

एवमुक्त्वा बलेन राज्यवर्द्धनो मालवान् प्रति गतवान्। बुधगुप्तस्तु वैरिनारी भोक्तव्येति मत्वा राज्यश्रियमन्याश्च मौखरिरमणीः स्वान्तःपुरमानिनाय। अथ कदाचित् प्रवृत्ते तत्राष्टमीचन्द्रमहोत्सवे, जाते च पत्तननगरयोषितां राजान्तःपुरप्रवेशे शाहीराजकन्यययाश्रुमत्या पूर्वसंकेतितो मीनकेतनाख्यो कुमारो युवा स्त्रीवेशधारी तत्र प्रावेशि। पानक्षीवेषु परिजनेषु समागताभिः पत्तनयोषिद्भिर्मिलित्वा राज्यश्रीः केनापि अलक्षिता मीनकेतनेन सह ततो बहिर्गता। कुत्र तौ गतौ न कश्चिद् जानाति। जनप्रवादः खलु कथयति अपरमालवादागतेन

केनचित् शकक्षत्रपेण तौ निरुद्धौ। मीनकेतनो घातितः। राज्यश्रीः क्व गतेति न जानाति कोऽपि।

अथ राज्यवर्द्धनमागच्छन्तं श्रुत्वा गौडराजो भूम्यन्तरवासिना सामन्तेन कल्याणचन्द्रेण सह संमन्त्र्य तमाजुहाव। ततश्च पानभोजनादिभिर्वरस्त्रीभिश्च प्रसाद्य कल्याणचन्द्रस्तस्य मनोऽनुकूलं कुर्वन्नास्ते। कल्याणचन्द्रेण राज्यवर्द्धनस्य एकपिङ्गस्यैवानङ्गद्विषा यथा मैत्रीजाता। कल्याणचन्द्रेण विज्ञापितं यत् मृदुभाषिण्यः अनुरागवत्यो मृद्वङ्ग्यश्च गौड़ललनाः शयने च नवनीतकोमलाः। तासां ललामभूता कामरमणीं ह्रेपयमाणा लावण्यवारांनिधेः सम्भूता अपरा श्रीरिव श्रीमती नाम कन्या शशाङ्कस्य गौड़ाधिपस्य।

शशाङ्कः स्वतनयां मालवाधिपतये बुधगुप्ताय दित्सति। प्रौढ़ो मालवाधमः। सा च निसर्गसुन्दरी। भवान् एव तस्या अनुरूपो वर इति मे मतिः। आगच्छतु भवान गौडदेशम्।

स्वयमेवानुभवतु शयने गौड़ाङ्गनानां चतुःषष्टिषु कलासु नैपुण्यं वैदग्ध्यञ्च। इत्यादिभिर्बहुभिः कामोद्दीपकैर्वचोभिः कल्याणचन्द्रस्तं गौड़देशमानीतवान्। गौड़ाधिपतेः कन्यां दिदृक्षुः राज्यवर्द्धनो दिनयापनमसहमानो कल्याणचन्द्रचोदितो यदा कदाचित् कन्यान्तःपुरं प्रविष्टवान् तदा रक्षिभिर्धृतः स राजसमीपमानीतः। ततश्च राज्ञा शीललङ्घनापराधात् स प्राणदण्डेन दण्डितः।

अथ दिवं गते पितरि उपरते च मातरि घातिते जामातरि निहते भ्रातरि पलायमानायां स्वसरि, अराजके राज्ये कथमपि धैर्य्यमालम्ब्य हर्षवर्द्धनः पुष्पभूतिवंशीयं पितृपैतामहं सिंहासनमारूढ़ः। राज्यभारं सचिवे समर्प्यैदानीं हर्षवर्द्धनो मालवजयाय गौड़ाभियानाय च चतुरङ्गवाहिन्या पूर्वां दिशं प्रत्यभिमित्रियमागच्छति।

प्रणिधि-कथितमेतत् सर्वं श्रुत्वा भास्करो हर्षस्याभियानश्रवणेन प्राप्तहर्षस्तं पुनरपि शनैरपृच्छत्।

—किं ज्ञायते कियता बलेन हर्षो गौड़ान् प्रत्यागच्छति ?

—महद् बलमिति जनैः कथितम्, तत्त्वतो न जानामि।

सः कथयति।

'साधयेदानीमि'ति कथयन् देवस्तं विसृज्य चिन्ताकुलितमनाः स्वात्मगतश्चोपांशु भणति।

'चेद् हर्षो जयति गौड़ान् स कदाचित् कामरूपान् जयेत्। श्रूयते स एव उत्तरापथे सम्राडिति। अथ चेद् हर्षो रणे भयविगलितहर्षो भवेत्, तर्हि गौड़हतकः पुनरपि कामरूपान् विजिगीषुर्महान्तमनर्थं करिष्यति। भवतु शीघ्रमेव मयारातिदमनाय यतितव्यम्। कथं ·····केन ···किं किं····· करणीयम्। न खलु·····न खलु······जानामि·······। आं, ज्ञातम्! मालती नाम स्वैरिणीव्यञ्जना मया प्रेषिता कर्णसुवर्णं वैरिचराणां गमनागमनज्ञानाय। बहुभाषाभिज्ञा सा प्रवञ्चनेन कामालापेन चारान् नूनं विकलान् कुर्य्यात्। सैव वेशभाषादिनिपुणेति तत्र स्थापिता। किं सा तत्रैव तिष्ठति? अयं मधुमासः। प्रवृत्ते वसन्ते सा प्रत्यावर्त्तनीयेति मया समादिष्टा। प्रत्यागता न वेति न जाने।'

भास्करः प्रतीहारमाह्वयति।

—भोः! कः प्रतीहारमशून्यं करोति। भोः! त्वरताम्।

प्रतीहारो तूर्णमेव प्रविश्य प्रणामपूर्वकमाज्ञाग्रहणाय समुत्सुकस्तिष्ठति। राजा तमादिशति। 'मालतीं शीघ्रं प्रवेशय। जानासि कुत्र सा तिष्ठति?'

'अथ किम्' इत्युक्त्वा प्रतीहारी विनिर्गतः।

अथ प्रतीहारप्रदर्शितपथेन मालती कक्षद्वारमुपसृत्य सुचिरं भास्करवर्माणमवलोकयति नयनाभ्यामापिबन्तीव। अनिर्णिमेषं भास्करवर्माणं पश्यन्त्यास्तस्या मनो युगपदेव हर्ष-शोक-क्षोभादीनां विषयीभूतम्। देवसमीपं गन्तुकामापि अनिश्चितचित्तवृत्तित्वात् सहसा पदक्रमे असमर्था, स्मितहास्येन वक्तुकामापि वचनविरहिता, कृताञ्जलिपुटेन प्रणमितुं यतमानापि निश्चलचेष्टिता मालती चित्रार्पितेव तिष्ठति कञ्चित्कालम्। सा न जानाति किं करणीयमिति सहसा। मनसि चिन्तितं तया—'दिष्ट्या दृष्टो देवपादो भूयोऽपि मया। अहो न स्मरामि सम्यक् कियान् कालो व्यतीतः? कदाहं प्राग्ज्योतिषपुराद् विदेशं

गतवती ? अहो ! क्षणमपि कुमारादर्शनमसहमानया पाषाणहृदया वत्सरो यापितः ? कथं कुमारमपश्यन्त्या मम प्राणा नवद्वारे मम वेरे स्थिताः ? न द्वारेण पलायिताः ? आश्चर्य्यमेतत् । ...... ननु तर्कयामि किं मह्यं स्निह्यति पूर्ववदिदानीमपि कुमारः ? किमधुनापि कुमारो निर्भराश्लेषेण मां तथा वक्षोविलग्नां करिष्यति यथाहं वामनीकृतकुचा न वाह्यं न वाभ्यन्तरं किञ्चिद् ज्ञास्यामि ? किं कुमारो माम् अस्मरद् यदाहं विदूरं गता ? नहि, नैतत् प्रार्थनीयं मया। बहुवल्लभा हि राजानः। सन्ति राजावरोधा हिमवत्प्रान्तात् समानीता रूप-यौवनाढ्या वयोवेश-लावण्यादिभिः अप्सरायमाना कलानिपुणाः। कथं ताः परित्यज्य अनन्यकान्तो भवेत् कुमारः ?.... अहो आश्चर्यमिदम् । कथमिदानी-मपि न कापि पट्टमहिषीत्वे वृता देवेन। दिवं गते पितरि मृते ज्येष्ठभ्रातरि, भास्करवर्मदेव एव महाराजाधिराजः प्राग्ज्योतिषपुरराज्यस्य। कथं महिषी-विहीनेन देवपादेन सर्वं सम्पादयिष्यते ? सह-धर्माचरणं वा कथं भवेत् ? किमितर-विशेषत्वं नेच्छति कुमारो राजावरोधानाम् ? श्रुतं मया पूर्वं महाकालमन्दिरात् समागता नृत्यपटीयसी कलानिपुणा माधवी पट्टमहिषी भवेदिति कुमारेण निश्चितम् । मनसा वृतापि सा अमात्यैः नर्त्तकीति नानुमन्यते इति प्रकृतिक्षोभमा-शङ्क्य कुमारेण नाभिषिक्ता पट्टमहिषीत्वे। नूनं माधवीगतप्राणा देवपादा नान्यां तत्स्थानाभिषिक्तामिच्छन्ति। अतएव महाराजाधिराजो भास्करवर्मदेवपाद इदा-नीमपि 'कुमार' इति प्रसिद्धः। मन्ये न देवपादः कामपि राजान्तःपुरयोषां कदाचि-दपि महिषीत्वे वरिष्यति। ...... भवतु, अलं चिन्तनेन। न मां देवो माधवीं परि-त्यज्य पट्टमहिषीं करिष्यति। देवनर्त्तकीति माधवी नानुमता पौराणाम्। तर्हि कथमहं समादृता भवेयम् ? अहमपि स्वैरिणीव्यञ्जना देशाद् देशान्तरं गता, पुंश्चलीव निस्त्रपा बहुपुरुषवक्षोविलग्ना रात्रिगणान् यापयन्ती आसम्। आं ...... किमहं माधवीमनोरञ्जनार्थमेव देवेन स्वैरिणी-व्यञ्जना पौण्ड्रवर्द्धनं प्रस्था-पिता ? प्रकटिते मम स्वैरिणीत्वे नाहं कदापि महिषीपदवाच्या भवामीति। मा मैवं चिन्तनीयम्। नाहं कुमाराद् अनिष्टमाशङ्के। देवेन अनुगृहीतेति आत्मानं सौभाग्यवतीं मन्ये। देवानुग्रह एव मम जीवनम्। तमेव स्मारं स्मारं सुखमनु-

भवामि । अहो ! कुमारदर्शनादेव रोमाञ्चिता भवामि ।·······रोमहर्षो जायते । पुलकितं मे गात्रम् । रोचते भृशं मे कुमाराश्लेषः । किं नु इदानीं लप्स्ये प्रार्थितम्······ । स्वैरिणी खल्वहम्·······

मम स्वैरिणीत्वं राजनिदेशात् । राजादेशो मया निर्वाहितः । कृत्रिमं मम स्वैरिणीत्वम् । मम कायो व्यभिचरति, न मनो मनागपि । देवपादस्य अभ्युदयाय मङ्गलाय एव तत् कृतम् ।·······तथापि वारयोषेति यदि कुमारो विमनायते ? यद्यहं वारयोषा तर्हि माधवी का ? सापि देवनर्त्तकी । देवनर्त्तकी माधवी किमिदानीं देवस्य वल्लभा भवेत् ? स्वैरिणीव्यञ्जनाहं स्थास्यामि कुमाराद् दूरम् ? मा मैवं चिन्तनीयम् । यदि कुमारो मां नेक्षते दयितचक्षुषा······· ? हृदय ! समास्वसिहि । अलं वृथा शङ्कया । नाहमन्यथा शङ्के ···'

एवं बहुशो विचिन्त्य माधवी यावन्निश्चलं तिष्ठति तावत् प्रतीहारी नोदयति ताम् ।

—त्वरतामार्य्ये ! एष देव आसनस्थस्तिष्ठति । चामरधारिणीं हित्वा न कोऽपि विद्यते कक्षाभ्यन्तरे । शनैः प्रविशतु आर्य्या ।

प्रतीहारिवचनं श्रुत्वा मालती सुप्तोत्थितेव 'एषाहम्, एषाहं गच्छामि' इत्यनुच्चैरुक्त्वा साशङ्कं कुमाराभिमुखं श्लथपदक्षेपेण समागच्छति । अवनीपतिस्तु मालतीं चिराद् दृष्ट्वा महता यत्नेन आत्मनो हर्षोच्छ्वासं मनोऽभिलाषं च संयम्य राजोचितं गाम्भीर्य्यमाश्रित्य तामेव पश्यन्नास्ते । मालती तु 'जयति जयति देवः' इत्युच्चार्य कुमारसमीपमागच्छति ।

—एह्येहि माधवि ! समीपमागच्छ । अत्रोपविश । अपि सर्वं मङ्गलं ते ?

कुमारः कथयति ।

—अथ किम् । सम्प्रति देवपादानां दर्शनेन सर्वं कुशलम् ।

—अथ पौण्ड्रवर्द्धनात् कदा प्रत्यावृता ? किं दृष्टं, किं ज्ञातम् ? सर्वमवितथं निःशङ्कं कथय ।

—ह्यस्तने लोहितायति भास्करे सम्प्राप्तं प्राग्ज्योतिषपुरं नगरम् । देवपादान् द्रष्टुकामा यावदहमवसरं प्रतीक्षमाणा आसं तावदेव समादिष्टाहम् अत्रागमनाय ।

—साधु मालति ! साधु ! यथाकालं समुपस्थितं त्वया । अधुना कथय सावशेषम् । नात्र किञ्चिदाशङ्कनीयम् ।

एवमुक्त्वा भास्करवर्मा अक्षिसङ्केतेन चामरधारिणीं समुत्सारयति कक्षात् । ततश्च मालतीमुखे निबद्धदृष्टिः सस्मितं वदति —'कथय विश्रब्धम् ।'

अथ मालती किञ्चित् समीपं गत्वा कृताञ्जलिपुटा भास्करवर्माणं पुनरपि प्रणम्य गृहीतासना कथयितुं यतते । परं सहसा न निःसरति वाणी । ततः सा ईषदिव गात्रसञ्चालनं कृत्वा बलादिव कथयति ।

—विदां कुर्वन्तु अत्रभवन्तो देवपादाः । श्रोतुमर्हन्ति दत्तावधानाः । यथार्थवादिन्या मम दोषा न ग्राह्या देवपादैः । गताहं देवपादानामाज्ञां शिरसि मालामिव धृत्वा इतः कर्णसुवर्णमण्डलम् । चन्द्रपुरिविषये धनिनामावासः चट्टलाख्यो ग्रामः । तं देशं समागतेन वैदेशिकेन वणिजा जातं मम मैत्रं न चिरात् । ततस्तेन वणिजा सह वाणिज्यव्यपदेशेन ग्राम-नगरादिकं गच्छन्त्या मया ज्ञातं प्रकृतीनाम् अनुरागादिकं राजपुरुषाणां चिकीर्षितं राज्ञश्च यानासनादिचेष्टितं समरोपकरणानां समाहरणम् । ततस्तेन वणिजा सह अहम्····

इत्यर्द्धोक्तौ असमाप्तवाक्या मालती किञ्चिदधोमुखी लज्जां नाटयति । ततो भास्करः स्मितहास्येन प्रचेतयति तां मधुरया वाचा ।

—माधवि ! न लज्जितव्यम्, कथ्यतां सावशेषं सर्वम् । नात्र किञ्चिदपि शङ्कनीयं, शोचनीयं ह्रेपनीयं वास्ति । राजनियोगं यथार्थतः पालयन्त्या त्वया साधु कृतम् । वणिज एव जानन्ति राज्यस्य वैभवं कोषस्य स्थितिं कराधानप्रतिक्रियां समरोपकरणानां च संग्रहणम् ।

—यथार्थमुक्तं देवपादेन ।

कथयति मालती ।

—तेन वणिजा समानीतं मगधदेशात् तरीणां पञ्चशतं, वाजिनां षट्सहस्रञ्च । तेन कथितं कराधानेन गौड़ाधिपः कोषस्य पूर्णतां सम्पादयति । लौहानां ताम्राणां खानयो गौड़ाधिपेन आप्तपुरुषाधिकृता कृतेति । राजनिर्देशं

विना कोऽपि न तत्र गन्तुं समर्थः ।....तेनाहं नीता नन्दिपुरम् । तत्र सीताध्यक्षेण जातप्रत्ययेन नियुक्ताहं वणिग्भिर्विदेशात् समानीतानां मणीनां रत्नानां च परीक्षणे । एवं गच्छत्सु कतिपयेषु मासेषु नियुक्ताहं विषयाध्यक्षेण राजपथप्रपापालने । जलप्रपायां जलदानावसरे देशाद् देशान्तरं गतानां वणिजां सार्थवाहानाम् अन्येषामपि चिकीर्षितं ज्ञास्यामीति याचितं नरपतिपथप्रपापालिकात्वं स्वयमेव मया । चेदमित्रप्रणिधीनां दर्शनं कदाचिद् भवेत् तर्हि मनोगतं सम्पन्नं स्यात् इत्यपि मया चिन्तितम् । प्रपापालिका भूत्वा महता क्लेशेन कालो मया यापितः । रात्रौ चक्रव्यथामनुभूय नितरां दूयमाना कवोष्णनयनजलसिक्तोपधाना....'

इति यावद् वाष्पावरुद्धकण्ठा मालती दरविगलितानि नयनाश्रूणि मार्जयति हस्तेनैकेन तावत् तां सान्त्वयन् भूपतिः कथयति ।

—मालति, नेयं शोचनवेला । मा विषीदः । इदानीं फलेन क्लेशस्य अवसानं जातम्, चक्रव्यथा च दूरं गमिष्यति अचिरात् । कथय प्रपापालिकया त्वया किं कृतं, किं ज्ञातं, किं वा लब्धम् ?

मालती प्रकृतमनुसरति ।

—....अथ कदाचित् प्रपायामागतः अश्वारोही कश्चिद् राजपुरुषकल्पो युवा माधवो नाम । आगच्छतस्तस्य मयि पृच्छन्त्यां नामगोत्रादिकं सहसा केचन शस्त्रपाणयो जनाः प्रपाभिमुखमागताः । दूरादेव दृष्ट्वा तान् हयारोहिणो जनान् माधवो द्रुतमश्वेन पलायितो भृशमाशङ्कमानः । तपस्विनी प्रपापालिकापि अनन्यगतिकत्वात् तेन सह तमेव हयमारुह्य गता । स्वरूपार्थतस्तु न ते माधवं हन्तुकामा न वा मां जिघृक्षवः । राजापथ्यकारिणं पलायमानं कञ्चित् सामन्तं निग्रहीतुमेव ते धावन्ति स्म । अतो न ते सैनिका आवामनुसरन्त आसन् । आस्तां तावत्....

.......दर्शनानन्तरमेव माधवं शत्रुप्रणिधिमाशङ्क्य तस्यानुसरणे कृतनिश्चया आसम् । हयेन द्रुतं गच्छन्त्या मया प्राप्तो रजनीमुखे दुर्गः । रक्षकैर्निगृहीतौ आवाम् भटाध्यक्षेण प्रेषितौ अतिथिशालां रात्रियापनाय ।

········ज्ञातं सामन्तपर्णदत्तशासितं गौड़राज्यान्तर्गतं तन्मण्डलम्। मण्डले तस्मिन् महान् स्थलदुर्गोऽसौ दुर्गपालेन चित्रकेतुना रक्षितः। दुर्गरक्षकेण भटाध्यक्षेण वा मम माधवस्य च स्वरूपं ज्ञातं भविष्यतीति भृशमाशङ्कमानापि माधवस्य चिकीर्षितं कथाच्छलेन ज्ञातवती। ज्ञातं मया स खलु शशाङ्कप्रणिधिः। ज्ञात्वैव पानासवैस्तथा विकलतां नीतो माधवो मया यथा अचिरमेव तस्य क्षीबत्वमजनि। अथ पानक्षीबस्य तस्याङ्गुलितो गृहीतो मया अङ्गुरीयकमिदम्।

इत्युक्त्वा स्वहस्ताङ्गुलितः अङ्गुरीयकमाकृष्य नृपाग्रतः स्थापयति सा। ततो वस्त्रमञ्जूषाभ्यन्तरान् मानचित्रं सङ्केतलिपिलिखितं भूर्जपत्रश्च समानीय पूर्ववन् नृपाग्रतः स्थापयित्वा कथयति मालती।

—एषा सङ्केतलिपिर्गृहीता तस्योष्णीषतः, एतन् मानचित्रं वस्त्रमञ्जूषायाः। द्रष्टुमर्हन्ति देवपादाः।

अवनीपतिस्तु निरीक्ष्यैव तदङ्गुरीयकं शशाङ्क-नामलाञ्छितं विज्ञाय विस्मयाविष्टो वदति।

—मालति ! सुदुष्करं त्वया कृतम्। यदिदानीं यावत् केनापि प्रणिधिना कर्त्तुं न शक्यते तदेव त्वया सम्पादितम्। शोभनं कृतम्। अमायया त्वया सेवितो नृपतिः। अभिनन्दनीया त्वम्। कथय, अङ्गुरीयकग्रहणानन्तरं किं कृतं त्वया। कस्य वा प्रदेशस्य मानचित्रमिदम् ? अपि ज्ञायते किं किमत्र चिह्नितम् ?

मालती मानचित्रं हस्तेनैकेन धृत्वा भास्करवर्ममुखे दृष्टिं विनिपात्य यावद् वक्तुं यतते तावत् तस्या नयनयोर्मेलनं जातं कुमारनयनाभ्याम्। तारामैत्रे जाते विचलितप्रायापि मालती कथं कथमपि धैर्य्यमाधत्ते। किं तयोर्दृष्टिविनिमयेन प्रकटितं न तद् जानीते मालती, न जानीते भूपतिरपि सम्यक्। तथापि न तया अव्यक्तं व्यक्ततां नीतं वाचा, न कुमारेणापि हृद्गतं प्रकटीकृतम्। अव्यक्तमपि अकथितमपि सुस्पष्टमिवाभवत् तयोर्मनोगतम्। किञ्चिन् मौनमवलम्ब्य मालती पुनरपि कथयति।

—इदमङ्गुरीयकम्, एतन् मानचित्रम्, एतद् भूर्जपत्रम्—एतानि सर्वाणि संगृह्य प्रभातप्रायायां रजन्यां माधववस्त्रेण गृहीतपुरुषवेशा केनाप्यनुपलक्षिता अतिथिशालातो विनिष्क्रम्य यावदहं, दुर्गतोरणमागता तदा रक्षिभिः पृष्टाऽहम् –'काहं कुत आगता, कुत्र गच्छामि ?' राज-नामाङ्कितमङ्गुरीयकम् अङ्गुलौ पिधाय गताहमिति तेभ्यस्तद् दर्शयित्वा राजनियोगाद् गौड़राजधानीं गच्छामीति मया कथितम्। दृष्ट्वैव शशाङ्कनामाङ्कितम् अङ्गुरीयकं श्रुत्वा च मद्वचनं राजनिदेशात्मकं ते रक्षका मणिमन्त्रवशगा उरगा इव नमितमस्तका मां भूयो भूयो नमस्कृत्य ससम्भ्रमं मार्गं प्रदत्तवन्तः। अङ्गुरीयकप्रभावेण अनिरुद्धगतिप्रसारा प्राप्ताहमस्मद्राज्यसीमान्तम्। यात्रायां पथि यद् यद् वृत्तं तदकिञ्चित्करम् अनपेक्षितञ्च। न तद् वर्णनेन वृथा कालयापनं समीचीनम्।

ततो मानचित्रं प्रसार्य्य मालती पुनरपि ब्रूते।

—अस्मिन् स्थाने देवपादैर्दृष्टिः प्रदेया। एषा मध्येमार्गं करतोया सरिच्छ्रेष्ठा। एष राजमार्गः करतोयातः प्राग्ज्योतिषपुरमुपतिष्ठते।

भास्करवर्मदेवः सकुतूहलं साश्चर्य्यं पृच्छति।

—मालति ! एभिः कृष्णचिह्नैः किं सूच्यते ? आभिर्वक्ररेखाभिश्च किं ज्ञाप्यते ?

—साधु पृष्टम्। श्रोतुमर्हन्ति देवपादाः। कृष्णचिह्नेन सूचिता गिरिदुर्गाः, वक्ररेखाभिर्गिरिनद्यः। नदीनां तरश्चिह्नितः पीतबिन्दुभिः। दशपञ्चादिसंख्यया एकस्य अन्यस्माद् दूरत्वं सूचितं दशयोजनं पञ्चदशयोजनमिति।

—अथ सङ्केतलिपिः कां वार्त्तां वहति ? अपि त्वया पठिता लिपिः ? किं ज्ञातं मर्म पाठस्य ?

इति पृच्छति भास्करवर्मा।

मालती सस्मितं कथयति।

—अथकिम्। देवपादप्रसादात्। महाचीनलिपिरेषा। हिमवदधित्यकाप्रशासकेन प्रेषिता लिपिर्गौड़ाधिपतये। विज्ञापितं तेन तस्य जनाः छद्मना जल्पीश्च शरणं

गताः। तत्र स्थास्यन्ति ते सशस्त्राः साहाय्यार्थं गौड़बलानाम्। प्रत्यन्तवासिनो जना आवर्जिताः साम्ना दानेन च। प्राग्ज्योतिषपुरे च स्थापिताः परिव्राड्वेशधारिणश्चराः। तेषामन्यतमो नियुक्तः प्रधानामात्यस्य कैंकर्य्ये। तेन मर्म्महृदयं ज्ञातं राज्ञो मन्त्रिणश्चेति। अतः परं देवः प्रमाणम्।'

एतच्छ्रुत्वा भास्करवर्मा 'आं ज्ञातं! रिपुभिर्मर्म्महृदयमपि स्वीकृतम्' इत्युक्त्वा अनुच्चैः बहिः पश्यन्नास्ते। तं तथाविधं विलोक्य 'कथं देवो मिनायते' इति सहसा कारणविनिश्चये असमर्था मालती समुद्विग्ना जाता। शङ्कया भिया ह्रिया च सा जिज्ञासते।

—अथ किमिदं देवपादानां महदसौमनस्याय जातम्? उत वराकीयं सप्रश्रयं प्रागल्भ्यात् किञ्चिदनुचितमुक्तवती? देवपादाः क्षन्तुमर्हन्ति माम्। अथ चेत् ......

तां निवार्य्य कुमारः कथयति।

—नहि मालति! न त्वया किञ्चिदनुचितमुक्तं, प्रकटीकृतं प्रागल्भ्यं वा। प्राणान् हस्ते कृत्वा राजकार्यं सम्पादितम्। त्वं खलु राजानुग्रहैः सम्माननीया.......। चिन्तयामि खलु आयतीम्.......भवतु। अद्यप्रभृति कन्यान्तःपुरे तव निवासो मया निर्दिष्टः। राजावरोधस्त्वम्।

तच्छ्रुत्वा मालती सलज्जहासं मस्तकमधरीकृत्य भास्करवर्मदेवं प्रणमति सश्रद्धम्। राजा तु 'साधय इदानीम्' इत्युक्त्वा कञ्चुकिनमाहूय प्रेषयति मालतीम्।

———

१०

वन्द्यो जिनस्स भगवान् करुणैकपात्रो
धर्मोऽप्यसौ विजयते जगदेकदीपः ।
यत्सेवया सकल एव महानुभावस्
संसारपारमुपगच्छति भिक्षुसंघः ॥

किञ्चिदुच्चैरुच्चार्यमाणं शब्दं दूरतः श्रुत्वा सुचरितो नाम ब्राह्मणस्तदभिमुखं गच्छति। गच्छतः सुचरितस्य पदक्षेपः क्रमात् श्लथतां याति। शनैः शनैर्गच्छन्नितस्ततो विलोक्य सुचरितः अध्ययनशालाद्वारं प्राप्तः । नालन्दा-महाविहारस्य इयमध्ययनशाला। शालाया उत्तरस्यां दिशि भित्तिप्रान्ते आचार्यस्यासनं शून्यं विद्यते। आचार्य इदानीमपि नागतः। दश भिक्षवस्तत्र समन्तादुपविशन्तस्तिष्ठन्ति। एते खलु कृतविद्याः स्नातकाः। प्रज्ञापारमितायां वितर्के अभिधर्मे त्रिपिटके च निष्णाता आचार्यपदवीं लप्स्यन्ते। इदानीं महास्थविरम् अनात्मवादजिज्ञासयोपतिष्ठन्ते । पूर्वमेव लब्धप्रवेशः सुचरितश्चिन्तयति ।

'अहो महान् खलु नालन्दामहाविहारः। आगान्धाराद् विद्यार्थिनोऽत्र ज्ञानपिपासयाऽऽगच्छन्ति। ज्ञानेन प्रज्ञया विद्यया विनयेन च एते विनेयास्समुद्भान्ति। आचार्यकल्पा एते विद्वांसः, सकलशास्त्रज्ञानं करतलामलकवदेतेषाम्। तथापि अनन्तजिज्ञासया एते भिक्षवो महता कष्टेन शुश्रूषामाश्रयन्ति। खनित्रेन खनन् वर्यधिगन्तुकामो जन इव इमे शुश्रूषाप्रवणा ज्ञानलिप्सवो जगद्वन्द्याः। वयमपि पुराणे भारते तथा आन्वीक्षिक्यां वार्त्तायां च कृतश्रमाः। गुरोरनुग्रहाद् विदितवेदितव्याः। ननु न जाने केनोपायेन सौगतनये प्रवेशं कुर्मः? भवतु, आचार्या वन्दनीयाः। सप्रणामम् आचार्यमुपसङ्गम्य प्रस्तुतमाचरणीयमस्माभिः।

किञ्चिदग्रतो गत्वा गृहाभ्यन्तरं विलोक्य स्वात्मगतं कथयति ।

'शून्यमाचार्य्यस्य आसनम्। मन्ये तस्यागमनवेला नेदानीं भवति। तस्यागमनं बहिः स्थित्वा प्रतीक्षामहे।'

ततः शिष्यप्रदर्शितपथेन मन्दं मन्दं समागच्छति आचार्यो धर्ममित्रः। नातिदीर्घो नातिस्थूलो धर्ममित्रः। वयसा पञ्चाधिकसप्ततिवत्सरोपि प्रौढ इव दृश्यते महास्थविरः। जरामरणहानये कृतधियस्तस्य जरा भीत्येव दूरं गता, मरणं कुत्रापि पलायमानं तिष्ठति। तस्यान्वेषणार्थमिव स्थविरो वारं वारं भूमौ दृष्टिपातं कुर्वन् पदन्यासं करोति। प्रज्ञोद्भासितमुखमण्डलेन दश दिशः प्लावयन्निव प्रभया धर्ममित्रः शालाभ्यन्तरं यावत् प्रविशति तावत् तत्र समुपविष्टा भिक्षवः कृताञ्जलयस्तमभिवाद्य निश्चलं तिष्ठन्ति। तान् तथाविधान् दृष्ट्वा सुचरितोऽपि अन्तः प्रविश्य आचार्यं प्रणम्य तदभिमुखम-दर्शितपृष्ठो निवेदयति।

—विदां कुर्वन्तु भवन्तः प्राग्ज्योतिषपुरात् समागतो नाम्ना सुचरितोऽहमिति। द्वारपण्डितेन परीक्षितो, निरीक्षितो द्वारपालैर्लब्धप्रवेशोऽहम्। अत्रभवन्तं त्रिरत्न-निवेशिचित्तं श्रद्धाविनयपूर्वकं प्रणामेन प्रसादयामि।

"नमो तस्स भगवतो अरहतो सम्मा सम्बुद्धस्स"

—साधु वत्स! साधु! उपविश। यूयमपि भिक्षवो यथास्थानं समुपविशत।

इत्याचार्यो वदति।

आचार्यस्य वचनं श्रुत्वा सर्वे भिक्षवः समुपविष्टाः। सुचरितोऽपि तेषां पार्श्वे समुपविष्टः। अथ सस्मितम् आचार्यः पृच्छति।

—प्राग्ज्योतिषपुरं नगरं पारेलौहित्यमिति श्रूयते। अस्मात् स्थानाद् दूरे प्राग्ज्योतिषमिति मन्ये? अपि राजमार्गः सुरक्षितः पथिकानाम्। किं गिरिर्न पथि व्यवधायको न वा नदी? अपि परमकारुणिकस्य कृपया कुशली त्वम्?

—अथ किम्। दयासिन्धोरनघा गुणा अक्षयाय अमृताय च सेवमानानां सर्वं कुशलम्। प्राप्तोऽहं नालन्दाविहारं पञ्चाधिकचत्वारिंशद्दिवसैः। नास्ति तत्र व्यवधायको गिरिः! मध्येमार्गं बह्व्यः नद्यः सन्ति। नदीतरपालः तत्रास्ति।

शुल्कदेयस्तरः। तासु हिमवत्प्रभवा सदानीरा दक्षिणसागरगामिनी करतोया स्मरणीया।

—कस्मिन् देशे सा नदी ?

—प्राग्ज्योतिषाख्ये राज्य एवेति मन्तव्या।

—किमर्थं मननम् ?

—सा करतोया एव प्राग्ज्योतिषाख्यस्य राज्यस्य पश्चिम-सीमा। तद्राज्यं शम्भुना निर्मितं पुरा। अथ कदाचिन् नरको नाम राजकुमारो विदेहादागत्य तद्राज्यं शशास।

—कथं वैदेहस्तत्र आगतवान्। किं तत्र शासको नासीत्? राजा राजपुत्रो वा।

—आसीद् राजा तथापि.... ....

—तथापि कथं महान् व्यतिकरः सञ्जातः ? राज्यहरणं नाम.... ....

—आचार्यपादैः सावशेषं श्रोतव्यं यदि कार्यातिपातो न भवेत्।

तस्य वचनं श्रुत्वा द्वि-त्रा यवीयांसो भिक्षवो मृदु भाषन्ते आचार्य-मुद्दिश्य।

—अस्माकमपि महती शुश्रूषा वर्त्तते। चेदाचार्यैरनुज्ञायते कथयितुमर्हति वैदेशिको ब्राह्मणः।

आचार्यस्तेषां परोक्षप्रार्थनां श्रुत्वा सस्मितं वदति।

—कथ्यतां यथावृत्तम्। पुरावृत्तश्रवणम् इतिहासकथनमनुज्ञातं पूर्वसूरीणाम्। पूर्वजानेव वयमनुसरामः।

अथाचार्यैरनुज्ञातः सुचरितो गात्रसञ्चालनपूर्वकम् आसने सुखमुपविशति। आचार्यमुखमवलोकयति। तत्रोपविष्टान् भिक्षून् प्रति तिर्यग्दृष्टिपातं कृत्वा किञ्चित्कालं तूष्णीं स्थित्वा कथयति।

—आसीद् विदेहेषु जनको नाम राजा। 'अथ कदाचिद् जनको वैदेहो बहुदक्षिणेन यज्ञेनेजे। तत्र ह कुरु-पाञ्चालानां ब्राह्मणा अभिसमेता बभूवुः। तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव। कः स्विदेषां ब्राह्मणानामनूचानतम इति। स गवां सहस्रमवरुरोध। ततो गवामेकैकस्याः शृङ्गयोर्दश-दश स्वर्णमुद्राः बद्ध्वा तान् ब्राह्मणान् होवाच—'भो भगवन्तः! यो वो ब्रह्मिष्ठः स एता गा गृह्णातु।'

अथ याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाच।

—सौम्य! एता गृहाण, नय अस्माकमाश्रमम्।

ततः क्रुद्धो वैदेहस्य होता अश्वलो याज्ञवल्क्यं पप्रच्छ।

—त्वं नु खलु याज्ञवल्क्य! ब्रह्मिष्ठोऽसि?

तच्छ्रुत्वा याज्ञवल्क्यो होवाच।

—नमो वयं ब्रह्मिष्ठाय कुर्म्मः। गोकामा एव वयम्।

ततो होताश्वलो याज्ञवल्क्यं कथं यजमानो मृत्योरार्त्तिमतिमुच्यत इति पप्रच्छ। याज्ञवल्क्यस्तु होत्रा वाचा अग्निनेति प्राह। तेनापरितृप्तो होताश्वलः पुनरपि अन्यत् पप्रच्छ। ततश्च आर्त्रभाग भुज्यु-उषष्ट-कहोलादयस्तत्र समवेताः ब्राह्मणास्तं पप्रच्छुः। अन्ते च विदुषी गार्गी तं प्रति द्वौ प्रश्नबाणौ चिक्षेप। याज्ञवल्क्यस्तां 'गार्गि! मातिप्राक्षीर्मा, मूर्द्धा ते पतिष्यती' त निरस्य आत्मतत्त्वं सम्यक् वक्तुमारेभे। यथा वा आत्मा........

एवं कथयति सुचरिते भिक्षूणां गुञ्जनमजायत। ते कथयन्ति 'न वयमात्मतत्त्वजिज्ञासवः, न वास्माकं शुश्रूषा वर्त्तते तस्मिन्।'

तान् विनिवार्य धर्ममित्रः सोपहासमिव कथयति।

—वत्स! अकाण्डे मा प्रयनं कुरु। कथं नरको वैदेहः प्राग्ज्योतिषं गतवान्। गत्वा च किमकुर्वत् तदेव वर्ण्यताम्।

—आं ज्ञातम्! सम्यक् स्मारितमाचार्यपादैः। जनक-याज्ञवल्क्यसंवादेनाहं दूरं नीतः। क्षामयेऽहं भवतः सर्वान्। प्रकृतमनुसरामः। आत्मतत्त्वज्ञो जनक उपरतः। तस्यान्वये बहवो राजानो बभूवुः। ते खलु यशसा बलेन विदेहविषय-मलञ्चक्रुः। सर्वे राजानो जनकनाम्नैव ख्यातिमाप्तवन्तः।

अथ गच्छता कालेन विदेहविषये कापालिका आगमोक्तविधानेन षट्कर्म-साधनं कुर्वन्तः राजधान्या नातिदूरे नद्यास्तीरे निवासं चक्रुः। ते खलु अवैदिका इति यज्ञभूमेः वहिरासते स्म। नरकपालं हस्ते कृत्वा भ्रमन्तस्ते जनैः कापालिका इति कथ्यन्ते। अथ कदाचिद् राजा जनक इतस्ततो भ्रमन् 'कापालिका कौल-साधने अणिमादिसिद्धिसाधने च समर्थाः' इति कापालिकदम्पतीमाजुहाव। आह्वान-प्रयोजनं ज्ञापयन् जनको विनीतं सिद्धिलाभं प्रार्थयते स्म। कापालिकेन जनको दीक्षितः कौलमार्गे। यथाकालं परशक्त्या नियोजितः साधने। शक्त्या मैथुनासक्तोऽनभ्यस्ततया राज्ञा लतागर्भे वीर्यं निषिक्तं धारकत्वाभावात्। कात्यायनी नाम्ना प्रसिद्धा सा शक्तिरन्तःसत्ता समजायत। अकापालिकः शक्त्या पुत्रोत्पादनमिति सा निष्काषितावधूतैः स्वकुलात्। अनन्यगतिकतया सा जनकमेवाश्रयं प्रापद्यत। राज्ञा कापालिकीति सा यज्ञवाटाद्बहिः विविक्तप्रदेशे वासिता। प्राप्ते काले कात्यायनी पुत्रं प्रासोष्ट। अथ कृतसंकेतो राजा निशीथे यज्ञवाटं गत्वा पुत्रं स्वगृहमानयामास। कात्यायन्यपि कापालिकीवेशं परित्यज्य जग्राह धात्रीवेशम्। कात्यायनी राजकुलधात्रीति जनकस्यान्तःपुरे तिष्ठन्ती स्वपुत्रं छद्मना वर्द्धयामास। राज्ञा यज्ञभूमौ पुत्रो लब्ध इति जनेषु प्रसिद्धि-रभवत्। मा कश्चित् प्रकृतं जानीयात्, कश्चिदस्मिन् विषये सन्देहापन्नः प्राश्निको वा माभूत् इति राजा स्वयमेव यज्ञवाटावधि यज्ञभूमिं हलेन दारया-मास। ततः कृषिभूमिरिव सा जनैरदृश्यत। जनकः स्वान्वयानुसारेण जनक इव बालकस्य नरक इति नाम व्यधात्।

अथ गच्छता कालेन नरको जनकस्यान्यान् सुतानत्यक्रमत शरीरेण वीर्येण रूपेण बलवत्तया धनुषा गदया च। धनुर्वेदे कोविदः शास्त्रार्थकुशलः वर्षैः षोड़शभिरन्यैर्दुरासदो बभूव। महाबलपराक्रमं तं तथाविधं दृष्ट्वा विदेहाधि-

पतिश्चिन्तामवाप। 'नूनमेष वीर्यवत्तमो न्यूनान् मनुपुत्रान् निरस्य राज्यं ग्रहीष्यति।' तं विमनस्कं विलोक्यापृच्छत् तस्य महिषी कारणमसौमनस्यस्य। प्रियया महिष्या पृष्टो जनकः अनिच्छन् अपि सर्वं कथयितुं प्रतिश्रृणोति दिनान्तरम्। निभृते स्थिता धात्री कात्यायनी महिषीभूपयोस्तत्संवादं श्रुत्वा चिन्तयति—'प्रतिश्रुतं राजावश्यमेव महिष्यै कथयिष्यति। तदा मम रहस्यं विदितं भविष्यतीति।' एवं चिन्तयन्ती कात्यायनी अपरेद्युः निशीथे केनाप्यनुपलक्षिता पुत्रेण सह विदेहराजस्य अन्तःपुरान् निष्क्रम्य गंगातीरं ययौ। ततश्च नौकया कतिपयैः सहचरैः नरको विष्णुसनाथः प्राग्ज्योतिषपुरमागतवान्।

स च देशः स्वराज्यार्थे पूर्वं शम्भुना गुप्तः। शैवैः किरातैश्च वासितः। मुण्डितमस्तका मद्यमांसाशनैकनिरता रुक्मस्तम्भनिभाः किराता पुरे ग्रामे च निवसन्तः हिमवदधित्यकां यावत् स्वच्छन्दविहारेण शम्भुमुपासयामासुः। तेषामधिपो घटको नाम वीर्यवान् महता चतुरङ्गबलेन शशास राज्यम्। जिघांसुं नरकं अस्त्रैः शस्त्रैश्च सुसज्जितं दृष्ट्वा घटको मदमत्तमैरावतनिभं चलन्तं जीमूतमिव हस्तिनमारुह्य पावक इव ज्वलन् नरकमाससाद। रणे रणैषिणं घटकं विष्णुनानुगृहीतो नरको जघान। हते नृपतौ पञ्चत्वमापन्ने च सेनाधिपे भीतिविह्वलाः किराता दक्षु दिक्षु पलायिताः। केचन च नरकं शरणं जग्मुः। ततो विष्णुनानुज्ञप्तो नरकः पलायमानान् किरातान् सागरान्ते निवास्य अन्यान् च यावद् दिक्करवासिनीं विद्रावयामास। दिक्करवासिनी तीक्ष्णकान्ता ललितकान्ता चेति द्विरूपा प्राग्ज्योतिषस्य पूर्वभागे स्थिता। तद् महद् राज्यखण्डं करतोयां समारभ्य यावद् दिक्करवासिनीं विष्णुना प्रदत्तं नरकाय। अनुशिष्टश्च तेन नरकः। 'जगत्प्रसूर्देवी महामाया योगनिद्रा कामाख्यारूपमास्थाय अत्र सदा तिष्ठति। ब्रह्मणः सुतो नदराजः लौहित्योऽपि अत्र प्रवहति। सैव त्वया आराधनीया। तामाराध्य त्वं राज्यश्रिया युक्तो द्वितीयो देवेन्द्र इव सदा शोभसे। यदा तु त्वं कामाख्यायां मन्दादरो भवेः तदैव तव विनाशः ....।

—ननु किं नाम निर्वचनं प्राग्ज्योतिषपुरम् इत्यस्य नामधेयस्य ?

कश्चित् छात्रः पृच्छति । सुचरितः कथयति ।

—साधु पृष्टम् । श्रूयतां पुराणनिर्वचनम् ।

—'अस्य मध्ये स्थितो ब्रह्मा प्राङ् नक्षत्रं ससर्ज ह ।'

ब्रह्मा पुरात्र ज्योतींषि नक्षत्राणि च सृजति स्मेति प्राग्ज्योतिषपुरम् । तान्त्रिकास्तु विवदन्ते । ब्रह्मा कदाचिन् नक्षत्रलोकान् नक्षत्रमेकमुत्पात्य अत्र स्थापयामास इति ते नामनिर्वचनं ब्रुवन्ति । परित्यागे वर्तमानस्य सृज् धातोः ससर्ज इति रूपं लिटि मन्तव्यं, नतु स्रजनार्थकस्य । तत् खलु स्मारयति अभिजिन्नामकस्य नक्षत्रस्य भचक्रात् च्यवनम् । यथा तथा वा भवतु । तदेव राज्यं कमरूपमिति ख्यातम् । हरनेत्राग्निनिर्दग्धः कामोऽत्रैव पुनरपि स्वीयं रूपमाप्तवान् इति अन्वर्थकं नाम ।

—का नाम एषा वार्ता कामस्य निर्दहनात्मिका ?

—कथं वा तेन पुनरपि रूपं प्राप्तम् ?

पृच्छति सकुतूहलं कश्चिद् विद्यार्थी । सुचरितः सस्मितं कथयति ।

—स्थाने खलु कुतूहलं विनेयस्य । शृण्वन्तु यदि सर्वैरनुमन्यते ।

—अथ किम् । अथ किम् । शुश्रूषास्मकं महती ।

तत्श्रुत्वा किंचिद् विरम्य सुचरितः कथयति ।

—श्रूयताम् । पुरा किल हिमवदधित्यकायां तपोनिरतं हरं सिषेवे हिमवद्दुहिता उमा । छिद्रान्वेषी कामस्तां पुरस्कृत्य कुसुमेषुभिर्मनःक्षोभं जनयामास महादेवस्य । ईषदुन्मील्य नयने महादेवः साभिलाष दृष्टिं पातयामास उमामुखाम्भोजे । ततश्च मनःक्षोभकारणमन्वेषयता महादेवेन नातिदूरे चूतवृक्षतले साचीकृतचापो मारो दृष्टः । दृष्टमात्रमेव नयनोत्थितेन वह्निना भस्मावशेषं मदनं चकार महादेवः ।

निशम्यैतत् स्थविरः सपदि ब्रूते ।

—मारकर्मेदं जगति प्रसिद्धम् । स सर्वदा मनःक्षोभं जनयति । तथागतः समाक्रान्तः सानुचरेण मारेण । वारं वारं समाक्रान्तोऽपि तथागतो भूमिस्पर्शमुद्रया मारं जितवान् । अत एव 'मारजिज् जिनः' इति देवैर्गीयते तथागतः ।

एवमुक्त्वा विरतः स्थविरः । सुचरितस्तु प्रकृतमनुसृत्य यथा शम्भोरनुग्रहात् कामः पुनारूपमवाप्तवान् तस्मिन् देशे, यथा च तस्मादेव प्राग्ज्योतिषाख्यं राज्यं कामरूप इति प्रसिद्धिं गतं तत् सर्वमानुपूर्व्येण कथयति ।

ततश्चापरो विद्यार्थी पृच्छति कथं नदराजो लौहित्यः ब्रह्मणः पुत्रो जात इति । सुचरितः पुराणकथां संक्षेपेण व्याख्याति ।

—आसीत् शान्तनुर्नाम राजर्षिः । तपस्तेपे स अमोघया भार्यया सह हिमालये । अमोघायामजनि जलमयः पुत्रो ब्रह्मणः ।

—कथम् अमोघायां पारस्त्रैणं पुत्रं ब्रह्मा जनयामास ?

पृच्छति कश्चित् श्रमणः ।

—न तत् प्रष्टव्यं, न तद् वक्तव्यं न तत् श्रोतव्यम् ।

इति स्थविरो वारयति शिष्यं सुचरितञ्च ।

—भवतु भवतु । चेदश्राव्यं न श्रोतव्यम् ।

इत्युक्त्वा सुचरितः पुनरपि कथयति ।

—शान्तनुर्जलमयं पुत्रं दृष्ट्वा चतुर्णां पर्वतानां मध्ये तं न्यवीविशत् । उत्तरे कैलासः, दक्षिणे गन्धमादनः, जारुधिः पश्चिमे शैलः, पूर्वे सम्वर्तकः । पर्वतवेष्टिते गिरिकुण्डे विवर्द्धमानं जलौघं कदाचिद् जामदग्न्यः परशुना वीथिं कृत्वा कामरूपमवातारयत् । स नदराजो ब्रह्मपुत्र इति जगतीतले प्रसिद्धः । कामरूपान् प्राप्य दक्षिणसागरं प्रवहति ब्रह्मपुत्रः । यस्मिन्, यस्य नदस्योभयतटवृक्षेषु केकास्वरेण नृत्यन्ति घनागमे मयूराः, यस्य च तोयौघं मत्तविलासिनी-कुचकुम्भ-निर्धौत-कालागुरु-चन्दन-पङ्केन मलिनायते, यस्य सलिले वीचिविक्षोभकम्पमाना नौश्रेणी नर्तक-

पुरुषाक्रान्ता वेपथुमती नटीव नरीनृत्यमाना विराजते, यस्य च तीरेषु वेतसी तरुतले व्रततीकुञ्जेषु सिद्धमिथुनैः सानुरागं गीयते राजगौरवगाथा, तादृशेन लौहित्येन सनाथे कामरूपे जितकामरूपो नरकः प्राग्ज्योतिषाख्यं पुरमध्युवास। द्वितीयामरावतीमिव तां पुरीं·······

सुचरिते एवं कथयति स्थविरः स्मितहास्येन वारयन् ब्रूते।

—वत्स ! कवित्वं तव अकाण्डे प्रथनम्। कथय संक्षेपेण। किमभवत् नरकस्य ? को वा इदानीं शास्ति तद् राज्यम्। वेलापचीयते।

—क्षन्तव्या मे वाचालता। कामरूपगौरवं स्मरता मया विस्मृतं प्रारब्धम्। प्रकृतमनुसरामि आचार्यशासनात्।

— "अथ गच्छता कालेन नरकस्य बाणेन बलिसूनुना सख्यमजनि विरूपाक्षस्यै-कपिङ्गेनेव। साहचर्य्याद् जातो मतिभेदो नरकस्य। कामाख्यार्च्चने वेदवादे च वीतश्रद्धो नरकः आसुरं भावमास्थाय सदेवेन्द्रान् दिवौकसान् जिगाय। प्रबल-दण्डी नरको राजा यां यां दिशमुदैक्षत तस्यामेव देवा नमश्चक्रुः। इन्द्रत्वमकरोद् दैत्यः, स एवाभूद् गणनायकः। त्रिषु लोकेषु विश्रुतमदित्याः कुण्डलयुगलं जहार नरको बलात्। आजहार च षोड़शसहस्ररूपयौवनान्विता देवगन्धर्वकन्यकाः। आकर्णायतविलोचनाः पीनोत्तुङ्गपयोधरास्तनुमध्यास्ता वराङ्गना नरकेण मणि-मये कृत्रिमाचले निवासिताः भोगार्थम्।

एतस्मिन्नन्तरे प्राग्ज्योतिषमागतो ब्रह्मसम्भवो मुनिर्वशिष्ठः महाचीनात्। 'कथं तारामाराधयेत्, कश्च पन्थाः' इति जिज्ञासया वशिष्ठो महाचीनं गत्वा साधकेन्द्रं परमं बुद्धं गणिकाशत-सेवितं मैथुनासक्तं च दृष्ट्वा परं विस्मयापन्नो जगाद आत्मगतम्।

"किमिदं क्रियते कर्म विष्णुना बुद्धरूपिणा।
वेदाचारविहीनोऽयं नाचारः सम्मतो मम॥"

विस्मयाविष्टं मुनिं नभोवाणी प्राबोधयत्—'मा विमनस्कतां भजत। अयमेव पन्थाः निःश्रेयसे सुखाय च।'

जातप्रत्ययो मुनिर्यथाज्ञप्तं सर्वं सेवितवान्। तस्मात् प्रत्यागत्य नीलाचले ताराभाराधयामास। एकस्मिन् दिवसे कामाख्यायोनिमण्डले तारामाराधयितुं गतस्य मुनेर्नरको न द्वारमदात्। भृशं कुपितो मुनिः शशाप नरकं कामाख्याञ्च। कामाख्या सपरिकरैरन्तर्द्धानं जगाम। नरकश्च निहतः कृष्णेन। ततश्च प्रावर्त्तत ताराराधनं वामभावेन। तत्पुत्रो भगदत्तो महता बलेन शशास राज्यम्। तस्यान्वये शुद्धिमति बहुषु मेरूपमेषु महत्सु राजसु गच्छत्सु प्राग्ज्योतिषं राज्यमिदानीं सुराजकं करोति भास्करप्रतिमो राजा भास्करवर्मदेवः।

एतद् वृत्तान्तं श्रुत्वा धर्ममित्रः पृच्छति।

—किमिदानीमपि तस्मिन् राज्ये तारा आराध्यते? कीदृशी चर्च्चा वर्त्तते अभिधर्म्मस्य त्रिपिटकस्य वाऽकीदृशमनुशीलनं पारमितायाः।

—न प्रचलति यथापूर्वम्। यत् प्रमाणपटवः आचार्य्याः न सन्ति तत्र। विद्यार्थिनो न जानन्ति प्रतीत्यसमुत्पादं, नानुशीलनं कुर्वन्ति पञ्चस्कन्धविज्ञानस्य। सुगतस्य सर्वज्ञत्वमपि वेदवादिभिर्न स्वीक्रियते, प्रत्याख्यातञ्च तर्कैः।

—अहो महत् कष्टम्। न तत्र कोऽपि विद्यते अनात्मवादख्यापनाय? भवतु कश्चित् तत्र प्रेषणीयः।

किञ्चिदात्मगतं तर्कयित्वा पुनरपि ब्रूते धर्ममित्रः।

—कीदृशं राज्यशासनम्? कथं वा राजा आचरति?

सुचरितः किं कथनीयमिति भृशं दोलायमानचित्तः कथयति।

—सुराजकं तद्राष्ट्रम्। स्त्रियश्चापुरुषाः सर्वालङ्कारभूषिताः निर्भया राजमार्गं रात्रौ प्रतिपद्यन्ते। स्थाणुपदारविन्द-परायणः परममाहेश्वरो राजा सर्वधर्मसमानव्रतमुद्यापयति। ब्राह्मणाः अग्रहारभूमिभक्तं भुञ्जते। चैत्य-विहारादीनि न सन्ति।

—कश्चित् तत्र प्रेषणीय इति किमनुमन्यते त्वया।

—अथ किम्। सर्वथा प्रेषणीयः।

—बाढ़म्! भवतु। कं प्रेषयामि। आं ज्ञातम्। रत्नमतिरेव श्रमणद्वितीयः प्रेषणीयः। भोः विद्यार्थिन्। मार्गं तस्य प्रयाणानुरूपं निदेशय। अचिरमेव रत्नमतिः श्रमणद्वितीयो मार्गादिजिज्ञासया त्वत्समीपमागमिष्यति।

इत्युक्त्वा धर्ममित्रो महास्थविराय कुलपतये शीलभद्राय निवेदयितुं गच्छति, आदिशति च सुचरितम्।

—त्वया बुद्धभद्रः उपस्थातव्यः अभिधर्मे निपुणः स एव पाठयिष्यति त्वाम्।

———

११

पथश्रमेण क्लान्तौ श्रमणौ मौनमध्वानं गच्छतः। वक्रः पन्थाः नदीमुपतिष्ठते। वनस्पतयो गुल्माश्च मार्गमुभयतः परस्परस्पर्द्धयेच मार्गमवरुध्य आसते। उद्घाटिनी भूमिः। उपलविषमैः समाक्रान्तश्च पन्थाः। गमनं कष्टकरं, पिपासा बाधते तौ। श्रमणयोः एको विंशतिवर्षदेशीयः, अपरस्तु ज्यायान् पञ्चदशभिर्वर्षैः। ज्येष्ठस्य स्कन्धे वस्त्रेण मञ्जिष्ठाराग-रञ्जितेन बद्धयोर्ग्रन्थयोरेकः सम्मुखे विलम्बमानः, अपरश्च पृष्ठदेशलग्नः। हस्ते च तस्य ग्रन्थिकुटिला यष्टिः। यवीयसः स्कन्धे चीवरपुटकमास्तरणञ्च। सद्योमुण्डित-मत्तहूण-चिबुक इव मुण्डितमस्तकयोस्तयोः चिबुकौ सूर्य्यरश्मिस्ताम्रतां नीतौ। अहिमरश्मिपातेन तयोर्मुण्डिततालु दर्पणतां विडम्बयति। तयोः कपोल-ललाटवदन-गण्डस्थले स्वेदबिन्दुभिः पदं क्रियते। उत्तरीयांशुकेन मुखं संमार्ज्य ज्येष्ठः कनीयांसं परावृत्य कथयति।

—भो गुणोत्तर! अदूरे नदी प्रवहन्ती दृश्यते। नद्याः पूर्वं क्रोशेन विहार इति श्रुतो जनमुखात्। अपि पश्यसि लोहितायति भास्करः? त्वरतां, त्वरतां नदीसमुत्तरणाय। विहारोऽस्माभिः समासादयितव्यः पश्चिमसन्ध्यातः प्रागेव। रात्रौ श्वापदसङ्कुले वन्ये प्रदेशे तमसावृते पथि न गन्तव्यम्। इदानीमेव परिणामरमणीये दिने सम्प्राप्तायां सन्ध्यायां शार्दूला मृगयार्थं लतागुल्मच्छायां परित्यज्य अलसमन्थर-पदक्रमैः समन्तादाविर्भविष्यन्ति निःशङ्कम्। मो गुणोत्तर! शशकप्लुतिं भजत। गच्छन् कालो नापेक्षते कमपि।

तच्छ्रुत्वा गुणोत्तरः कथयति।

—एषोऽहं भ्रातः! एषोऽहं त्वरामि। ननु भवत्पृष्ठलग्न एव गच्छामि। अपि ज्ञायते भवद्भिः किं शुल्कदेयः नदीतरः, कियत् कार्षापणं प्रदेयम्?

—तच्छ्रुत्वा रत्नमतिः किञ्चिद् विहस्य कथयति।

—गुणोत्तर! मा ते उत्कण्ठा स्यात्। शुल्कदेयं निःशुल्कं वा यथा तथा वा भवतु।

अस्माभिस्तरणीया नदी। न हि नाव्या नदी बाहुभ्यां सन्तरणीया। किं न स्मरसि श्रावकप्रदत्तं कार्षापणशतमस्ति पेटिकाभ्यन्तरे? तस्मादेव नाविकस्य तरण-शुल्कं भवेत्। नास्माकं कार्षापणेन प्रयोजनम्।

गुणोत्तरः पुनरपि पृच्छति।

—जिज्ञासा मां चपलायते, नोदयति च परिप्रश्ने। का नाम एषा नदी? किं सदानीरा उत ऋतुप्रवहा? श्रुतं किंचिद् ज्ञातं वा भवद्भिः?

—अथकिम्। श्रुतं बहुशो मया। श्रूयताम्। इयं दक्षिण-सागरगामिनी सदानीरा करतोया। एषा पौण्ड्रान् नित्यं प्लावयति। पुरा किल हर-पार्वत्योर्विवाह-काले हरकर-च्युतेन तोयेनेयं जाता इति करतोया नाम्ना प्रथिता भुवीति पौराणिकसंवादः।

—आस्तां पौराणिकी कथा। नाहं श्रद्दधे। का तावदिदानीन्तनी वृत्तिः?

—करतोयां समारभ्य दिक्करवासिनीपर्य्यन्तं प्राग्ज्योतिषाख्यं राज्यम्। पुरा कदाचिद् विदेहो माधव इति श्रुतो जनो यज्ञीयाग्निं मुखे धृत्वा बाहुभ्यां करतोयां समुत्तीर्य्य प्राग्ज्योतिषमाजगाम। ततः स तस्मिन् राज्ये यज्ञेषु पश्वालम्भनमारेभे। ततः········

तं वारयन् गुणोत्तरः स्वीयासहिष्णुतां प्रकटयन् ब्रूते।

—अहो धिक्! अहो कष्टम्! अहो वैधेयता जनानाम्। न वक्तव्यं, न श्रोतव्यं पश्वालम्भनम्।········सदयहृदय-दर्शित-पशुघातेन तथागतेन पश्वालम्भनं सर्वथा प्रतिषिद्धम्। परमकारुणिकेन धर्मराजेन जरामरण-दुःखहानये चत्वारि आर्य्य-सत्यानि प्रकटीकृतानि। तानि समाचरणीयानि न इतराणि। किं स्मरति भवान् सर्वं शून्यम्।

—सत्यं गुणोत्तर! सत्यम्। सर्वं खल्विदं शून्यम्। परमहं पुरावृत्तं श्रावयामि ते।

इति कथयति रत्नमतिः।

एवं जल्पन्तौ श्रमणौ किञ्चिदग्रतो गत्वा नदीतीरे पर्णशालामपश्येताम् आरात्। तदेव घट्टपालगृहमिति तदभिमुखं यावद् गच्छतस्तावत् पर्णकुटीराभ्यन्तरादागता

सुमधुरगीतिः श्रुतिपथं श्रमणयोः। अविदितार्थोऽपि सा गीतिः श्रमणयोः कर्णकुहरे मधुधारां वमतीव सपद्येव तयोश्चित्तप्रवणतां जनयति मनोऽनुकूले विषये। शीलं स्मरन्नपि रत्नमतिः कष्टेनापि चित्तप्रवणतां निवारयितुमसमर्थः कौतूहली जातः। मनसा कुटीरं धावन्नपि शनैः शनैस्तदभिमुखं गच्छन् गुणोत्तराभिप्राय-जिज्ञासया व्याजेन तं पृच्छति।

—अयि गुणोत्तर! उटजात् क्रन्दनध्वनिरिव श्रूयते। अपि श्रुतं त्वया। मन्ये काचिद् रमणी जरामरण-दुःखमनुभवन्ती करुणं रोदिति। तस्या दुःखहानये यतितव्यमस्माभिः।

—नहि, नहि आर्य्य! काचिन् नारी मधुरं गायति। माधुर्य्यं गीतस्य चित्ताह्लाद-करम्। स्वरग्रामः सुसमः प्रतिभाति।

—तर्हि समीपं गत्वा मनोऽनुकूलं श्रोतव्यम्। चेत् कुतूहलमग्रतो भव।

ततो गुणोत्तरः कुटीराभिमुखं द्रुतं गन्तुकामः कानिचित् पदानि गत्वा किञ्चित् मनसा स्मरन्निव गमनाद् विरम्य परावृत्य पश्चादागतं रत्नमतिं विलोकयति। ततश्च प्रकाशं ब्रूते।

—आर्य्य! वेरमणीयमिदं गीतश्रवणम्। गायति च कापि रमणी। कथमस्माभिः रमणी द्रष्टव्या। गीतश्रवणं रमणी-मुखदर्शनं, सर्वं शीलनाशाय भवेत्। न जाने किं करणीयमस्माभिः।

गुणोत्तरस्यैवं भाषणं श्रुत्वा दृष्ट्वा च तस्य किंकर्त्तव्यविमूढत्वं रत्नमति स्मितहास्येन तमाश्वासयति।

—मा भैषीः गुणोत्तर! मा भैषीः। 'गायन्तं स्त्रियः कामयन्ते' इति खलु श्रुतिः। गायन्तीं पुरुषः कामयते इति नास्ति प्रवादः। गीयतां नाम रमणी गीतम्। नद्येव तरणीया अस्माभिः, न द्रष्टव्या रमणी। मुखावलोकनं मा कुरु, कुरु पदाव-लोकनम्। गच्छावो नदीं, नहि उटजद्वारम्। मा भैषीः। एह्येहि।

अथ तौ नद्यास्तीरं प्राप्तौ। नदीगर्भे ताभ्यां दृष्टा तरीः, न तरीवाहकः। जनशून्यं तीर्थम्। मृत्तिकानिर्मिता सोपानपंक्तिः क्रमान् नीचैर्याति। वाहकविहीनां तरीमवलोक्य यावत्तौ किं करणीयमिति चिन्तान्वितौ पश्यत इतस्ततः, तावत्

उटजाभ्यन्तरान् निष्क्रम्य तरपालकन्या अस्पष्टं किमपि गायन्ती घट्टाभिमुख-मायाति। प्रोद्भिन्नयौवनां स्मेराननामनवद्याङ्गीं तां सुन्दरीं दृष्ट्वा गुणोत्तरो नदीजलं विलोकयति। रत्नमतिस्तु चञ्चलपदक्रमेण आगच्छन्तीं कन्यां निर्निमेष-नयनाभ्यामापिबन्निव मनसा वारं वारं तां जिघृक्षुरिव गन्तुकामोऽपि पश्यन् स्थितः। श्रमणयोः समीपमागत्य घट्टपालकन्या स्मितपेशलया सुधामधुरया गिरा सप्रश्रयं तौ. पृच्छति नमस्कारपूर्वकम्।

—बुद्धं शरणं गच्छामि। श्रमणाभ्यां नमः। इयं वराकी मदनलेखा नाम घट्टपालकन्या, या खलु वर्षपूगान् षोड़शाधिकान् व्यर्थं गमयित्वा अद्य वसन्तावसाने रम्ये दिवसोपरमे अत्रभवतां दर्शनेन आत्मनो यौवनं जीवनञ्चाधुना सप्रयोजनं मनुते। ननु पृच्छ्यते, कुतो भवन्तः? कुत्र वा गन्तव्यम्? किमर्थं वा अस्मिन् निर्जने नदीतीरे सायंसन्ध्यायां मेघाच्छन्ने नभसि समुपस्थितौ भवन्तौ? अपि शीलग्रहणेन जितो मारः मारजित्-शिष्याभ्याम्? अथ जितप्रायोऽपि बाधते मारः श्रमणौ?

मदनलेखायामेवं कथयन्त्यां गुणोत्तरः रत्नमतेः कर्णे मुखं दत्वा तमुपांशु पृच्छति विक्षुब्धेन मनसा।

—भो भ्रातः! अपि रमण्या विश्रब्धं सम्भाषमाणानामस्माक शीलखण्डन न स्यात्? कथं वेरमणीयश्रवणात् शीलं रक्षावः? अस्यां दशायां किं करणीयम्? कथं वा अखण्डितशीलौ आवामस्या वाचा वाचं मिश्रयावः? किं प्रत्यागमिष्यावः? उपायश्चिन्तनीयः।

गुणोत्तरे एवं व्याकुलं प्रजल्पितवति मदनलेखा पुनरपि द्वित्रापदमागत्य गुणोत्तराभिमुखं स्मितहासप्रोद्भासितदन्त-सितिम्ना तं स्नापयन्तीव पश्यति। गुणोत्तरः किञ्चिदन्यद् विलोकयन्निव स्थितः। अनिच्छन्नपि हृच्छयेन अनन्यजेन बलादिव नियोजितस्तामेव तिर्य्यगवलोकयति क्षणं क्षणम् अन्यतो पश्यति रत्नमतिः। स्वात्मगतमिव गुणोत्तरः पुनरपि रत्नमतिमुद्दिश्य कथयति।

—आं ज्ञातम्। भूमिस्पर्शमुद्रया तथागतेन प्रदर्शितः पन्थाः। अस्माभिरपि तदेवाचरणीयम्। परन्तु दण्डायमानाभ्यां कथमावाभ्यां भूमिस्पर्शमुद्रा

विरचनीया ? भवतु। चरणाग्रगतां भूमिं नखेन दृढं विधृत्य तदेवावलोक्य प्रत्युत्तरं प्रदेयम्।

मदनलेखाया मुखं निर्वर्ण्य स्थितस्यानन्यमनसा रत्नमतेः गुणोत्तरप्रजल्पनं न कर्णकुहरं प्राविशत् न वा बोधगम्यमभूत्। तस्या नयनयोर्नयने निपात्य रत्नमतिश्चिन्तयति। चित्रं ! एकोऽपि मारोऽस्याः नयने युगपत् पदं करोति। अपि काकाक्षिगोलकन्यायेन एकोऽपि द्वित्वं भजते, उत अलातचक्रवत् विराजते ? किं निखिलभुवनसौन्दर्य्यमस्याः नयनयोः पुञ्जीभूतम् ? अथवा लावण्यवारां निधिरस्याः सर्वावयवेषु विराजते इति नयने अस्या नीलत्वं भजतः ? किमेषा मम मनसि स्थिता वस्तुरूपेण बहिः प्रकाशते अवस्तुस्वभावे जगति ? अन्यथा कथमस्याः सौन्दर्य्यं मम चित्ते प्रकाशितं भवेत् ? नाहं जाने। भवतु यथा तथा वा। न निर्वर्ण्यं परकलत्रं, विशेषतः अस्माभिः श्रमणैः। ननु, कुत्र कलत्रता ? इयं खलु यौवनाढ्या कन्या। भवतु नाम कन्या, कलत्रं वा, अस्याः मनोज्ञं रूपं मदनोन्माथकारि। शीलग्रहणेनास्माभिः प्रत्याख्यातं रूपम्, सशब्दो गन्धः, स्पर्शस्तु सर्वथा दूरे स्थितः। रूपं वेरमणीयं, रसाकांक्षा मा भूत्। शब्दे च न रमणीयं चित्तेन। तर्हि कथमस्यां मम मनो रमते ? कथं वा अशालीनेव मम दृष्टिर्वारं वारं तां प्रति गतायाता। यद्यपि दृष्टिर्मम गता प्रत्यावृत्ता च लज्जया स्थातुमसमर्था, मनस्तु रमणाकांक्षि तस्या वक्षस्येव दृढं प्रोथितं मन्ये। अहो नैतद् युक्तम्। किं मया अनार्य्यमाचरितम्। अकरणीयं मनसा चिन्तनमपि गर्हितम्। नैतद् युक्तम्। जानामि सर्वं, तथापि ....। मन्ये दृशा दग्धं मनसिजमेषा दृशैव सञ्जीवयति जगज्जयाय। अत एव उक्तं भवति 'कः काममतिलङ्घयेत्।' न जाने किं सुखमनुभवति पुरुषः ललनाश्लेषे अधरचुम्बने च....। चिरवञ्चिता वयम्। आत्मवञ्चनं किं श्रेयसे भवेत् ? तर्हि काषायवमेस्त्रतत् क्षिपामि दूरम्— विस्मरिष्यामि शीलम्....। अहो महत् कष्टम्। मामैवं करणीयम्। श्रमणत्वं मूर्द्धनि रक्षितव्यम्।

"नमो तस्स भगवतो अरहतो सम्मा सम्बुद्धस्स।"

एवं चिन्तयति रत्नमतौ मदनलेखा सान्तर्हासं तमुद्दिश्य कथयति।

कथं मौनावलम्बनं कृतं भदन्तेन ? किं मम शब्दाः विस्पष्टतां न भजन्ते ?

अथवा म्लेच्छितप्राया इति सम्यगर्थविबोधो न भवति ? ननु भवतां वाचो विभिद्यन्ते वैदेशिकानां मम वचः ? उच्यतां शीघ्रं किं नदी तरणीया उत रात्रिर्यापनीया ? पश्य मेघैर्मेदुरमम्बरं तड़िज्झञ्जां सूचयति । उन्नतपयोधरं वीक्ष्य यदि गमनेच्छा तिरोहिता कुटीरेऽस्मिन् क्षणदा क्षणमिव यापनीया । भूमिशयने शयानानां त्रियामा अविदितगयामा भवेदिति नात्र संशयः । तर्हि आगम्यताम् उटजाभ्यन्तरं रोचते चेत् पानादिकम्…….. ।

तच्छ्रुत्वा रत्नमतिः सुप्तोत्थित इव ब्रूते !

—अथकिम्, अथकिम् ! न हि न हि । शीघ्रमेव नदीं समुत्तीर्य्य गच्छामो वयम् ।

—तर्हि त्वरतां त्वरताम् । वेलापचीयते । मेघाच्छन्नं नभः । अविलम्बेन वृष्टिः करकापातश्च भवेदिति मन्ये ।

—ननु कुत्र तरपालः ? कुत्र वा नाविकः ? को नौकां वाहयिष्यति । न वयं स्वतो नदीतरणे समर्थाः, न वा वहित्रवाहने दक्षाः । कथं वयं तरीमपरतीरं नेष्यामः ?

तच्छ्रुत्वा मदनलेखा उच्चैर्विहस्य ब्रूते ।

—मा भैषीः । अहमेव नौकां वाहयिष्यामि । अशिक्षितनिपुणाहं क्षेपणिधारणे । मम पिता घट्टपालो मामेव तरण-कार्ये नियुज्य कार्य्यानुरोधाद् ग्रामान्तरं गतः । श्वापदसङ्कुले मार्गे घनान्धकारे रात्रौ न स प्रत्यागमिष्यत्यद्य । अत इयमेव वराकी कालोचितं करोतु । एह्येहि, तरीमारोहतम् ।

एवमुक्त्वा मदनलेखा नावमारुह्य शीर्षं गत्वा क्षेपणिं गृह्णाति । वामचरणमधो विलम्ब्य नौकातः किंचिज्जलम् अङ्गुल्यग्रेण समुत्क्षिप्य स्मेरानना सा पुनरपि श्रमणौ आह्वयति । अनभ्यस्ततया शंकया च जरत्पदक्षेपेण तौ नावमारोहतः । ततः रत्नमतिः किंचित् स्मरन्निव पृच्छति मदनलेखाम् ।

—ननु पृच्छ्यते भवती । नास्माभिर्ज्ञायते कियान् तरशुल्कः ?

—किं तदपि प्रष्टव्यम् । उच्यते । नदीमुत्तरता कार्षापणद्वयं प्रदेयमिति राजाज्ञा । सौगतानां विद्यते किं तावान् विभवः ?

मदनलेखा सोपहासमिव पृच्छति ।

इदानीं यावद् गुणोत्तरो मौनमास्ते । सोपहासोक्तिं श्रुत्वा असहिष्णुतयेव परुषं ब्रूते ।

—नास्माकं सौगतानां विभवा शौवस्तिकत्वं व्रजन्तीति सत्यम् । परं धनं नास्तीति नास्माक जिज्ञासा, शासनमधिकृत्यैव परिपृच्छा । अपि श्रमणैरपि तर-शुल्कः प्रदेय इति ?

मदनलेखा सप्रतिभं ब्रूते ।

—सर्वथा प्रदेयम् । सर्वैः ब्रह्मण-श्रमणैः निर्गन्थैश्च प्रदेयस्तरशुल्कः । 'सीताभोगो बलिः करो वणिक् नदीपालस्तरो नावः पट्टनमित्यादिकं राष्ट्रम्' इति कौटिल्योक्तं किं न श्रूयते भवद्भिः । नरेन्द्रगुप्तशासिते महींमण्डले श्वापदा अपि राजाज्ञां परिपालयन्ति । किमुत विद्वांसो ब्राह्मणाः शीलसम्पन्नाः श्रमणाः ।

एवं कथयन्त्यां मदनलेखायां गन्तुकामयोश्च तयोः श्रमणयोः पश्चिमदिशः वातः प्रवहति महता वेगेन । वृक्षशाखाः मर्मरायन्ते, तरङ्गाश्च विक्षुब्धाः, वारं वारं तीरे समास्फालनं कुर्वन्ति व्यर्थरोषेण । घनघोरगर्जनेन वृष्टिः समा-याता । करकापातश्च सञ्जातः । भीतत्रस्तौ श्रमणौ मदनलेखामनुसृत्य द्रुतमुटजं प्रविष्टौ । कुटीराभ्यन्तरं प्रविश्य मदनलेखा द्वारं सार्गलं कर्त्तुं यावत् यतते तावद् वातेन पुनः पुनः द्वारमुन्मुक्तं करोति । वृष्टिरपि उन्मुक्तद्वारेणाभ्यन्तरं सार्द्रं करोति । सहसा सौदामिनी सर्वं क्षणं प्रकाशयति । श्रमणौ द्वावपि द्वारं पिधातुं यतेते । महता यत्नेन मदनलेखा द्वारमर्गलयुक्तं करोति । इत्यवसरे महान् वज्रपात-शब्दः श्रुतस्तैः । वज्रपतनेन कुटीरसमीपस्थः पिप्पलवृक्षः द्विफालो जातः । वज्रपतनेन वृक्षपातेन च महान् कोलाहलः सञ्जातः । तमसाच्छन्ने कुटीराभ्यन्तरे श्रमणौ बालिकां भीतत्रस्तौ समालिङ्ग्य एकपिण्डीभूय तिष्ठन्तौ आत्मानं रक्षितुकामौ । सापि ताभ्यां रक्षितौ इव तिष्ठति । क्षणाच्च सर्वे

सचेतनतां गताः। श्रमणौ किञ्चिद् दूरं गतौ तां विमुच्य। मदनलेखापि जात-प्रत्यया शय्यायामेव तावुपावेशयत्।

ततः कियान् कालो व्यतीतः न केनापि ज्ञातम्। क्रमाद् वर्षणं क्षीणतां गतम्। वातस्य वेगोऽपि प्रशमितप्रायः। मदनलेखा महता श्रमेण तुषाग्निं प्रज्वाल्य पानीयमाहरति। पानीयं फलञ्च ताभ्यां प्रदाय सा स्वभावमधुरया गिरा कथयति।

—प्रलयकालः समागत इति मन्ये। दिष्ट्या रक्षिताः। भवतु, प्रातकालमाचरणीयम्। सन्ध्या समुत्तीर्णा। कथञ्चिद् जठराग्निं निर्वाप्य शयनीयमशून्यं कुर्वन्तु भवन्तः। एतत् पानीयं मधुमिश्रितम्। एतानि पक्कफलानि। गृहीत्वा भवन्तः अनुगृह्णन्तु माम्। एतदेवातिथ्यं स्वीकुर्वन्तु, नान्यद् विद्यते विभवविहीनानामस्माकं गृहे।

किं कथनीयं किं वा करणीयमिति सहसा विनिश्चेतुमसमर्थौ श्रमणौ तूष्णीमासाते। फलानि पानीयं च गृहीत्वा रत्नमतिः कथयति।

—साधु भद्रे! साधु त्वया आतिथ्यं कृतम्। रक्षितौ चावामाकालिकप्रलयात्। परमकारुणिकस्यैव करुणा।

'नमो तस्स भगवतो अरहतो सम्मासम्बुद्धस्स।'

यद्यपि गुणोत्तरो वाचा वाचं न मिश्रयति न वा कमपि पश्यति तथापि मौनं तस्य हृद्गतं जिज्ञासमाना मदन लेखा तमुद्दिश्य पृच्छति।

—युवा श्रमणस्तु मौनालम्बनं कुर्वन् विराजते। किमेतत् स्थानं पानीयादिकं च न रोचते तस्मै?

तच्छ्रुत्वा गुणोत्तरः केवलं 'हुम्' इति कथयन् पुनरपि चमसात् पानीयं गृह्णाति।

ततश्च मदनलेखा तौ ब्रूते।

अस्यां शय्यायां भदन्तः कष्टेन रात्रि यापयतु। स्थानमेतद् वृष्टिजलेन प्लावितं शयनाननुकूलं भवति। अतो गृहस्य अपरभागे श्रमणस्य कृते शयनं विरचयामि भूमौ।

भूमिशय्या कठिनापि श्रमणस्य कृते यथा सुखोपभोग्या भवेत् तथा यतिष्ये। नात्र शंका करणीया। अहं पुनर्मम पितृस्वस्रा स्वीयशय्यायामेव स्वपिमि अप्रमत्ता। जरती मम पितृस्वसा श्रवणबधिरा मद्गतप्राणा शयाना तिष्ठति। सुखाय भवतु यामिनी।

इत्युक्त्वा मदनलेखा गुणोत्तरं हस्ते धृत्वा बलादाकृष्येव कक्षान्तरं नयति। सा सोपहासं कथयति।

—पश्यतु, एषा श्रमणस्य कृते विरचिता शय्या मया। 'भूमिशय्या वाताय' इति वैद्योक्तिमविगणय्य शय्येयं सप्तमस्वर्गसुखदायिकेति मन्तव्या श्रमणेन यूना। मन एव हि कारणं सुखदुःखयोरिति भवद्भिरेवोक्तम्। अपि रोचते ते शय्या?

गुणोत्तरस्तु 'हुम्' इति सानुनासिकं ब्रूते, नाधिकं किंचित्?

कियत्कालानन्तरं पुनरपि मेघगर्जनेन वृष्टिः प्रबलतरा जाता। स्थूलवर्षण-बिन्दवः तालीषु तारं विटपीषु सान्द्रं शब्दायमाना अश्रूयन्त। वृक्षशाखानां पत्रमर्मरः श्रुतः। तरंगविक्षुब्धा नदी तीरं प्राप्यास्फालनं करोति। सौदामिनी कुड्यान्तरेषु प्रविश्याभ्यन्तरं घनोपगूहनेन तरुण्या वेष्टितं युवानं दृष्ट्वा लज्जयेव क्षणात् पलायिता। तमसाच्छन्ने गृहाभ्यन्तरे पुनरपि तयोः कवोष्णं निःश्वसितं वेगेन प्रवहता शीतेन वायुना प्रशामितम्। जिह्वायुद्धपूर्वकः चुम्बनशब्दः रदनच्छददानेनानुसृतः वृष्टिशब्देन तिरस्कृतः। सीत्कृतानि पत्रमर्मरशब्देनाधरीकृतानि नाश्रूयन्त केनापि। तानि तयोरेव श्रुतिपथमागत्य रागं जनयन्ति नितराम्। वर्षणमुखरायां रात्रौ सुप्तेषु जगत्सु तमिस्रायां सृष्टेः प्राक्काले विहरन्ताविव तौ न जानीतो बाह्यं किमपि।

अथ प्रभातप्रथमयामे कृतनित्यक्रियः रत्नमतिर्गन्तुकामः गुणोत्तरमाह्वयति। न तत्र प्रत्युत्तरम। अन्विष्यमाणोऽपि न स दृष्टः। कुत्र स गतः। न जानाति रत्नमतिः। मदनलेखापि किं न जानाति? कथं जानीयात् सा वराकी?

रत्नमतिः स्थविरादेशं पालयन् एकाकी प्राग्ज्योतिषपुरं गतवान्।

———

१२

चारमुखाद् हर्षस्य गौडाभियानं शशाङ्कस्य च चेष्टितं श्रुत्वा प्राग्ज्योतिषेश्वरश्चिन्तयति—किं करणीयमिति । 'सर्वथा राज्यं रक्षणीयं, हृतं कर्णसुवर्णमण्डलञ्च पुनरपि अस्माभिर्विजेयम् । कार्यस्यास्य सम्पादने कृत्रिमेण मित्रेण प्रयोजनम् । समयोऽपि अनुकूल इव दृश्यते । अस्यां स्थितौ ममारातेः शत्रुर्हर्षः मम कृत्रिमं मित्रं भवेत् । भ्रातृवैरिणं शशाङ्कं जिघांसुः स अवश्यमेव मम मैत्रीं बहु मन्येत । एकत उत्तरापथाधिपतिर्हर्षः, अन्यतश्च पूर्वदेशानामधिपो भास्करवर्मा । मध्ये गौडाधिपः शशाङ्कः द्वाभ्यां समाक्रान्तः पलायनपथं न द्रक्ष्यति । समूलघातं कण्टकः नश्येत् ।' एवं विचिन्त्य मन्त्रणार्थं प्रधानामात्यम् आर्यगुणं राणक सान्धिविग्रहिकञ्च आह्वयति राजा । समागतेषु तेषु राजा निवेदयति चारकथितं वृत्तान्तम् । ततस्तैः सम्मन्त्र्य निश्चितन्दूतः प्रेषणीय उत्तरापथाधिपतये हर्षवर्द्धनाय शीघ्रमिति । ततश्च पृच्छति प्रधानामात्यम् राजा ।

'दूतो यथोक्तवादी देश-भाषाविशारदो वाग्मी, मेधावी, परचित्तोपलक्षको, वपुष्मान् भवेदि'ति शास्त्रकाराः । अपि ज्ञायते भवता को नु भारस्य एतस्योद्वहने समर्थः स्यात् ? कार्यमस्माकं सम्पादयेत् ?

राज्ञा एवं पृष्टो बहुशो विमृश्य महामात्यो निवेदयति ।

—एकस्य स्मरामि । विशेषतोऽस्मिन् समुपस्थिते कार्य्ये दूतः न केवलः सन्देशहारकः । राज्ञामभिप्रायं वाञ्छितञ्च निवेद्य दूतेन युक्त्या साधनीयं कार्यजातमिति । एतादृशस्य कार्यस्य साधने विज्ञातदेशकाल इङ्गितज्ञो वाक्पटुर्दक्षो वीतभी हंसवेग एव प्रशस्यते । तं हित्वा नान्यं पश्यामि । देवपादा अपि तस्य संस्मरन्तीति मन्ये ?

राजा तु 'स्मरामो'ति उक्त्वा 'सोपढौकनः स एव प्रेषणीय' इति समादिशति । 'समाहृतेषु बहुमूल्येषु उपढौकनेषु पत्रं गृहीत्वा वाचिकं सन्देशं च सम्यग् मनसि कृत्वा गच्छतु हंसवेगः प्रभूतेन अनुयायिना हर्षवर्द्धनं प्रति ।' एवं समादिश्य कार्यजातं राजा स्वनिवेशं गच्छति ।

सान्धिविग्रहिकस्तु यथानिदेशं विविधलिपिपठनलेखन-दक्षं लिपिकमाहूय यथा संदेशो विरचनीयस्तथा चेतयति। 'ईश्वरस्य वंशपरम्परा राज्यश्रीः वर्णनीया, बलस्य चोल्लेखः करणीय इति।' ततश्च समाहर्त्रा समानीतेषु विविधबहुमूल्य-द्रव्य-जातेषु सान्धिविग्रहिको हंसवेगमेवमनुशास्ति। 'एतत् पत्रं, एतानि विचित्राणि उपढौकनानि, एतच्च वारुणं छत्रं, एते स्वामिसेवानिरताः समर्था अनुयायिनः। एतैरनुगम्यमानो मौहूर्त्तिकनिर्दिष्टे शुभे क्षणे गच्छतु भवान् राजानं हर्षवर्द्धनं प्रति। विनिवेद्य एतानि उपढौकनानि पत्रं प्रदेयं विजिगीषवे तस्मै राज्ञे। ततश्च निवेदनीयो वाचिकः सन्देशो देशकालोचितनियममनुसृत्य, यथा गौड़देशं विजिगीषुणा तेन पराक्रान्तेन भूपेन अस्माकं महाराजाधिराजस्य भास्करवर्मदेवपादस्य सख्यं जायते, तथा स्नेहस्नपितया गिरा करणीयम्। एतत् कार्यमप्रमत्वेन विश्वस्ततया राजानं माञ्च प्रमाणीकृत्य निवर्तनीयम्। श्रूयते चारमुखात् पारेगङ्गं कोजाङ्गलप्रदेशे निवेशितस्कन्धावारः कालमपेक्ष्य सुखमध्यास्ते देवो हर्षः।'

—अपि गृहीतः सन्देशः? साधु, गच्छ। पन्थानः सन्तु ते शिवाः।

सान्धिविग्रहिकस्य यथानिदेशं हंसवेगो वातप्रमिना अश्वेन अनुयायिभिश्च अचिरमेव कोजाङ्गलमण्डलं गतः। मासाभ्यन्तर एव समुपस्थितस्तत्र हंसवेगः। ततः प्रतीहारः प्रणम्य विज्ञापयति हर्षम्।

—देवः प्राग्ज्योतिषेश्वरेण भास्करवर्मणा प्रहितो हंसवेगनामा दूतोऽन्तरङ्गतोरणमध्यास्ते।

तच्छ्रुत्वा राजा 'तमाशु प्रवेशय' इति समादिशति। राजादेशानुसारं प्रतीहारो हंसवेगस्य मार्गमादिशति। अनन्तरं हंसवेगः प्रभूतेनानुयायिना पुरुषाणां समूहेन अनुगम्यमानः प्रविशति राजाधिष्ठानम्। आरादेव दृष्ट्वा राजानं प्रणमति। 'जयति जयति देवः' इति च वारं वारम् उच्चारयति। राजा तु समागतं हंसवेगं सुपुरुषमवधार्य 'एह्येहि, अत्रोपविश' इति आसनं प्रदर्शयति। राज्ञा समाहूतो हंसवेगः समीपं गत्वा भूयोऽपि राजानं प्रणम्य आसनमुपविशति। ततः पृच्छति राजा।

—हंसवेग ! अपि ते पन्थाः सुरक्षितः ? आगमनं सुखदम् ? श्रीमान् क्वचित् कुशली कुमारः प्राग्ज्योतिषेश्वरः ?

—अद्य कुशली येनैवं सस्नेहं सगौरवं पृच्छति देवः। शासति उत्तरापथे देवपादे दस्युता भयादेव पलायिता।

इति हंसवेगः कथयति प्रयच्छति च पत्रं हर्षाय। क्षणं विरम्य स्थानकालोचितगाम्भीर्यमाश्रित्य राजनिदेशं च मनसि कृत्वा सप्रश्रयं निवेदयति दूतः।

—यादोरत्नैः परिपूर्णो देवस्य कोषो विस्मयाय महीभृतां भवति। तथापि अस्मात्स्वामिना स्वीयं सन्देशमशून्यं नयता प्रेषितं रत्नजातमन्यच्च प्राग्ज्योतिषोद्भवं क्षौम-दुकूलादिकम्। राज्ञा नरकेण वरुणादाहृतम् आभोगाख्यमातपत्रं न विना चक्रवर्त्तिनं छायां करोतीति अनुरूपस्थानन्यासीकृतम् आदराद् देवेन। एतानि खनिजानि रत्नानि, इमानि पत्रोर्णानि, एते वारवाणाः, इमे कार्दरङ्ग-चर्मणां सम्भाराः, इमा जातीपट्टिकाः, इमानि वेत्रमयानि आसनानि, एतानि मृगनाभिघटितप्रसाधनानि, एतानि च कालागुरुवल्कललिखितानि अर्थभाञ्जि पुस्तकानि, इमानि एलालताफ ानि, पूगानां च सरसानि फलानि, ताम्बूलवल्ली-पत्राणि सर्वाणि समाहारभूतानि, अमूनि च पञ्जरस्थितानि शुकादीनि द्रष्टुमर्हति देवपादः। बहिश्च लौहित्यतीरोद्भूता महामात्रसनाथा गजास्तिष्ठन्ति।

श्रुत्वैतद् दृष्ट्वा च वस्तुजातं सकुतूहलं देवो हर्षः परमप्रीतो वदति।

—श्लाघनीयः कुमारः। महान् तस्यादरः।

—ततश्च कुमारसन्देशं शुश्रूषुर्हर्षः अनुयायिनो विसृज्य चामरधारिणीमन्तरालवर्त्तिनीं रूपजीवाम् ईक्षण-वीक्षणेन समुत्सार्य पृच्छति हंसवेगम्।

—कथय निभृतं कुमार-सन्देशम्।

राज्ञा नोदितो हंसवेगो सप्रणामं ब्रूते।

—पुरा प्रलयपयोधेर्धात्रीमुच्चिक्षप्सोः कपटकोलरूपस्य विष्णोः सम्पर्कसम्भूतया भगवत्या भुवा पार्थिववृन्दारको नरको नाम सूनुरसावि जनकस्य यज्ञस्थले। यश्च प्राप्तयौवनः प्राग्ज्योतिषं समागत्य तत्र राजा बभूव। समरे विजित्य नरको

नाकनिवासिनो वरुणस्यातपत्रं जहार। तस्मादद्दृष्टनरकान् नरकादजनिष्ट नृपतिरिन्द्रसखो भगदत्तः, तस्यात्मजो वज्रदत्तनामाभूत्।

तस्य वंश्येषु च गतेषु वहुषु मेरूपमेषु महत्सु महीपालेषु पुष्यवर्मा नामाभूद्राजा। तदन्वये जातो भूतिवर्मा तेजसां राशिः। तस्य भूतिवर्मणः प्रपौत्रः, पौत्रश्चन्द्रमुखवर्मणः, पुत्रो देवस्य स्थितवर्मणः सुस्थिरवर्मा नाम जज्ञे महाराजाधिराजो यः खलु जनैः श्रुतो मृगाङ्क इति। तस्य च सुगृहीतनाम्नो देवस्य देव्यां श्यामादेव्यां भास्करवर्मा तनयः शान्तनोरिव भागीरथ्यां भीष्मः समजनि कुमारः। तस्य च ज्यायान् भ्राता प्रथमयौवने एव गौड़ारातिभिर्युध्यमानो दिवं गतः। देवभूयं गते ज्येष्ठे कुमारः पितृ-पैतामहं राज्यं घृतदण्डो शास्ति। 'स्थानुपदारविन्दद्वयादृते नान्यमहं नमस्कुर्याम्' इति शैशवादारभ्य कुमारस्य संकल्पो महान्। त्रिभुवनदुर्लभस्य मनोरथस्यास्य सफलता त्रयाणामन्यतमेन भवेत्—त्रिभुवनजयेन वा मृत्युना वा यदि वा देवोपमेन मित्रेणेति। प्राग्ज्योतिषेश्वरो हि एकपिङ्ग इव अनङ्गद्विषा, दशरथ इव गोत्रभिदा अजर्य्यं सख्यमिच्छति देवेन। यदि सख्यमभीप्सितं तर्हि देवस्य मुखशशिनि विराजतां प्राग्ज्योतिषश्रीरचिरात्, नाभिनन्दति चेद् देवः प्रणयम्, आज्ञापयतु किं मया कथनीयं स्वामिनः।

एवमुक्त्वा विरते हंसवेगे आरोपितबहुमानो देवो हर्षः लज्जमान इव सादरं ब्रूते।

—हंसवेग! कथमेव तादृशि महात्मनि स्निह्यति सुहृदि मद्विधस्य स्वप्नेऽपि अन्यथा प्रवर्तते मनः। कुमारः स्वयमेव वीर्यवान् मयि च समालम्बिते शरासने चन्द्रशेखरादृते कमन्यं नमस्करोति। सम्बर्द्धिता मे प्रीतिः दृढीभूतं मैत्रम्। तत्तथा यतेथा यथा कुमारदर्शनोत्कण्ठा न मां चिराय क्लेशयति।

हर्षं विरतं दृष्ट्वा हंसवेगः पुनरपि निवेदयति।

—यतो देवेन अभिनन्दितोऽस्मदीयः प्रणयः सखेव सख्युः तस्मादचिरमेव परागतः प्राग्ज्योतिषेश्वर इति करोतु चेतसि देवः ....।

—परं सावशेषं संदेशं श्रोतुमर्हति देवपादः समुपस्थितकरणाय। सन्तः प्रणयवाक्यानि गृह्णन्ति अनुसूयवः। अतः कथयामि।

—अभ्यमित्रं प्रवर्तुकामः कामरूपाधिपतिः कुमारः। हृतशैलेन सह गौड़ापहृतं कर्णसुवर्णमण्डलम् उद्दिधीषुरस्मत्स्वामी। आत्मनः सुकृतेन सह राज्यवर्द्धनं जीवलोकं त्याजयता गौड़ेन देवोऽपि भृशं तिरस्कृतः। 'संहिताः स्म इति पूर्वे राजानः सत्येन सन्दधिरे।' अतो वयमपि सत्येन सन्दधामः। मालवलताप‌रशुः गुर्जरकूटपाकलः स्थाण्वीश्वराधिपतिर्महता बलेन नौसाधनोद्यतान् गौड़ान् प्रत्यागच्छतीति वार्तां श्रुत्वा प्राग्ज्योतिषेश्वरः हस्त्यश्वरथपादातिकं सुसज्जं करोति। देवेन सख्यञ्च इच्छति युगपदभियानाय। अचिरमेव अभियानं देवस्येति समाश्वस्तः प्राग्ज्योतिषेश्वरः। अथ देवस्याभिमतं भवेद् ?

एवमुक्त्वा निरतो हंसवेगः। राजा तु 'अचिरमेव अस्मद् दूतः कुमारमुपस्थास्यते' इत्युक्त्वा तं विसर्जयति।

परेद्युः प्रभाते पृथिवीपालः प्रभूतं प्राभृतं दत्वा प्रधानदूताधिष्ठितं हंसवेगं प्रहिणोति प्राग्ज्योतिषपुरम्। यथा वा यद् वा निवेदनीयं तदपि समादिष्टम्।

× × ×

अत्रान्तरे एकेनैव वाजिना तत्र समागतो भण्डिः। राज्ञा पृष्टः राज्यवर्द्धनस्य यात्रानन्तरं यद् यदभूत् तत् सर्वं निवेदयति भण्डिः। श्रुत्वा च अभिनवीभूतभ्रातृ-शोको हर्षः कृतसङ्कल्पोऽन्वेषणाय राज्यश्रियः। आदिशति च भण्डिम्। 'हस्त्यश्व-रथ-पादातिकं बलं गृहीत्वा अचिरमेव गच्छ त्वं गौडोन्मूलनाय। अहमपि तव पृष्ठलग्न इति मनसि कृत्वा द्रुतं गच्छ। इतश्च प्राग्ज्योतिषेश्वरोऽपि गौडाभियानमाश्रयति। भगीरथावतारिता गङ्गेव भवतु अप्रतिहता मम चतुरङ्ग-वाहिनी। लसतु स्थाण्वीश्वर-विजयपताका गौड़प्रासादेषु ..... अचिरमेव विश्वस्तहन्तारं विश्वासघातकं गौडपांशुलम् .....' एवमसमाप्तवाक्यो हर्षो भण्डिना सह स्वान्तःपुरं प्रविशति।

तद्दिने कारित-शोकश्मश्रुवपन-कर्मा स्नात्वा भण्डिना सह भुंक्ते हर्षः। भण्डिः पुनरपि सविस्तरं यथा ग्रहवर्मा बुधगुप्तेन घातितः, यथा च कुशस्थली गृहीता, यथा च राज्यश्रीः निगृहीता पलायिता च सर्वं सावशेषं विवृणोति।

—-—

१३

प्रसन्नायां शरदि प्राग्ज्योतिषपुराद् हस्त्यश्वरथ-पादातिकं बलं बलाध्यक्षेण जयनागेनाधिष्ठितं गौड़ाभिनाय निर्गतम्। अभ्यमित्रीया सेना मुहुर्मुहुः प्राग्ज्योतिषेश्वरस्य जयघोषणाशब्देन दिशो दश आपूरयन्ती दक्षिणोदधिगामिनी गिरिनदीव वर्षासु सकोलाहलं द्रुतं धावति। अभ्रमातङ्गायमाना हस्तिपकारूढाः शतशः पार्वतीया गजाश्चलज्जीमूता इव बृंहणेन तुमुलेन जनितारिशङ्काः रणगतिं समाश्रयन्ति। ह्रेषारवेण हस्तिबृंहणं तिरस्कुर्वन्त इव नाकेन्द्रहयं ह्रेपयमाना वातप्रमिणो वाजिनः समुत्थिताग्रचरणाभ्यां नभो गन्तुकामा इव पञ्चमीगतिं समाश्रित्य धावन्ति। तान् अनुसरन्ति रथारोहिणो गुल्मपतयः। तत्पश्चाद् राजावरोधाः, तेषु वारविलासिनीभिरनुगम्यमाना माधवी श्वेतपताकालाञ्छितेन रथेन सञ्चरते। रक्षिणश्च धृतायुधास्तामनुसरन्ति। कुमारः स्वयं भद्राचलनामानं प्रधानहस्तिनं समारुह्य स्वाङ्गरक्षकेण बलभद्रेण सेनापतिप्रदेष्टृ-नायकदण्डपाल-राष्ट्रान्तपालप्रभृतिभिः परिवार्यमाणो विश्वस्तं गच्छति। कुन्तायुधाः, इषुप्रक्षेपनिपुणाश्च पादातिकाः, दुर्गपरिखानिर्माणकुशलाः स्थपतयः खनकाश्च, समरोपकरणवाहिनो जनाश्च स्वं स्वं स्थानमधिकृत्य रणयात्रायां प्रस्थिताः। प्राग्ज्योतिषपुरादेवं प्रस्थितेषु बलेषु प्रत्यन्तदुर्गेषु समयं प्रतीक्षमाणा दुर्गपाला अपि यथाकालं समवेताः।

कतिपयैरेव अहोभिः समुपस्थिता वाहिनी करतोयातीरम्। उत्तरणाय कालं प्रतीक्षमाणो यावदास्ते कुमारस्तावदेव महाकालमन्दिराद् आगतेन भैरवेण 'आगामिन्यां कृष्णत्रयोदश्यां निशीथे क्रोशं कुटिला करतोया सन्तरणीया वृक्षान्तराले' इति समादिष्टम्। यथानिदेशं तीर्णकरतोये प्राग्ज्योतिषबले भास्करः कर्णसुवर्णं प्रयाति। इतो भण्डिरपि स्थाण्वीश्वरकटकसनाथः कान्यकुब्जलैश्च समुपबृंहितः सम्प्राप्तः भिदुरसम्पात इव गौडराज्यसीमान्तमिति चारसन्देशः अजनयत् शशाङ्कशङ्कां भृशम्। शशाङ्केन श्रुतं प्राग्ज्योतिषेश्वरस्य करतोयासमुत्तरणम्। ज्ञातञ्च स्व-परराष्ट्रस्य बलाबलम्। विनिद्रं रजनीं यापयता तेन चिन्तितम्। 'हृतराज्यमुद्धर्त्तुकामः कामरूपेश्वरः कदाचिदपि न दान-ना।।

सन्धास्यति। तस्य बलं दौर्बल्यहीनं मन्त्रणा सुगुप्ता, मैत्रमजर्य्यम्। तस्मादसमाप्तजिगीषस्य तस्य नास्ति जयं विनान्यच्चिन्तनम्। अकृत्वा कर्णसुवर्णमण्डलं कामरूपान्तर्गतं तस्य विजिगीषा नावतिष्ठते। विजयश्रिया असमाश्लिष्टस्य जन्म निरर्थकमिति मन्यमानेन कुमारेण न मम सन्धिः स्यात्, मित्रेण बलीयसा युक्तेन न च विग्रहः।····दक्षिण.शाधिप इव वैरनिर्यातनाय प्रभूतेन बलेन समागच्छति हर्षप्रेरितो भण्डिः। स्वयं तस्य पृष्ठरक्षां कुर्वन्नास्ते हर्षः। कामरूपाधिपतिना कुमारेण तस्य मैत्री न भेदसहा अतो नाहमेकेन सन्धाय अन्यं प्रतिरोद्धुं समर्थः। उभयतः पाशारज्जू।'

अस्यां स्थितौ किं करणीयमिति विचिन्त्य रात्रिगणान् विनिद्रं नयति। समाक्रान्तातङ्कः शशाङ्कः स्तोकेनानुयायिना कोषात् स्वर्णरत्नादिकं गृहीत्वा कदाचिद् रात्रौ गौडराजधानीतः पलाय्य कलिङ्गदेशं गतवान्।

शशाङ्कस्य पलायनमाकर्ण्य द्रुतं कर्णसुवर्णमुपस्थितो भास्करवर्मा। पौरा जानपदाश्च कुमारभास्करवर्माणं भौमान्वयसम्भूतं विज्ञाय कर्णसुवर्णमण्डलशासनाय प्रार्थयन्ति। स्थापितो जयस्कन्धावारः विजयवाहिनीपतिना तत्र।

× × ×

कर्णसुवर्ण-मण्डले जयस्कन्धावारः। तत्र सभामण्डपे समायोजितो विजयोत्सवः। पौण्ड्रवर्द्धन-निवासिनो जनाः तत्र समवेताः। गौडप्रान्ताच्चागताः केचन दुर्गपालाः राष्ट्रान्तःपालाश्च। देशान्तरेभ्यो वाणिज्येन स्थिताः वणिजस्तत्र सोपढौकनाः समुपस्थिताः। नौवाणिज्येन द्वीपान्तरं गताः सार्थवाहा अपि यथाकालं राजसभां समागच्छन्ति। श्रोत्रियाः ब्राह्मणाः राजपुरुषाः स्वं स्वमासनमलंकुर्वन्ति।

अत्रान्तरे तौर्यत्रिकसूचितप्रवेशः कुमारः पुरोहित-मन्त्रि-गणिकाभिः समावृतः अङ्गरक्षकैरनुगम्यमानो मृदुमन्थरपदक्षेपेण प्रविशति सभामण्डपम्। राजदर्शनोत्कण्ठया सम्भ्रमाच्च आसनादुत्थाय जना जयघोषणां कुर्वन्तो धरातलं नभश्च पूरयन्ति तुमुलेन शब्देन।

कुमारस्तु प्रदर्शित-बहुमानः सस्मितं सिंहासनमारोहति। सन्निधातृप्रमुखा राजपुरुषाः दण्डपालाश्च यथास्थानं यावत् समुपविशन्ति तावत् प्रदेष्टा घोषयति।

"श्रृण्वन्तु पौण्ड्रवर्द्धननिवासिनः पौराःजानपदाः दुर्गपालाः सामन्ताः वणिजः कर्षुकाश्च सावधानम्। निखिलां क्षितिं भुञ्जतां नारकाणां वंशानुक्रमेण अधिशासितं कर्णसुवर्णमण्डलसनाथं पौण्ड्रवर्द्धनाख्यं महद् राज्यखण्डं विधिच्छलनवशाद् गौडैरपहृतं पुनरपि प्राग्ज्योतिषान्तर्गतं भवति। भौमान्वयजातः महाराजाधिराजः कुमार-भास्करवर्मदेवः सर्वान् समादिशति—पारम्परीणां मर्यादां परिपालयन्तः सर्वे पौरजानपदा स्वां स्वां वृत्तिं सेवन्ताम। महाराजाधिराजाय आनुगत्यं कर्मणा मनसा वाचा प्रकाशयन्तः सर्वे अकुतोभयास्तिष्ठन्तुः। गौडभयं तिरोहितं चिराय। अस्माकम् अन्तपाला राष्ट्ररक्षार्थं अप्रमत्ता भवेयुः।"

एवमुक्त्वा विरते प्रदेष्टरि सामन्ताः दुर्गपालाः सवणिक्-सार्थवाहाः ग्रामवृद्धाश्च राज्ञे समर्पयन्ति आनुगत्यज्ञापकानि उपढौकनानि। ततः पुरोहितः समुत्थाय जलदगम्भीर-स्वरेण स्वस्ति वाचयति।

आ ब्रह्मन् ब्रह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः।

शूर इषव्योऽतिव्याधी महारथो जायताम्।

दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा।

जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम्॥

निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम्।

योगक्षेमो नः कल्पताम्॥

ततश्च तौर्य्यत्रिका जयघोषणासनाथं तूर्यनिनादेन सभाया अवसानं सूचयन्ति।

कर्णसुवर्ण-जयस्कन्धावारे वर्षं यावत् तिष्ठति भास्करवर्मा। प्रत्यहं श्रृणोति राजा जनानामावेदनम्। अराजकप्रायं राष्ट्रं सुरक्षितं करोति। क्षीणकोषस्य पूर्णतां सम्पादयति। कदाचिच्च कवीन् पण्डितान् चाहूय नूतनां

कृतिं श्रृणोति। देवार्च्चनार्थं ब्रह्मोत्तरं देवोत्तरं च भूमिखण्डं शासनीकृत्य ददाति। 'राजा दाते'ति प्रथितं यशो भूमण्डले। अर्थिनो विद्वांसश्च राजानमुपतिष्ठन्ते यथाकालम्। अथान्यस्मिन् दिवसे याजयुकाः केचन ब्राह्मणाः समागताः चन्द्रपुरिविषयात् कर्णसुवर्णजयस्कन्धावारम्। सम्प्राप्य जयस्कन्धावारं ते वाजसनेयिनः समुपस्थिताः सभाद्वारम्। दौवारिकेन 'के यूयं, कुत आगताः, प्रयोजनमागमनस्य वा किम्? सर्वं याथातथ्येन कथयितुमर्हन्ति भवन्तः। प्रयोजनापेक्षयैव राजदर्शनमिति विदितमेव भवतामिति मन्ये।' इति पृष्टास्तेषाम् अग्रणीर्देवशर्मा सुमधुरं कथयति।

—स्वस्ति दौवारिकप्रवराय। अस्ति करतोया-तीरे चन्द्रपुरिविषयः, इति श्रुतं भवद्भिः। तस्मादेव राजानं दिदृक्षवो महान्तमध्वश्रमं स्वीकृत्य समागता वयम्। श्रुतमस्माभिर्यद् भास्कर-वर्मदेवपादो गौडारातीन् विजित्य अत्र जयस्कन्धावारे तिष्ठति, साम्ना दानेन प्रजा आवर्ज्य राज्यं सुरक्षितं करोति, ब्राह्मणेभ्यः अग्रहारभूमिः यथा स्वाध्यायो वर्द्धते तथा दीयते महाराजेन। वयमपि अध्ययनाध्यापनादि-षट्कर्मनिरताः। इच्छामो वयं देवपादात् किञ्चित्। एतदेवागमनकारणम्। आं विस्मृतम्। अरातिजयेन पूर्णमनोरथं राजानं विजयशब्देन वर्द्धापयामः सभायाम् इत्यपि अस्माकं चिकीर्षा। इदानीं सत्वरं देवसमीपं नेतुमर्हति भवान् यथा कालक्षयो न भवेत्।

—नमो ब्राह्मणेभ्यः। सम्यक् श्रुतं भवद्भिः। नृपसभमिदं देव-सभामपि विनिन्द्य विराजते। महाराजाधिराजभास्करवर्मदेवः इदानीमेव सभायामुपविष्टः तिष्ठति। भवतु। आगच्छन्तु भवन्तो यथान्यायम्।

कथयति दौवारिकः।

सभां प्रविश्य ते ब्राह्मणा घोषयन्ति।

"स्वस्ति महाराजाधिराजाय भौमान्वयजाताय परममाहेश्वराय श्रीमद्भास्करवर्मदेवपादाय। जयति जयति महाराजः।" इत्येवं बहुशो जयघोषणां कृत्वा ते ब्राह्मणाः राजाभिमुखं समागच्छन्ति। देवस्तु प्रदर्शितादरस्तेभ्यः सबहुमानं तेषामागमनप्रयोजनं साक्षात् पृच्छति। कथयति च देवशर्मा।

—श्रुतमस्माभिर्यद् भास्करायमाणेन भास्करवर्मदेवपादेन गौडाः विजिताः, कर्णसुवर्ण-नगरे जयस्कन्धावारश्च समावेशितः। एतद् राज्यखण्डं गौडैरपहृतमिदानीं पुनरपि प्राग्ज्योतिषान्तर्गतं भवतीति महान् आनन्दसन्दोहोऽस्माकम्। पूर्वं महाराजाधिराजेन भूतिवर्मदेवपादेन प्रदत्ता चन्द्रपूरिविषये अग्रहारभूमिः श्रोत्रियेभ्यः ताम्रशासनीकृता। कालक्रमणे विधिवशाद् ब्रह्मत्रा भूमिः प्राचीनमनुशासनम् अविगणय्य गौडैर्बलादपहृता। इतश्च हुतवहेन दग्धं वासगृहं श्रोत्रियाणाम्। दग्धे गृहे स्फुटितं ताम्रशासनम्। अपहृतायां भूमौ बलिरिक्थविरहिता वयं महता कायक्लेशेन कथं कथमपि संसारयात्रां निर्वहन्तो दिवसयामिन्यौ यापयामः। इष्ट-पूर्त्तादिकं श्रौतं स्मार्त्तं च कर्म करणीयमित्येव यथा कथञ्चित् कुर्वन्तः कालं प्रतीक्षामहे। कदा कालरात्रिर्गमिष्यति भानुमानुदेष्यतीति चिन्ताक्लिष्टानाम् अस्माकमद्य रजनी सुप्रभाता। तेजसा दीप्त्या च भास्करमपि ह्लेपयमाणो भास्करद्युतिर्भास्करवर्मदेवो वर्णाश्रम-धर्मरक्षायै जगत्येकवीरो विराजत इति नष्टोद्धरणाय वयमत्र समागताः। अतः परं देवः प्रमाणम्।

—अथ कुशलिनोऽत्रभवन्तः?

राजा सगौरवं पृच्छति।

—इदानीं देवपादे शासति कर्णसुवर्णमण्डले शोधिते च कण्टके सर्वे कुशलिनो वयम्……। देवपादानां परिज्ञानाय किञ्चिन्निवेदयितुकामः……। चन्द्रपुरिविषये वसन्ति श्रोत्रियाः। ते दर्श-पौर्णमासैर्यजन्ते। वाजपेयिनोऽपि वर्त्तन्ते। श्रौतं स्मार्त्तं च कर्माचरन्तः वैदिकधर्म्मं धारयामो वयम्। … परं कर्णसुवर्णविषये तान्त्रिकाः कापालिकाश्च सन्ति। केचन वामाचारेण पूजयन्ति कामेश्वरमहागौरीम्। श्रूयते चीनाचारमपि केचन समाचरन्ति। परं वयं वैदिकाः। अयं मल्लक्षणो जनो वाजपेयी देवशर्मेति जनैः श्रुतः। एते कात्यायन-प्रमुखाः कौथुमाः। मत्पश्चादेते वाजसनेयिनः …। एषः सोमयाजी कुण्डस्वामी। अयं च अर्कयाजी सोमस्वामी। अयं पक्षिलस्वामी न्यायनिपुणः पक्षिलस्वामीव सुप्रसिद्धः। अयं कुमारस्वामी युवा मीमांसायां कृतश्रमः। अयं नारायणभट्टः पदवाक्य-प्रमाण-पारावारपारीणः। असौ चन्द्रस्वामी नृत्ये नाट्यशास्त्रे च प्रवीणः।

एवं कथयति देवशर्मणि राजा सस्मितं ब्रूते।

—साधु, चन्द्रपुरिविषयो विद्वज्जनाधिवासित इति विज्ञाय मन्ये मद्राज्यं सरस्वत्याः सदनम्। ज्ञानान्वेषिणो भवन्तः। वर्द्धतां तपो भवताम्।

क्षणं मौनमास्थाय राजा महासान्धिविग्रहिकं समाहर्त्तारञ्च समाहूय समादिशति।

—एते चन्द्रपुरिनिवासिनो श्रोत्रियाः। अस्मत्पूर्वजेन महाराजाधिराजेन भूतिवर्म्मदेवेन प्रदत्ता एभ्यः अग्रहारभूमिर्ब्रह्मत्रा। कालेन सा भूमिः गौडैरपहृता। दग्धं च हुतवहेन प्रदत्तं ताम्रशासननम्। अतो महान्तं क्लेशमनुभवन्ति श्रोत्रियाः। प्राचीन-शासनानुरूपा भूमिः प्रदेया एभ्यः पुनरपि यथा षट्कर्मनिरता एते जठरज्वालां नानुभवन्ति। शासनं तथा नवीकरणीयं यथा पूर्व-शासनस्य समुल्लेखो भवति, कर्णसुवर्ण-मण्डल-विजयस्य च। यथा सर्वं सुसम्पन्नं भवति तथा लेखपालः समादेष्टव्यः। शासनं च विरचनीयं सभापण्डितेन।

एवं समादिश्य राजा कार्यान्तरव्यापृतो जातः।

महीमहेन्द्रस्य प्राग्ज्योतिषेश्वरस्य कुमारस्य यथानिदेशं भूमिदानाय रचयति शासनं सभापण्डितः। विरचिते शासने भूमिप्रदानात्मके पण्डितः निवेदयति राज्ञे। राजा तु 'वाच्यताम्' इत्यादिशति। राजाज्ञामनुसृत्य वाचयति पण्डितः सुदर्शनस्वामी।

ॐ प्रणम्य देवं शशिशेखरं प्रियं पिणाकिनं भस्मकणैर्विभूषितम्।
विभूतये भूतिमतां द्विजन्मनां करोमि भूयः स्फुटवाचमुज्ज्वलाम्॥

स्वस्ति। महानौहस्त्यश्व-पत्तिसम्पत्त्युपात्त-जयशब्दान्वर्थ-स्कन्धावारात् कर्णसुवर्णवासकात्।

……पुरा प्रलय पयोधिमग्नां रसां रसातलाद् उद्दिधीर्षोः कपटकोलरूपिणश्चक्रभृतो जज्ञे तनयो नरको धरित्र्याम्। तस्माद्दृष्टनरकान् नरकादजनि भगदत्तनामा तनयः। तस्याप्यभूद् वज्रदत्ताख्यो भूपो महान्। एवं क्षितिमथ निखिलां भुञ्जतां नारकाणां गते वर्षसहस्रत्रये शुद्धिमति तदन्वये जातः सुस्थितवर्मा प्रपौत्रो भूतिवर्मणः पौत्रश्चन्द्रमुखवर्मणः पुत्रः स्थितवर्मणः यं खलु मृगाङ्क

इति जना जगुः। भार्य्या तस्य श्यामा देवी प्रासोष्ट बलाच्युताविव तनयौ। कुमारयोर्ज्येष्ठः सुप्रतिष्ठितो दर्शितविक्रमो दैवेन दिवं नीतः। कनिष्ठो गुणानां निधिः श्रीसम्पदामायतनमचिन्त्य-प्रभावशक्तिर्महाराजः श्रीभास्करवर्मदेवः कुशली चन्द्रपुरि-विषये वर्त्तमान-भाविनो विषयपतीन् अधिकारिणश्च समाज्ञापयति। विदितमस्तु भवतामेतद्-विषयान्तःपाति-मयूर-शाल्मलाग्रहार-क्षेत्रं राज्ञा श्रीभूतिवर्मणा ब्रह्मत्रं कृतं, यत् ताम्रपट्टाभावात् करदं जातमिति महाराजेन ज्येष्ठभद्रान् विज्ञाप्य अभिनवपट्टकरणाय शासनं दत्वा चन्द्रार्क-क्षिति-समकालं भूमिच्छिद्रन्यायेन पूर्वभोक्तृ-ब्राह्मणेभ्यः प्रतिपादितम्।

एतच्छ्रुत्वा राजा साधु, सम्यक् सुरचितं शासनम्' इति बहुशः प्रशंस्य बहुमानं ददाति। ब्राह्मणाश्च नष्टं शासनं प्राप्य परं सन्तुष्टाः स्वस्थानं प्रत्यागच्छन्ति।

—अपि त्वया दृष्टा माधवी ?

कापालिकः पृच्छति क्षेमाम् ।

—अथ किम् । न केवलं दृष्टा, पृष्टा च सा मया मनोगतं प्रकाशितवती ।

कथयति क्षेमा ।

—तर्हि कथय सावशेषं किं त्वया पृष्टं, किं वा तया भणितम् ।

—शृणु । गताहं काषायवस्त्रं परिधाय राजान्तःपुरम् अतः न कोऽपि मां निवारयति स्म प्रवेशात् । मयानुरुद्धः केशवो नाम राजान्तःपुरवासी मामनयन् माधवी-निवासम् । मां संसारविमुखीं ज्ञात्वा माधवी सादरमासनं दत्वा ममागमनं पृष्टवती । किं कथनीयं कथं वा तस्या विश्वास उत्पादनीय इति मया पूर्वमेव मनसि निश्चितमिति कुशलादिजिज्ञासापूर्वकं निवेदितः स्वप्नवृत्तान्तः । ....विगतायां रात्रौ महादेवस्तृतीयेन नयनवह्निना दिधक्षुरिव मामवचोत् । 'अये क्षेमे ! अपि जानासि त्वं माधवीं महाकालमन्दिर-नर्त्तकीम् । सा खलु मह्यमर्पिता । देवाय समर्पितेति सा कस्यापि मानुषस्य भार्या न भवेदिति दैवानुशासनम् । परं मदनोन्माथिनि मधुमासे माधवी महाकालं त्यक्त्वा मानुषमेव चकमे । अतस्तस्याः तस्य च मानुषस्य, यस्तां गृहीतवान् भृशममंगलं देवरोषादि'ति । ततो भीतिविह्वलया मया प्रार्थितो देव एवमादिशत् । 'राजान्तःपुरं विहाय सा कौलेन विधिना कापालिकानां मध्ये रात्रौ मामाराधयतु । ततः सर्वं सुखदं भविष्यति । अहमपि भैरवरूपेण तत्र स्थास्यामि तस्याः कृते ‥ ।' एवमुक्त्वा तत्रैवान्तरधीयत महादेवः ।

तदाकर्ण्य सा कापालिकस्थानं गन्तुमिच्छति स्म । मया सा प्रबोधिता यथा कालं नयनाय । एतावदुक्त्वा तस्मादहं समागता ललितासदनम् । सा खलु रूपाजीवा सौन्दर्येण लावण्येन गीतेन च माधवीमपि अतिशेते । गणिकाध्यक्षेण सा सार्वासां रूपाजीवानां मुख्येति राज्ञे प्रदत्ता । कुमारोऽपि ललितां प्राप्य नेदानीं माधवीं बहुमन्यते । ललिता खलु माधव्यै ईर्ष्यति तस्याः पतनमिच्छति । माधवीम् अहं कापालिकाश्रमं नेष्यामीति मन्मुखाच्छ्रुत्वा सा सहर्षं मामकथयत् ।

'आगामिन्यां मदनत्रयोदश्यां यदा मदनोत्सवार्थे नागरिका नागरयोषाः गणिकाश्च बहिरुद्याने पानोन्मत्ता नरीनृत्यमाना विचरिष्यन्ति तदैव केनाप्यनुपलक्षितां तां नेष्यति भवती। ततश्चाहं राज्ञे तस्या दुश्चरितं निवेद्य तस्या आयतीं दूषयिष्यामि।' एवमुक्त्वा सा मह्यं सुवर्णमुद्रामेकां प्रादात्। विसर्जिता च सबहुमानम्।

क्षेमाकथितं कथाजातं साधु मन्यते कापालिकः। गतस्ततः स निवेदयितुं भैरवाय। भैरवोऽपि श्रुत्वैव सर्वं शोभनं मन्त्रितं युष्माभिरिति प्रावदत्।

इदानीं कुमारः प्रायशो ललताकक्षे रात्रिं यापयति। माधवी सर्वं जानाति, तथापि सा न क्रुध्यति कुमाराय। यदेव कुमाराय रोचते तदेव सः करोतु। तस्य कल्याणमेव काम्यं सुखमिष्टं माधव्याः। माधवी शय्यायामर्द्धशयाना तिष्ठति। उपधाने न्यस्तदक्षिणहस्ता वामहस्तोपरि कपोलं निधाय सा चिन्तयति सोत्कण्ठम्। 'यथा क्षेमया कथितं किं मया अपराद्धो देवः? नहि मया विद्विष्टो देवः। देवाय समर्पिताहम्। परं देवं पुरस्कृत्य भैरवेणैव मम कौमार्य्यं हृतमभविष्यत्। स खलु मानुष एव। कुमारोऽपि मानुषः। अनयोः का भिदा? देवाय समर्पिता देवदासी देवभोग्या? परं देवभक्तानामेव भोग्या अभविष्यम्। कुमारं समाश्रित्य प्रेम्णि निमज्जन्ती निर्मला तिष्ठामि। तथापि यदि महाकालो विरूपायते? यदि कुमारस्य अमङ्गलं भवेत्? तस्य मंगलार्थमेव मया गन्तव्यः कापालिकाश्रमः। किं मम गमनं कुमारस्य अनुमतं भवेत्? न जानामि……। एवं कृते किं सर्वं सुशोभनं भविष्यति।'

एवं बहुशो विचिन्त्य माधवी तन्द्रामग्ना जाता। कुमारागमनं न जानाति सा। यदा तु कुमारः 'माधवि किं निद्रितासि?' इति तां मृदु पृच्छति तदैव सा लब्धचेतनेव सहसोत्थाय कुमाराय स्वागतं व्याहरति कथयति च। 'एषाहम्, एषाहं भवदागमनं प्रतीक्ष्य स्थिता। न स्वपिमि।' कुमारश्च प्रणतां माधवीं समुत्थाप्य शय्यायां समुपविश्य स्वयमपि उपविशति। माधव्या नम्रं मुखमुन्नमय्य कुमारः सस्नेहं पृच्छति।

—माधवि! कथं विमनस्केव दृश्यसे। मुखञ्च ते परिशुष्यति। आधिपीडितेव प्रतिभासि मे त्वम्। कथय का नाम ते मानसी व्यथा?

कुमारस्य स्नेहविगलितं वचनं निशम्य माधवी शोकाभिभूतेव किञ्चित् मौनमास्थाय ब्रूते ।

—किमपि कारणं न मां दूनोति । परं पूर्वघटितं स्मृत्वा ...... । देव ! अस्मिन्नेव मण्डले करतीयातीरे महाकालमन्दिरं वर्तत इति तर्कयामि । किंयद्दूरे वर्तते ?

—अपि तत्र जिगमिषा ते ? कं द्रष्टुम् ? कं द्रक्ष्यसि तत्र ? स्मरसि कस्यचित् ?

—न कमपि द्रष्टुमिच्छामि । तस्मिन्नेव मन्दिरे देवो यदा प्रथमं समागतः समराङ्गणात् ....देवं दृष्ट्वा यथाहं समाकुला याता .... सर्वं स्मरामि अधुनैव घटितमिव । किं देवोऽपि स्मरति यथा यथा यद् वा संघटितम् ?

– कथं न स्मरामि । मन्दिराभ्यासे उद्याने सायन्तने धात्रेयिकया सह विचरन्तीं माधवीं दृष्ट्वैव ......वेदिकायामुपविश्य .... ।

—भवतु । बहवो वत्सरा व्यतीताः यदाहं महाकालं विहाय आचार्यं देवस्वामिनमविगणय्य गता .... परं नेदानीं बहुमता देवस्य.... .. दर्शनमपि दुर्लभं जातम् किं कृतं मया ... !

सगद्गदम् एवमुक्त्वा माधवी कुमारमुखं पश्यति साभिलाषम् । कुमारः कथयति ।

—माधवि ! कठिनं राज्यशासनम् । राज्यं रक्षणीयं वर्द्धनीयञ्च । पालनीया-राष्ट्रनीतिः अनिच्छतापि राज्ञा । प्रजा अनुरञ्जनीयाः । प्रजानुरञ्जनार्थमेव अनवद्यां जनकात्मजां तत्याज रघुनन्दनः । तथैव प्रकृतिमाराधयितुमेव न वृता त्वं पट्टमहिषी मया । पाषाणमिव हृदयं मन्ये मम । न हृदय-स्फुरणम्....... ।

तं निवार्य साभिमानं माधवी ब्रूते ।

—ललिताक्रान्त-मर्महृदयस्य कथमत्र स्फुरणं भवति ? कथं वा भवेत् हृदय-

संवादः ? तत्रैव भवतु स्फुरणम् यत्रापेक्षते ललिता । माधवी देवेन सस्नेहमनुगृही-तेति प्राणान् रक्षिष्यति । गतेषु प्राणेषु………

—अयि माधवि ! नैवं कथनीयं त्वया । किं न जानासि राजधर्मम् ? राजधर्मा-नुरोधेनैव राजावरोधः, न पुनः अन्तःकरणप्रवृत्त्या……………। अवरोधबहुत्वं राज्ञाम्………

किमवरोधबहुत्वं राजशासनम् ?

—नास्ति शासनं किन्तु पारम्परीणो राजधर्मः । कथं तत्र व्यतिरिक्तो भवामि । नान्यथा मन्तव्यम् ……। अवरोधबहुत्वेऽपि त्वमेव मम हृदये स्थिता ……। माधवीविहीनं कुमारं शवं जानीहि ……।

एतावदुक्त्वा कुमारो हस्ताभ्यां माधव्या मुखमुन्नमय्य अधरं सुचिरं-चुम्बति । माधवी लतेव वृक्षं तं लतावेष्टितं समाश्लिषति । प्रवृत्तोऽनङ्गरङ्गः चिरं पिपासितयोस्तयोः । कामं निरङ्कुशं सेवमानायोस्तयोः न प्रशमनं जातम् । हविषा कृष्णवर्त्मेव कामो भूय एव वरीवर्द्धते ।

——……

१५

अथ मदन-द्वादशी समागता। मदनोत्सवार्थमुद्यानं सुसज्जितम्। द्वादश्यां त्रयोदश्यां चतुर्दश्यामपि मदनोत्सवः। पूर्वं दमनकवृक्षे मदनः पूज्यते स्म। अधुना तु मदनस्य प्रतिमा एव स्थाप्यते। तस्य वामपार्श्वे च रतिः। हरिद्राचूर्णैः केशवरूपिणं प्रथम सन्ध्यायां पूजयन्ति जनाः। इक्षुदण्डश्च दीयते मदनाय। सन्ध्यायां ललिताप्रमुखा राजावरोधा नीलाभं वसनं वसानाः मदनदर्शनाय समागताः। दृष्ट्वा च पुष्पधन्वानं स्मितेन विराजमानं रति-सहितं ता युवत्यः स्तुवन्ति।

माधवात्मज कन्दर्प शम्बरारे रतिप्रिय।
नमस्तुभ्यं जिताशेष-भुवनाय मनोभुवे॥
आधयो मम नश्यन्तु व्याधयश्च शरीरजाः।

स्तवनानन्तरं काचन पृच्छति ललितां कथं कामः शम्बरारिर्जातः। ललिता सस्मितं ब्रूते।

—किं तदपि न ज्ञायते ? न श्रुतं शम्बरेण प्रद्युम्नहरणम्। कथयामि, शृणु। कृष्णमहिषी वैदर्भी प्रासूत पुत्रम्। सूतिकागृहादेव हृतो बालकः कृष्णवैरिणा दानवाधिपेन शम्बरेण। ततस्तेन मञ्जूषायां कृत्वा विसर्जितो बालको नद्याम्। स्रोतसा नीयमानं बालकं प्राप्य कश्चिन् कैवर्तः यत्नेनापालयत् तम्। कदाचित् शम्बरपत्नी मायावती तं बालकं वीक्ष्य स्वगृहमानीय पालयामास। प्रद्युम्न इति तस्य नाम च व्यधात्। नातिदीर्घेन कालेन स कार्ष्णी रुप-यौवनैः पश्यन्तीनां नारीणां विभ्रमं जनयामास। अथैकदा मायावती तं नरलोकसुन्दरं सव्रीड-हासैः वीक्षमाणा प्रीत्या रतिरङ्गसौरतैः उपतस्थे। प्रद्युम्नस्तां रतिरङ्गमानसां दृष्ट्वा 'अद्य कथं ते मतिरन्यथा दृश्यते। मातृभावमतिक्रम्य वर्तसे कामिनी यथा' इति पृच्छति। प्रद्यम्न-वचनं श्रुत्वा मायावती 'नाहं तव माता, स्नेहात् त्वां पालयामि। प्राप्तयौवनं स्मरकर्मणि त्वामिदानीं नियोजयामि। शृणु, तत्रोपायं वक्ष्ये यथा - शम्बरो हन्तव्यः त्वया इति सा प्रद्युम्नं शम्बरनिधनार्थं गोपनीयं ज्ञापयामास। शम्बरस्यान्तरं विदित्वा तौ चौररतिं भुञ्जानौ कालं प्रतीक्ष-

माणौ तिष्ठतः। एकदा शम्बरमशस्त्रपाणिं विज्ञाय मायावतीप्रणोदितः प्रद्युम्नः तं जघान। प्रद्युम्न एव मदन इति सः शम्बरारिर्मनसिज इति कीर्त्यते पौराणिकैः ·······

एवं कथयन्त्यां तस्यां तत्र समागता नयनिकया सह माधवी। तां दूरत एव दृष्ट्वा ललिता सर्वासां यथा श्रुतिपथमायाति तथा कथयति।

—देवदासी समागता। देवदास्याः किं करणीयं वर्तते राजावरोधे। नृत्यतु सा देवमन्दिरे·······

ततश्चात्मगतं ब्रूते।·······विचित्रमेतद् देवदासी अपि राजमहिषी भवेत् ? न खलु····। जीवन्त्यां ललितायां न माधवी कुमारवल्लभा चिरं स्थास्यति····

पुनरपि सोच्चैः कथयति।

—भो सख्यः! नास्माकं देवदास्या किञ्चित् करणीयं विद्यते। गच्छामो वयं वाटिकाया अपरस्मिन् भागे यत्र देवदासी नास्ति, सन्ति मदन-दास्यः कुमार्यो युवत्यश्च।

वाटिकाया अन्यस्मिन् भागे कृतप्रसाधना नागरयोषाः, वेशविन्यास-निपुणा विलासिन्यः, गृहीतालङ्काराभूषणा युवत्यः सुवेशैर्नागरैः मिलित्वा नरीनृत्यन्ति। पानक्षीबा महिलाः पानोन्मत्तैर्युवकैः हास-परिहासेन मदनोन्माथिनीं कथां कथयन्ति। जुगुप्सितोक्तिभिः भङ्गलिङ्गादिशब्दैः भगलिङ्गप्रगीतकगीतैः नृत्यवाद्यादिभिः युवत्यो युवानश्च परस्परप्रतिस्पर्द्धयेव नितरां विहरन्ति।

एवं प्रचलति मदनमहोत्सवे ललिता तत्रागत्य यावदितस्ततो वीक्षते-तावदेव वृक्षच्छायतो विनिर्गता क्षेमा ललितामुपांशु पृच्छति।

—ननु भद्रे! कुत्र माधवी। अपि वेला प्रशस्ता निर्गमने।

ललिता तस्याः कर्णमूले मुखं दत्वा किञ्चिदनुच्चैः कथयति, दर्शयति च दूरे स्थितं दमनकवृक्षम् अंगुलिसङ्केतेन। ततश्च कथयति सोपहासम्।

— दमनकवृक्षतले मदनः पूज्यते। तत्र देवदासी माधवी 'आधयो मम नश्यन्तु व्याधयश्च शरीरजाः' इति कामदेवं प्रार्थयन्ती तिष्ठति। गच्छ शीघ्रम्। अचिरमेव तस्या मानसी व्यथा आधिर्नाम यथा कापालिकैः नाशयिष्यति चिराय तथा करणीयम्। सिद्धे कार्ये पुरस्कारः, कार्यहानौ तिरस्कारो विपत्तिश्च।

पानक्षीबाः जनाः, रक्षिणः प्रमत्ताः। केनाप्यनुपलक्षितां नय तां यथा न कोऽपि ज्ञास्यति। इतश्च राजानमहं मत्कण्ठलग्नं प्रणयिनं करिष्यामि। न स ज्ञास्यति कुत्र तस्य देवदासी गता। न भेतव्यम्। अचिरमेव तां कापालिकाः कापालिकीं करिष्यन्ति। गम्यताम्। पन्थानं ते रक्षतु वामनः।

एवमुक्त्वा ललिता राजानमुद्दिश्य प्रस्थिता एकाकिनी। विचित्र-मणिकुट्टिमे राजा दूतीसमानीतां कांचिन् नागरयुवतीं 'ईश्वरानुग्रहं' ग्राहयित्वा वर्तते। सहसा ललितां समागतां दृष्ट्वा राजा तां 'सान्त्वयन् विसर्जयति।' ललिता तु नागरयोषाम् अपश्यन्तीव राजसमीपं गत्वा मधुरं कथयति।

—अस्मिन् मदनोन्माथिनि मधौ मन्येऽहम् आत्मानं मदनसनाथां रतिम्। अनुमन्यते चेद् देवैः मदनाश्लिष्टा रतिरिव देवेनालिङ्गिता तिष्ठामीति।

राजा तु किं करणीयं किं वा कथनीयमिति यावद् विचिन्त्य तिष्ठति क्षणं तावदेव तया बलान् नीतः स्वभवनं राजा। ततो ब्रूते।

—अद्य मदनमहोत्सवे अनङ्ग एव सेवनीयः। स सदैव जन्तूनां हृदये वसन् स्वयं सर्वेषां प्राणिनां मदमोदकरो भवति। अतो मनोऽनुकूलं मनोभवः समाश्रयणीयः····। अद्य देवो मया निरुद्धः। न प्रभवति माधवी देवस्य मोक्षाय····। मदनमहोत्सवे स्मर-कर्मणा मदन आराधनीय इति किं न भणितं पौराणिकैः। यद् वर्णितं पूर्वसूरिभिस्तत् पालनीयम्।

एवं प्रवर्तमाने मदनमहोत्सवे क्षेमया नीता माधवी बहिः। जनाः पानोन्मत्ताः रक्षिणश्च प्रमत्ताः। न केनाऽपि निर्वारिता। क्षेमामनुसृत्य माधवी गता। होरान्तरे एव माधवी प्रापिता क्षेमया कापालिकनिवासम्। तत्र गत्वा 'कुत्र मन्दिर' मिति पृच्छन्तीं माधवीं क्षेमा नातिदूरे इति कथयति। दूरादेव सद्योदग्धनृमांसाशिनः कापालिकान् दृष्ट्वा माधवी सन्त्रस्ता समीपं गन्तुं नेहते। तां तथाविधामालोक्य क्षेमा साम्ना तां प्रबोधयति। समीपमुपगम्य सा पश्यति दृष्टचरं भैरवम्। सा स्मरति अयमेव महाकालमन्दिराऽभ्यासे पूर्वं दृष्टः। अनेनैव करतोयात-रणस्थानमुपदिष्टं कुमाराय।

महाकालमन्दिरे स्थिता माधवी काले भैरवी भविष्यतीति तेन मनसा

कल्पितम्। माधवी महाकालं विहाय दूरदेशं गतेति नितरां क्रुद्धः कापालिकः। कदा माधवीं लप्स्ये इति चिन्तयन् सः कालं यापयति। कुमारं कर्णसुवर्णमागच्छन्तं श्रुत्वा तूर्णमेव स गतवान् करतोयातीरम्। प्रदर्शितं तरणस्थानम्। ज्ञात्वा च माधवीं राजान्तःपुरे स्थितां तेनैव प्रेषिता क्षेमा। समुद्भावितश्च स्वप्नवृत्तान्तः।

नग्नान् कापालिकान् नरकपालहस्तान् भैरवञ्च पानासक्तं दृष्ट्वा माधवी किंकर्त्तव्य-विमूढा यावदास्ते तावदेव भैरवी जयन्तीं कापालिकीं समादिशति। 'उपवेशय समागतां वेदिकाया'मिति। यथादिष्टा जयन्ती माधवीं हस्ते धृत्वा नयति वेदिकाम्। समुपवेश्य तां वेदिकायां प्रयच्छति मदिरापूर्णं कपालम्। कपालं मदिरां च दृष्ट्वा माधवी जुगुप्सते। भैरवः पानासक्तोऽपि नयने समुन्मील्य कर्कशं ब्रूते।

—ब्रह्माण्डं कपालरूपिणं जानन्ति तत्त्वज्ञाः। आकाशः कपाल इव। कपालो मूलं सर्वस्य। तस्माद् गृह्यते नरकपालः साधकैः। मद्यं पेयं मोक्षार्थम्। सुरापानात् साधकः सुरत्वं लभते। तस्मादेव सुरायाः सुरात्वम्। कैलास-शिखरासिनं देवदेवं महादेवं प्रपच्छ गिरिजा।

सुराया माहात्म्यं वद मे प्रभो!

तेनोक्तम्—

साधकः शक्तिसंयुक्तः पानादिकं चरेद् यदि।
तत्क्षणाच्छिवरूपोऽसौ सत्यं सत्यं हि शैलजे॥

पुराणेऽपि

लोके हि श्रूयते ह्येतन् मद्यस्यातिप्रसेवनात्।
लज्जां मुञ्चन्ति ह्रीमत्यो नार्यः सत्कुलजा अपि॥

यावल्लज्जा घृणा भयञ्च विद्यते न तावत् सिद्धिः।

यदा कापालिकः

रमते युवतीं रम्यां कामोन्मत्त-विलासिनीम्।
नटीं कापालिकीं वेश्यां यवनीञ्च वराङ्गनाम्॥

तदैव स भैरवः चक्रस्थो भवेदिति। ततश्च सिद्धिः। ततः सर्वं करतला-

मलकवद् भवति। तस्माद् घृणां लज्जां च परिहाय सेवनीयं मद्यं, आचरणीयं तन्त्रोक्तं कार्यं कल्याणाय मङ्गलाय । भुक्तिमुक्ति-प्रदायकमेतत्।

बलादिव नियोजिता माधवी पिबति कपालपात्रस्थं मद्यम्। ततश्च तां मदघूर्णितलोचनां विलोक्य जयन्ती क्रमाद् वासांसि तस्या गात्रात् अपनयति। चक्र-प्रवर्तनात् प्राक् 'पूजेद् योनिं सकुन्तलाम्' इति विधानमनुस्मृत्य पूजयति योनिं भैरवमुख्यः 'कुन्तलाकर्षणपूर्वकम्।' योनिपूजनान्तरं तथैव लिङ्गपूजापि करणीयेति तदपि अनुष्ठितम्।

एवं यावद् भैरवीचक्रं प्रवर्तितं भवेत् तावदेव महान् कोलाहलः समुपस्थितः। किमेतदिति पश्यतामेव तत्र समागताः सैनिकाः। पौण्ड्रवर्द्धनादागताश्च सैनिकाः केषाञ्चित् राजापथ्य-करिणाम् अन्वेषणाय चन्द्रपुरिविषयम्। तान् कापालिकान् दिगम्बरान् वेदबहिर्भूतान् दृष्ट्वा ते भृशं ताडयन्ति। केचन मृताः अपरे च पलायिताः कापालिकीभिः सह। माधवी कमपि तत्रापश्यन्ती द्रुतं धावति काममपि दिशम्। यूथभ्रष्टा मृगीव भृशं सन्त्रस्ता सा धावति। सा न जानाति कुत्र गच्छति। घटिकां यावद् द्रुतं धावन्ती सा समुपस्थिता नद्यास्तटे। कथं नदी तरणीया कुत्र वा गन्तव्यमिति चिन्तयन्त्या माधव्या दृष्टा प्रातःस्नानार्थं समागता काचिद् रमणी। समीपं गत्वा तां प्रव्राजिकां विज्ञाय पृच्छति कुत्र सा निवसतीति। तस्या आकृतिं लावण्यमयीं दृष्ट्वा प्रव्राजिका तां समाश्वासयति। तया पृष्टा माधवी कथयति यद् यदभूत्।

× × ×

अपरेद्युः कुमारं दृढं संस्वजमाना ललिता श्रावयति कथाच्छलेन 'माधवी राजान्तःपुरात् निशीथे कुत्रापि गतेति'। देवदासी स्वां वृत्तिं चरितुं गतेति अविस्पष्टं कथयति सा। श्रुत्वैव राजा चित्रवर्माणं ससैन्यं प्रेषयति, समादिशति च 'माधवी अन्वेषणीया' इति।

विमनस्कः कुमारो यावन् माधवीं प्रतीक्षमाण आस्ते तावदेव वार्त्ताहरः प्राग्ज्योतिषपुरादागत्य सहसा निवेदयति देवाय –

"राजधान्यां प्रकृतिकोपो जायते महान्। महामात्येनाहं प्रेषितो देवं प्रति। अचिरमेव प्राग्ज्योतिषपुरमागत्य राज्यं रक्षणीयं देवेनेति महामात्यो ज्ञापयति। नात्र मुहूर्तमपि हरणीयम्।"

प्राग्ज्योतिषपुर-वृत्तान्तं श्रुत्वा नितरां समुद्विग्नो भास्करवर्म्मदेवः। तद्-दिने एव राजा प्राग्ज्योतिषपुरं सकटकः प्रत्यागच्छति। माधवीमन्वेष्टुं गता जना न प्रत्यावृता इति नितरां क्षुण्णोऽपि कुमारो मनस्तापेन मौनं तिष्ठति। न कस्यापि कथितं तथ्यं, न केनाऽपि वार्त्तालापः कृतः। सचिवाश्च राज्यरक्षार्थं नितरां समुद्विग्नो भृशं दुःखितोराजा इति मत्वा न किञ्चिदपि ब्रुवन्ति।

न कोऽपि जानाति तस्य मर्मवेदनाम्। कुमारो विश्वस्तमनुचरमेकं 'माधवी प्राग्ज्योतिषमानेतव्या' इति वार्तया चित्रवर्माणं प्रति प्रेषयित्वा जीवन्मृत इव स्वनगरीं गतवान्। ललिता तमनुसरति। परं नेदानीं कुमारो ललितां कामयते। क्रुद्धा क्षुब्धा ललिता कालं प्रतीक्षते।

नद्यास्तटे प्रव्राजिकाश्रमे स्वभागधेयं निन्दन्ती माधवी दुःखेन कालं नयति। जयस्कन्धावारं गन्तुमसमर्था विचेष्टते सा। 'कदा तत्र गमिष्यामि। किं ममात्र गमनं विदितम् अभवत् सर्वेषाम्। किं कुमारो मां पूर्ववत् ग्रहीष्यति ? यदि अहं प्रत्याख्याता भवेयम् ? कि करिष्यामि अहम् ?' एवं चिन्तापरा माधवी कदाचित् रोदिति कदाचिच्च मौनं तिष्ठति।

माधवीं सान्त्वयति प्रव्राजिका। एकदा तत्र समागतः कश्चिद् राजसेवको भृत्यः। सः प्रव्राजिकां प्रणम्य कथान्तरे एवं कथयति।

—ज्ञातमिदं किं भगवत्या भास्करम्मंदेवः कर्णसुवर्णस्कन्धावारं त्यक्त्वा गतः सहसा प्राग्ज्योतिषपुरम् ?

—न जानामि। कथ्यतां सविस्तरम्।

प्रव्राजिका पृच्छति।

राजभृत्यः कथयति।

मदनमहोत्सवो नृत्यगीतादिभिः समुद्यापितः। परेद्युः प्राग्ज्योतिषादागतेन वार्ताहरेण ज्ञापितो महान् प्रकृतिकोपस्तत्र। श्रुत्वैव राजा क्षणादेव कतिपयैर्विश्वस्तैः सैनिकैः प्राग्ज्योतिषमगच्छत्। चतुरङ्गबलमपि पश्चात् गतम्। सामन्तो विष्णुदत्त इदानीं शास्ति तन्मण्डलम्। अहं पुना राजसेवकोऽन्तरङ्ग इति प्राग्ज्योतिषमेव गच्छामि राज्ञः सकाशम् ......

एवमुक्त्वा विरतो जनः। गतवान् च स्वाभिमतं देशम्।

माधवी तद्वचनमाकर्ण्य वज्राहतेव भूमौ निपतिता। प्रव्राजिका महता यत्नेन तां लब्धचेतनां करोति। सा तु गन्तुं स्थातुं वा असमर्था नितरां वाष्पाकुला तिष्ठति। प्रव्राजिका सान्त्वयति ताम्।

—वत्से माधवि। राजकार्यानुरोधादेव गतः कुमारः। सर्वमेतत् अचिन्तनीयम्। यथा कुमारेण तव संयोगः अभवत्, तथैव तस्माद् विच्छेदः। पुनरपि कुमारं लप्स्यसे। अधुना तव तपश्चर्या भवतु। तपसा त्वं परिशुद्धा भविष्यसि। तपः

प्रभावादेव कामः प्रेम्णि पर्यवस्यति। अङ्गजो हि कामः अङ्गसङ्गमिच्छति। आत्मजं प्रेम अविनाशि भवति। पङ्किलः कामो हरकोपाग्निना भस्मसात् भवति, तादृशः कामः कुवेरेण वा अभिशप्तः भवति। त्वया किं न श्रुतं हिमालये तपोनिरतं महादेवं सेवमाना पार्वती तमियेष। मदनः पार्वतीमुपलक्ष्य महादेवं शरव्यं कृत्वा युगपदेव पञ्चभिर्बाणैर्विव्याध। किञ्चिद् परिलुप्तधैर्यो महादेवस्तदा साचीकृतचापं मदनं विलोक्य ललाटस्थ-नयनवह्निना भस्मावशेषं चकार। ततश्च तपस्तेपे पार्वती। तपोऽग्निना परिशुद्धकामां तपःपूतां तां महादेवः स्वयमेव पत्नीत्वे जग्राह।

विदुषी माधवी सर्वं जानाति। तया पृष्टम्।

—ननु प्रेम्णः प्रभवः कामादेव। कामं विना प्रेम निराधारं निराकुलं मन्ये।

—सत्यं माधवि! कामादेव जायते प्रेम, पङ्कात् पंकजम् इव। निर्वातनिष्कमसाधनेन पंकजम् अहिमरश्मि ध्यायन् जलस्योपरि यदा आत्मानं प्रकाशयति तदा सूर्यस्य रश्मिभिः प्रस्फुटितो भवति। पङ्कादेव जायते नलिनी। परं फुल्लेन्दीवरे न विद्यते पङ्किलता। सुरभिगन्धि नीलोत्पलं सौरभेन सर्वान् तोषयति। तथैव प्रेम्णि पर्यवसितः कामः सर्वेषां कल्याणाय, न स्वात्मतृप्तये। न तत्रात्मकामिता।

प्रव्राजिका ब्रूते। माधवी पुनरपि कथयति।

—आत्मकामित्वमेव सर्वस्य मूलम्। 'न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति।' इति याज्ञवल्क्येन प्रबोधिता मैत्रेयी।

—आत्मनः कामाय सर्वं प्रियं भवति। आत्मकामनैव प्रीतेर्मूलत्वेन कथिता न तु कामनापरतन्त्रता।

प्रव्राजिका समाधत्ते। सा माधवीं पुनरपि कथयति।

—माधवि! तिष्ठ अत्रैव कतिपयमासान्। एतान् मासान् गमय पञ्चषट्कान् लोचने मीलयित्वा।

माधवी नोत्तरं ददाति परं मौनं क्रन्दति ।

अथ शरत् समागता । गतप्रायायां शरदि प्रव्राजिका माधव्या सह प्राग्-ज्योतिषं पुरं गच्छति । कष्टेन दुर्गमपथं गिरि-कान्तारं नदीश्चातिक्रम्य माधवी-द्वितीया प्रव्राजिका समुपस्थिता प्राग्ज्योतिषपुरम् । तत्र च सहसा राजान्तः-पुरं प्रवेष्टुमक्षमा प्रव्राजिका माधव्या नगरोपकण्ठे मन्दिराभ्यासे स्थिता । राजानु-मतिमपेक्ष्य स्थितां माधवीं प्रव्राजिका भगिनीव यत्नेन रक्षति । आत्मतत्त्वं व्याख्यायति सा ।

—माधवि ! अविनाशी आत्मा न हन्यते हन्यमाने शरीरे । शाश्वतोऽयमात्मा । आत्मजं प्रेम अपि अविनाशि । दूरादेव कुमारस्त्वया ध्येयः । तस्मै निवेद्यतां प्रेम ।

माधवी पृच्छति ।

—उत्पन्नमात्राः प्राणिनोऽस्मिन् नभस्तले सकामा भवन्तीति पौराणिकी श्रुतिः । कथं तर्हि कामस्योपरतिर्भवेत् ।

—न कामः कामस्योपभोगेन प्रशाम्यतिः । मर्यादा स्थापनीया ।

प्रव्राजिका कथयति ।

—अचिरमेव कुमारः त्वां स्वस्थानाभिषिक्तां करिष्यति ।

———

प्रत्यावृतः कुमारः कामरूपं माधवीविहीनः। स न जानीते कुत्रेदानीं सा। परं राज्ये महानन्तर्विप्लवः। प्रकृतिकोपः प्रबलः। तस्य प्रशमने कृतश्रमः कुमारः। सर्वदैव स्मरन्नपि न किमपि कर्तुं शक्नोति कार्यव्यापृतत्वात्। अन्तर्विप्लवदमनाय गतः कुमारो राजधानीं त्यक्त्वा पूर्वदेशम्। एतस्मिन्नेव काले समागता माधवी प्राग्ज्योतिषपुरं परिव्राजिकया नगरोपकण्ठे आश्रमपदे।

अथ प्रत्यावृते राज्ञि शान्ते राज्यमण्डले कदाचित् परिव्राजिका कुमारमुपगम्य निभृतं माधवीवृत्तान्तं निवेदयति। विदितवृत्तान्तः कुमारः युगपद् हर्षशोकाभिभूतः परिव्राजिकां सबहुमानं ब्रूते।

—परिव्राजिके! आर्ये त्वया प्रदत्तं मम जीवनम्! न जाने कथं त्वामहं पुरस्कृतां करोमि। परोपकाराय समर्पितप्राणा भवती मम प्राणान् एव सञ्जीवयतीति लब्धकामा इति मन्ये। अन्यत् किम्.......

राजानं विनिवार्य सा कथयति।

—देवपादानां वचनमेव सर्वान् अतिशेते। नान्यत् कामये। वराकी माधवी पुनरपि कुमारं प्राप्य लब्धप्राणा स्यादित्येव महान् आनन्दसन्दोहः। भवतु। कदा सा आगमिष्यति?

— अद्यैव, अधुनैव। नात्र विलम्बः कार्यः। ननु भटाध्यक्षः शिविकया गच्छतु तत्र।

परिव्राजिका कथयति।

— नैवं करणीयम्। तथा सति लोकापवादः स्यात्। अहमेव राजोचितविधानेन तामानेष्यामि राजान्तःपुरम्।

अथ राजाज्ञया परिव्राजिकासनाथा माधवी प्रविशति राजावरोधम्। प्रधानकलत्रस्थानमध्यास्ते सा।

यथाकालं कुमारः समागच्छति माधवीकक्षम् । दृष्ट्वैव कुमारं वाष्परुद्धकण्ठा किमपि वक्तुमसमर्था दरविगलितनयना माधवी तस्य चरणयोः पतति । कुमारोऽपि शोकावेगेन हर्षोच्छ्वासेन चाभिभूतः किंकर्तव्यविमूढो जातः । चरणतलपतितां माधवीं सहसोत्थाप्य कुमारस्तस्या नयनाश्रूणि मार्जयति वस्त्राञ्चलेन । क्षणाच्च तां वक्षसि धृत्वा सस्नेहं सान्त्वयति ।

—माधवि ! न त्वया शोचनीयं किञ्चिदपि । श्रुतं मया सर्वं परिव्राजिकामुखात् । यथा त्वया दुःखमनुभूय कालोऽतिवाहितः, तथैवाहमपि जीवितमात्रशेषमात्मानं मन्यमानो राज्यरक्षां कुर्वन्नासम् । नात्र शोकः कार्यः । यदभवत् तन् निराकर्तुं नाहं न वा त्वं प्रभवसि ।

माधवी तु 'दिष्ट्या दृष्टोऽसि' इति कथयित्वा पुनरपि क्रन्दति । कुमारस्तां दृढाश्लेषेण कथमपि प्रकृतिस्थां करोति ।

तस्यां रात्रौ द्वावपि प्रथमपरिचिताविव परस्परं पश्यन्तौ तृप्तिं नाप्तवन्तौ । अक्रमेण जल्पतोस्तयोः नूतनमिव जातं मनसः प्रवणत्वम् । याते यामे संलापः अनुरागभयादिव मौनमास्थाय पलायितः । रागान्धौ तौ पञ्चमीं धारामास्थितौ धावन्तावश्वाविव न जानीतो दरीं श्वभ्रं वा मनोभवराज्ये विचरन्तौ । क्षणदा क्षणमिव अवसिता न तु हृच्छयो महान् ।

———

१८

अथ कदाचिन् नालन्दामहाविहारं समागतो धर्मोत्तराचार्यो नाम परिव्राड् भिक्षुर्महाचीनाद् यः खलु हिउवेन् चां इति तद्भाषया प्रोक्तः। शैशव एव श्रमणचर्यां चरन् स शाक्यमुनिजन्मस्थानदर्शनाकांक्षी महता कायक्लेशेन दुर्गम-गिरिदरीमरुकान्तारान् समुत्तीर्य अध्वश्रमं स्वीकृत्य भारताख्यं वर्षमागच्छति। प्रथमं सीमान्तस्थितां पुष्कलावतीं नगरीं प्राप्य सः काश्मीरान् गतवान् त्रिपञ्चाशदधिक-पञ्चशततम शकाब्दे। ततश्च बुद्धस्मृतिपूतानि लुम्बिनी-काशीगयाप्रभृतीनि तीर्थ-स्थानानि परिभ्रमन् कतिपयवर्षाभ्यन्तरे धर्मोत्तराचार्यो नालन्दायां समुपस्थितः। भ्रमतस्तस्य चैनिकश्रमणस्य यशसा परिव्याप्तः पञ्चभारतः। तस्यागमनं श्रुत्वैव राजपुरुषैः नालन्दाविहाराधिकारिभिश्च यथोचितमाचरितम्। तैर्विहाराद् दशक्रोशे एव पथि सः संगतः। प्रदर्शितबहुमानो धर्मोत्तराचार्यो विहार-समीपस्थं मौद्गलायनस्य जन्मस्थानं गत्वा तस्य स्मृत्वा सश्रद्धं कञ्चित् कालं यापयति।

नालन्दाविहारे यथा सुख कालं यापयेद् भिक्षुस्तदर्थं विहारकर्मदानेन घन्टाध्वनिपुरःसरं समुद्घोषितम् —'अस्मिन् विहारे वरिष्ठभिक्षूणां यद् यत् स्वत्वं स्वामित्वं विद्यते तत् सर्वं धर्मोत्तराचार्याय सुलभं भवेत्। प्रत्यहं तस्मै जम्बुफलानां शतं, पूगानां विंशतिः, शालितण्डुलानां दशपात्रं प्रदेयं भवेत्।'

वोधिसत्त्व-धर्मपालस्य वासस्थानाद् उत्तरे चैनिकभिक्षोर्वासस्थानं सुनिर्दि-ष्टम्। अध्यापकानां विंशतिः तस्य साहचर्यं करोति प्रत्यहम्।

परेद्युः प्रभातवेलायां नीतः सः अध्यापकैः महाविहाराध्यक्षस्य शीलभद्रस्य समीपम्। षडधिकशतवर्षवयसा पुरुषायुषमतिरिच्य जीवन् शीलभद्रो धर्मे प्रमाणमिति धर्मरत्न इति न केवलं विहारे अपि तु जनेषु प्रसिद्धः, सर्वेषां माननीयश्च। धर्मरत्नमुपगम्य धर्मोत्तराचार्यो भूमिन्यस्तजानुः धर्मरत्नस्य पदचुम्बन-पूर्वकं कृताञ्जलिस्तमुपतिष्ठते। प्रणतं तं कृपानिरीक्षणेन वीक्ष्य शीलभद्रः पृच्छति सस्नेहम्।

—कुतो भवान् ? वैदेशिक इव परिलक्ष्यते ? अपि शीलो वर्द्धते ?

—महाचीनाद् हिउवेन्-चां नामधेयो भिक्षुरल्पमतिः शीलेन प्रज्ञया विश्रुत-मत्रभवन्तम् आचार्यमुपतिष्ठते। योगज्ञानं लब्धुकामो भवन्तं सेवते अयं वराकः।

कथयति भिक्षुः।

महाचीनाद् योगज्ञानलिप्सया समागतो भिक्षुरिति श्रुत्वैव धर्मरत्नो विस्मृतं स्मरन्निव हर्षपुलकितो जातः। तस्य नयनयोः स्थूलाश्रुबिन्दवो निपतन्ति तस्य वक्षसि। सगद्‌गदं धर्मरत्नः शिष्यान् आदिशति—'सूत्रज्ञं मद्‌भ्रातुष्पुत्रं बुद्ध-भद्रमत्रानय' इति।

आचार्यनिदेशात् शिष्यैः समानीते सप्ततिवर्षदेशीये बुद्धभद्रे धर्मरत्नस्तमा-दिशति।

—बुद्धभद्र! अपि ज्ञायते भवता एष भिक्षुश्चैनिकः हिउवेन्-चां नामा चीनदेशात् संमागच्छति योगज्ञानलिप्सया। कथय सर्वेषामवगत्यर्थं सावशेषं तद् वृत्तं यदभवत् वर्षत्रयात् प्राक्। अपि स्मरसि सर्वम्?

बुद्धभद्रो यथानिदेशं ब्रूते।

—अथ किम्। भवत्प्रसादात् सर्वं स्मरामि। शृण्वन्तु सर्वे सावहिताः। अद्यप्रभृति वर्षाणां विंशतिः व्यतीता। एतेषु विगतेषु वर्षपूगेषु महास्थविरो धर्मरत्नपादो भृशमुदर-शूलपीडया निपीडितः महत् कष्टमनुभवन् क्लेशेन शीलरक्षां कुर्वन्नास्ते। वर्षत्रयात् प्राक् आचार्यस्य शूलवेदना तथा वरीवर्द्धते स्म यथा आचार्यो योगेन प्राणान् त्यक्तुं कृतनिश्चय आसीत्। अथ तस्यां रात्रौ महास्थविरेण स्वप्ने दृष्टं देवतात्रयम्—मञ्जुश्रीः, अवलोकितेश्वरः, मैत्रेयश्चेति। ता देवताः स्वप्ने दर्शनं दत्वा गुरवे आज्ञापयन्ति। 'मा साहसं कुर्याः। मा निर्वाणेच्छां कुरु। अधुना त्वया करणीयं विद्यते। महाचीनात् कश्चिद् भिक्षुरागमिष्यति योगज्ञानं लब्धुम्। अध्ययनार्थी ज्ञानपिपासुः भिक्षुस्त्वया यथान्यायमध्यापनीयः। सूत्राणां शास्त्राणाम् अभिधर्मस्य च त्वया अध्यापनं विधेयम्।' इत्युक्त्वा ता देवता अदर्शनं गताः। स्वप्नदर्शनानन्तरम् आचार्यो निरामयो जातः।

श्रुत्वैतद् अमृतोपमवचनं हर्षविगलिताश्रुः धर्मोत्तराचार्यः प्रेम्णा पुनरपि महास्थविरं धर्मरत्नं प्रणम्य ब्रूते।

—अधीहि भगवन्। शिष्यस्तेऽहं, शाधि माम्। शिक्षय मामभिधर्मं सूत्राणि च। देहि मे योगज्ञानम्।

तच्छ्रुत्वा धर्मरत्नस्तं परिष्वज्य 'देवादिष्टोऽहमध्यापनाय। सर्वं तुभ्यमहं प्रदास्यामि' इत्युक्त्वा तं विसर्जयति।

नालन्दामहाविहारे शास्त्रचर्चायां योगाभ्यासे च निरतो धर्मोत्तराचार्यः सम्वत्सराधिकं कालं यापयति। प्रत्यहं तत्र आचार्यकल्पानां विद्यार्थिनां गोष्ठी भवति। ते शास्त्रार्थेषु विवदन्ते। कश्चन च संशेते विषयेषु। महास्थविरस्तेषां सन्देहभञ्जनं करोति युक्त्या प्रमाणेन। धर्मोत्तराचार्योऽपि तत्र समुपविष्टः कदाचित् प्राश्निकः कदाचिच्च मध्यस्थो भवति। प्रायशः स एव प्रमाणं भवति। असंगेन वसुबन्धुना च प्रवर्तितं विज्ञानवादमधिकृत्य योगाचाराणां व्याख्यानं भवति। नागार्जुनमतानुयायिभिः शून्यवादिभिस्तद् विवदन्ते। माध्यकशास्त्रमनुसृत्य ते संसारस्य सर्वशून्यतां ख्यापयन्ति। परं द्वावपि योगाचारमाध्यमिकौ हीनयानाभिमतं सर्वास्तित्वं न स्वीकुरुतः।

एकदा हीनयानी वीरसेनः तत्रागत्य 'महायानिनः खलु आकाशकुसुमवादिन' इत्यधिक्षिपन्ति। तन्निरस्यन्ति माध्यमकाः। अथान्येद्युः विज्ञानवादी सिंहरश्मिस्तत्रागतः। धर्मोत्तराचार्यस्तं मतसमन्वयवादं पाठयति। स्वरचितग्रन्थोऽयं 'हुइ चुन् लुङि'ति तद्भाषया भाषान्तरितो विद्वद्भिः समादृतः।

एवं प्रचलत्सु कार्यक्रमेषु एकदा धर्मोत्तराचार्यप्रमुखा भिक्षवो धर्मरत्नं पृच्छन्ति।

—सत्यं खलु भदन्त ! आत्मा नास्तीति। किं देशितमस्मिन् विषये लोकनाथेन ? किंस्वरूपं निर्वाणम् ? सर्वं याथातथ्येन वक्तुमर्हन्ति अत्रभवन्तः।

शीलभद्रः सस्मितं ब्रूते।

—साधु पृष्टम्। श्रूयतां, श्रुत्वा च हृदि धार्यताम्। लोकनाथेन आत्मास्ति नास्ति वेति विषये न किमपि व्याकृतम्। यद् यदुक्तं तत् प्रष्टुराशयापेक्षया। तथागतेनोक्तम्।

'........अस्त्यात्मा इत्यानन्द ! वत्सगोत्राय परिव्राजकाय प्रश्नं पृष्टो व्याकुर्यां

नन्वकल्पं स्याद्वचनाय सर्वधर्मा अनात्मन इति ……। अस्त्यात्मा इत्यानन्द ! शाश्वताय परैति। नास्त्यात्मा इत्यानन्द ! उच्छेदाय परैति इति।

असत्वाद् भगवान् जीवं तत्रान्यत्वेन नावदत्।
नास्त्यपि नावोचन् मा भूत् प्राज्ञप्तिकोऽप्यसत्॥
तथात्माऽस्ति नास्तीति पृष्टो नास्त्येव नावदत्।
आशयापेक्षया प्रष्टुः सति त्वस्तीति नाह किम्॥

आचार्यनागसेनेन व्याख्यातमेतत् राज्ञे मिलिन्दाय प्राश्निकाय।

राजा पृच्छति।

'—सच्चे भन्ते नागसेन! पुद्गलो नोपलभति।………को शीलं रक्खति? को भावनमनुयुञ्जति ? ….को मग्गफलं निब्बानानि सच्ची करोति? …. .. तस्मा नत्थि कुसलम् नत्थि अकुसलम्, नत्थि कुसलाकुसलम्। कम्मनाम् कत्तन कारेस्ता वा, नत्थि सुक्कत-दुक्कतानां कम्मनां फलं विपाको।'

श्रुत्वैतन् नागसेनः सोदाहरणं व्याख्यान्चकार।

'तच्छृणुत। कोऽयं नागसेनः। न हस्तपादं न वा शिरः, न विज्ञानम्। तथापि नागसेन इति व्यवहारः। स खलु वीरसेन इत्यपि भवितुमर्हति। भवान् रथेन आगच्छति। कोऽयं रथः ? न चक्रार-दण्डप्रतोलीप्रभृतयः पृथक्तया, परं रथ इति मन्तव्यम्। एवमेव।'

कदाचित् कालिंगने राज्ञोपसंक्रम्योक्तः स्थविरो हि नागसेनः।

पृच्छेयं भवन्तम्। बहुवोल्लकाश्च श्रमणा भवन्ति। यदि यदेव पृच्छेयं भदन्तं तदेव व्याकुर्या इति। पृच्छ इत्युक्तः पृष्टवान्।

—किं नु स जीवस्तत् शरीरमन्यो जीवः, अन्यच्च शरीरमिति।

'अव्याकृतमेतत्' इत्यवोचत् स्थविरः।

स आह।

—ननु भदन्तः पूर्वमेव प्रतिज्ञां कारितः, नान्यद् व्याकर्तव्यमिति। किमिदमन्यदेवोक्तम् —अव्याकृतमिति।

स्थविर आह।

—अहमपि महाराजं पृच्छेयम्। यदि यदेव पृच्छेयं तदेव व्याकुर्याः।

पृच्छ इत्युक्तः पृष्टवान्।

—यस्ते अन्तःपुरे आम्रवृक्षस्तस्य किमम्लानि फलानि आहोस्विन् मधुराणि ?

—नैव ममान्तःपुरे कश्चिदाम्रवृक्षोऽस्ति।

—ननु मया पूर्वमेव महाराजः प्रतिज्ञां कारितः 'नान्यद् व्याकर्तव्यमिति' किमिदानीमन्यदेवोक्तम्—आम्रवृक्ष एव नास्ति।

—कथमसतो वृक्षस्य फलानाम् अम्लतां मधुरतां वा व्याकरोमीति।

इति प्राह राजा।

—एवमेव महाराज! स एव जीवो नास्ति, कुतोऽस्य शरीराद् अनन्यताम् अन्यतां वा व्याकरोमि।

इति प्राह स्थविरः।

एतावदुदाहृत्य शीलभद्रः स्वाभिमतमुपस्थापयति।

न रूपं, न वा वेदना, न वा संस्कारः, न विज्ञानमात्मा।

नात्मास्ति स्कन्धमात्रं तु क्लेशकर्माभिसंस्कृतम्।
अन्तराभवसन्तत्या कुक्षिमेति प्रदो भवेत्॥

ये खलु स्कन्धसन्तान एवात्मप्रज्ञप्तिं न व्यवस्यन्ति तेषां मोक्षो नास्ति वितथात्मदृष्टित्वात्। स्कन्धसन्तान एवेदमात्माभिधानं वर्तते नान्यस्मिन्नभिधीयते प्रत्यक्षानुमानाभावात्। ये खलु धर्माः सन्ति तेषां प्रत्यक्षमुपलब्धिर्भवत्यसत्यन्तराये। यथा षण्णां विषयाणां मनश्च। अनुमानञ्च पञ्चानामिन्द्रियाणां भवति। न चैवात्मतोऽस्तीति नास्त्यात्मा।

एवमनात्मतत्त्वं व्याख्याय विरमति महास्थविरः शीलभद्रः। ततः पृच्छन्ति पुनरपि धर्मोत्तराचार्यप्रभृतयः श्रमणा निर्वाणमधिकृत्य प्रश्नान्। शीलभद्रः सस्मितं ब्रूते।

—वर्षाणां सहस्रं व्यतीतमस्मिन् विषये श्रमणैर्विवदमानैः। पुद्गलनैरात्म्ये जाते श्रावकादीनां निर्वाणलाभो भवति। न तेषां बुद्धत्वप्राप्तिः। धर्मनैरात्म्य एव

तत् सम्भवेत्। तदर्थं महाकरुणा अभ्यसनीया। तत्र च आवरणद्वयं विद्यते, क्लेशावरणं ज्ञेयावरणं चेति। अपसृते क्लेशावरणे निर्वाणम्। ज्ञेयावरणे अपसृत एव बुद्धत्वम्। यावद् ज्ञेयावरणं विद्यते तावत्कालं महाकरुणा सेवनीया। अनुशीलितायां महाकरुणायां जगतः प्रलयपर्यन्तं, सर्वेषां प्राणिनां निर्वाणलाभः। तच्चोक्तमाचार्यैः।

यथास्नेहक्षयाद् दीपः प्रशाम्यति निरन्वयः।
तथा क्लेशक्षयाद् जन्तुः प्रशाम्यति निरन्वयः॥

किंस्वरूपं निर्वाणमिति शिष्यैः पृष्टो महास्थविरः कथयति।

प्रहानमब्रवीच्छास्ता भवस्य विभवस्य च।
तस्मान् न भावो नाभावो निर्वाणमिति युज्यते॥

अतो न निर्वाणं भावस्वरूपं न वा अभावस्वरूपम्। निर्वाणस्य या कोटिः सा कोटिः संसारस्यापि। तयोरन्तरं न विद्यते, अतः संसारोपि तद्रूपः।

एवं महास्थविरो विवृणोति योगाचारमतम्। धर्मोत्तराचार्यस्तु नागार्जुनस्य विज्ञानवादमेव शोभनं मन्यते।

× × ×

धर्मोत्तरे तिष्ठति नालन्दामहाविहारे वत्सराधिकं कालं कदाचित् सुचरितो प्राग्ज्योतिषपुरादागतो ब्राह्मणः चत्वारिंशत् प्रश्नान् लिखित्वा धर्मोत्तराचार्यमाह्वयते खण्डनाय। सुचरितेन लिखितमेवं 'यः खलु एतेषां पक्षाणामेकमपि खण्डयेत् तर्केण युक्त्या, मिथ्यात्वं वा कस्यापि प्रतिपादयेत् तस्याहं शिरो दास्यामि।'

समाहूता विद्वत्सभा। तस्यां सभायां धर्मोत्तराचार्यः सुचरितोपस्थापितं सांख्यमतं चार्वाकमतं च युक्तितर्काभ्यामपाकरोति। सर्वे धर्मोत्तराचार्यस्य जयघोषणां कुर्वन्ति। ततः सुचरितः स्वां प्रतिज्ञां स्मरन् तस्मै शिरो दातुमुद्यतः। धर्मोत्तराचार्यस्तु 'न शाक्यमुनि-शिष्यैः कस्यापि प्राणहननमिष्यते' इति तं निवारयति साहसात्।

सुचरितो दर्शने आन्वीक्षिक्यां निपुणो विद्वान्। सर्वास्तित्ववादेषु निष्णात इति तस्मात् तान्यधीतानि धर्मोत्तराचार्येण।

अथ गच्छति काले परिव्राजकं समामन्त्र्य सुचरितः प्राग्ज्योतिषं समागच्छति निवेदयति च राज्ञे चीनदेशीय-परिव्राड्-वृत्तान्तम्। धर्मोत्तराचार्यदर्शनकुतूहली भास्करवर्मा दूतं प्रेषयति शीलभद्राय सपत्रकम्। दूतः पत्रं गृहीत्वा नालन्दाविहारं गच्छति द्रुतगामिनाश्वेन। नालन्दाविहारं प्राप्य दूतः ददाति पत्रं महास्थविराय शीलभद्राय। महास्थविरः पत्रं वाचयति।

'स्वस्ति। प्राग्ज्योतिषेश्वरो भास्करवर्मा सबहुमानं निवेदयति महास्थविराय नालन्दामहाविहारकुलपतये। श्रूयते महाचीनात् तथागतो भिक्षुः समायाति सम्वत्सराधिककालं तत्र निवसति च विद्याचर्चया। भिक्षुं दिदृक्षुर्दूतं प्रेषयामि। यथा दर्शनोत्कण्ठा न मां चिराय क्लेशयति तथा करणीयं भदन्तैः।'

पत्रपाठानन्तरं शीलभद्रश्चिन्तामग्नो धातः। सः चिन्तयति। 'इतः पूर्वं कान्यकुब्जाधिपतिना हर्षेण आमन्त्रितो भिक्षुः। पुनः न मया प्रेषितः, कालान्तरे प्रेषयामीति। अधुना प्राग्ज्योतिषेश्वरेण कुमारराजेन समाहूयते भिक्षुः। यदि तावत् तं प्रेषयामि कामरूपान् प्रति, इतश्च पुनरपि हर्षेण समाहूयते, तर्हि महान् अनर्थो भविष्यति। अतस्तत् परिहाराय न प्रेषणीयः चैनिको भिक्षु'रिति। एवं विचिन्त्य तेन प्रत्युत्तरं प्रदत्तम्। 'अधुना चैनिको भिक्षुः स्वदेशं गन्तुकामः। प्राग्-ज्योतिषगमनेऽसमर्थः।'

पत्रमेतत् प्राप्य कुमारराजः भूयोऽपि दूतं प्रेषयति पत्रेण सन्देशेन च सह 'किंचित् कालविलम्बेन यदि भिक्षुः स्वदेशं प्रत्यावर्तिष्यते तर्हि न नभोभ्रंशो भवेत्। प्रेषणीयः परिव्राड्।'

परं परिव्राड् न प्रेषितः। दूतमुखाद् वार्तां श्रुत्वा भास्करो भृशं क्रुद्धो जातः। किं करणीयमिति विचिन्त्य अन्तःपुरमागच्छति नृपः।

माधवी तं चिन्ताकुलं क्रुद्धञ्च ज्ञात्वा कारणं वैमनस्यस्य पृच्छति। राजा माधव्यै सर्वं कथयति। महाचीनस्य परमाद्भुतां कथां श्रुत्वा माधव्या अपि भिक्षुदर्शनेच्छा प्रबला जाता। सा राजानं चेतयति। सा कथयति---

'किं प्राग्ज्योतिषाधिपतिः हीनवीर्यो जातः ? किं राज्यस्य चतुरंगबलम् अलंकरणत्वे परिणतम् ? नो चेत् कथं नालन्दाविहारकुलपतिना वारं वारं प्राग्ज्योतिषाधिपतिः विमुखीक्रियेत ? अकीर्तिकरमिदं राज्ञः। तथा क्रियतां यथा कृपणः स्थविरः कुमारराजाज्ञां शिरसि मालामिव धारयति।

माधव्या एवं प्रोत्साहितो भास्करवर्मा पत्रं लेखयति शीलभद्रं प्रति। 'स्वस्ति। प्राग्ज्योतिषाधिपतिर्विज्ञापयति। विदांकुर्वन्तु नालन्दामहाविहारस्था महास्थविराः। एतावत्कालपर्यन्तमैहिकम् आनन्दमनुभवन् वसामि। श्रुत्वा चैनिकभिक्षुवार्तां मनो मे प्रवणायते धर्मे। पर भवद्भिर्न प्रेषितो भिक्षुः। किमिच्छन्ति भवन्तो यद् राज्यखण्डमिदं तिमिराच्छन्नं तिष्ठेत् ? नैष शोभनः पन्थाः। पत्रपाठानन्तरं चेद् भिक्षुर्न प्रेषयिष्यते तर्हि मम हस्तिबलमचिरमेव नालन्दाविहारं चूर्णविशेषं करिष्यतीत्यत्र नान्यथा शंकनीयम्। अतः परं भवन्तः प्रमाणम्।'

पत्रं प्राप्य धर्मरत्नेन दूतेन सह प्रेषितो धर्मोत्तराचार्यः प्राग्ज्योतिषपुरम्। अथ चीनदेशीयभिक्षुरागच्छोतति वार्तां श्रुत्वा कुमारराजः सपरिजनः तं प्रत्युद्गच्छति। कुमारराजो बहुमानं प्रदर्श्य भिक्षवे तस्मै स्वागतं व्याहरति।

—स्वागतं महाचीनादागताय भिक्षवे। अपि कुशलं धर्मोत्तराचार्यस्य। नाहं विद्वान् परं विदुषामनुचरः। नाहं स्वयं गुणी, परं समादरे गुणीनां ममैकान्तिकी स्पृहा। अत्रभवतां पाण्डित्यं शास्त्रेषु च निष्णातत्वं श्रुत्वा नितरां भवद्दर्शनाकांक्षया कालं समुत्कण्ठितो नयामि। अद्य चक्षुःकर्णयोर्युगपत् तृप्तिर्भवति भवतामत्रागमनात्।

धर्मोत्तराचार्यः श्रुत्वैतत् स्नेहस्नपितां वाचं सस्मितं ब्रूते।

—नाहमात्मानं पण्डितं मन्ये। स्वल्पीयसी मे प्रतिभा। तथापि कुमारराजेन श्रुतं मम वैदुष्यमिति कथनात् परितृप्तोऽहम्।

—स्थाने खलु विद्वत्तया धर्मानुरागेण आत्मानं कृपणं मन्यते भवान्। श्वापदसंकुलमरण्यं दुर्गमगिरिमरुकान्तारान् च समतिक्रम्य विपत्पूर्णे पथि भ्रमणं भवादृशां कृतधियामेव शोभते।

एवमुक्त्वा क्षणं विरम्य कुमारराजः पुनरपि ब्रूते।

—यदि तावन् निषेधो न वर्तते तर्हि पृच्छाम्यहं भवन्तम्। महाचीननृपतेः विजयगाथां बहुकालेभ्यः शृण्वन् अस्मि। किं सा गाथा भवतामेव नृपतेर्विजय-गौरवं प्रकाशयति ? अथ तदेव राज्यं भवद्भिः जन्मनालंक्रियते ?

धर्मोत्तराचार्यः सविस्मयं ब्रूते।

– यथार्थमेव श्रुतं प्राग्ज्योतिषेश्वरेण।

सा गाथा अस्माकं नरपतेर्विजयमधिकृत्य विरचिता, गीयते च जनैः सिद्ध-मिथुनैः शुभ्रं यशो गंगातीरे लौहित्यतटे च।

—साधु। भवान् वैदेशिक इति न मे प्रतिभाति। श्रुतं मया बहुशो महाचीन-देशस्य। ममापि जिगमिषा वर्तते तत्र, परं राजकार्यानुरोधात्…… ।

एवं परस्परं भावयन्तौ तौ परमां प्रीतिमाप्नुतः। राज्ञा तस्य निवासार्थं स्थानं गृहं च प्रदत्तम्।

प्राग्ज्योतिषपुरे वसन् धर्मोत्तराचार्यो देशस्य वृत्तान्तं जनानां च धर्माचरणं वेशभूषादिकं भाषां चाधिकृत्य विवरणं लिखति। दार्शनिका धर्मज्ञाश्च समा-गच्छन्ति तं द्रष्टुम्। कदाचिच्च सौगतमतमधिकृत्य प्रवर्तते वादः। अथैकदा कुमारस्वामी नाम मीमांसकः तत्रागत्य धर्मोत्तराचार्यं पृच्छति।

—सौगतधर्मस्य किं प्रमाणम् ?

—सुगतस्य वचनमेव तत्र प्रमाणम्। किमन्यत् प्रमाणमपेक्षते। सुगतः सर्वज्ञः। अत एव अमरसिंहेन नामलिंगानुशासने 'सर्वज्ञः सुगतो बुद्धः' इति बुद्धपर्याय-वाचिनां शब्दानाम् अग्रे तस्य सर्वज्ञत्वं घोषितम् सर्वज्ञस्य वचनमेव प्रमाणम्।

कुमारस्वामी पूर्वपक्षायते।

—इन्द्रियाद्यनपेक्षिणं जीवस्य सूक्ष्मातीतादिविषयं केवलं ज्ञानं, तद्ज्ञानं तस्य वचनाद् विना न सिद्ध्येत्, न च तस्य वचनं तद् ज्ञानं विना सिद्ध्येदिति अन्यो-न्याश्रयः कथं परिहर्तव्यः।

धर्मोत्तराचार्यः पृच्छति।

—कः अस्यार्थः ?

कुमारस्वामी विवृणोति।

—इन्द्रियजन्यं ज्ञानं जीवस्य भवति। तद् ज्ञानं भ्रम-प्रमाद-विप्रलिप्सा-विजृम्भितमिति भवद्भिरेव स्वीकृतम्। यत्तु ज्ञानं केवलं परिकल्पितं तादृशं ज्ञानं सुगतवच नादेव। तद्ज्ञानादेव सुगतस्य सर्वज्ञत्वमिति।

धर्मोत्तरः सस्मितं भाषते।

—यद् भवता प्रतिपादितं तद् भवतामेवागमात् सिद्धयति, नान्यस्मात्। सत्यमर्थबलादेव पुरुषातिशयो भवेत्। सुगतेन प्रथमं ज्ञात सर्वनैरात्म्यम्। सर्वतीर्थकृतां मूर्ध्नि तिष्ठति सुगतः सर्वनैरात्म्यदर्शनात्। तस्माद् मातिदोष-दृष्टिः करणीया।

एकदा राजसभायां धर्मोत्तराचार्येण निर्वाणस्वरूपधिकृत्य तस्य निःस्व-भावत्वं वर्णितम्। अन्येद्युश्च तेन महाचीनादारभ्य यद्यद् दृष्टं तद् वर्णितम्। तच्छ्रुत्वा सर्वे परां तृप्तिमाप्नुवन्तः। चैनिकश्रमणमात्मीयमिव मन्यन्ते पौराः।

———

अथ अकस्मादेव वार्त्ता देवस्य अकुशलमयी जाता। गोष्ठीषु आपानकेषु श्रेष्ठिचत्त्वरेषु जनैः भीतिविह्वलं साशङ्कमुपांशु जल्पितं—'देवो महान् अस्वस्थो वर्त्तते। न जाने किमिदानीञ्जातमि'ति। सगद्गदं कश्चित् कथयति 'कुमार-भास्करवर्मदेवविहीनं राज्यं कः प्रशासयिष्यति ? नूनमराजकं भविष्यति राज्यम्। प्रजाः अरक्षिताः भवेयुः। का गतिर्भविष्यति अस्माकम् ?'

एवं प्रजल्पिते कस्मिंश्चिज्जने तं विनिवार्य कश्चित् पानक्षीवः कथयति।

'वल्लभा-बाहु-वल्लरी-समाश्लिष्टः कुमारः अवरोध-परिसेवितः अवरोधे सुखं स्वपिति। अलमुत्कण्ठया।'

एवमसंलग्नवादिनं 'धिक् धिक् पानशौण्डम्' इति अन्ये तं तिरस्कृत्य वदन्ति। एवं जल्पत्सु जनेषु कश्चिद् प्राधिकारिक इव प्रौढः सखेदं भाषते दृढमनुच्चैः। 'महाराजाधिराजो भास्करवर्मदेवपादो भृशम् अस्वस्थो वर्त्तत इति सत्यम्। दाहज्वरेण पीडितो वैद्यैः सेव्यमानो देवः समुद्रगृहे विगतचेतन इव शयानस्तिष्ठति। तत्र जनानां राजपुरुषाणाञ्च गमनागमनं प्रतिषिद्धं महामात्येन इति न कोऽपि तत्त्वं जानाति। विश्वस्ताः चामरधारिण्यः ताम्बूल-करङ्क वाहिन्यश्च, तिस्रश्चतस्रो वा वैदेशिक्यो भुजिष्या अनुज्ञातास्तत्र। प्रवेशमात्र-मनुज्ञातं न निष्क्रमणं तस्मात् .... । भवतु भस्मकर्णविभूषितो देवः शशि-शेखरः अपनयतु अमङ्गलं, विदधातु कल्याणं देवस्य। भवद्भिः सर्वैः देवमन्दिरेषु तीर्थेषु महाराजाधिराज-भास्करवर्म्मदेवस्य निरामयत्वं मङ्गलञ्च प्रार्थनीयं मनसा वाचा। मा वृथा प्रजल्पितेन। त्वरताम् त्वरतां गमनाय।'

अथ आरोहति हरितहये मध्यमह्नः समागतः राजवैद्यो भिषग्भिस्त्रिभिरनु-गम्यमानः समुद्रगृहम्। आगत्य च दूरादेव भुजिष्याभिः मन्दं मन्दं संवाह्यमानतनु-तालवृन्तं चन्दन-चर्चित-कलेवरं सुधाधवलोपधानधारिणीं शय्यामधिशयानं राजानमपश्यत्। साशङ्कं समीपमुपगम्य मेचकचीवरावृतं राजानं सुचिरं निर्वर्ण्य मणिगुप्तो राज्ञो दक्षिणपाणिं शनकैर्गृहीत्वा नाडीगतिं अनुभवन्नास्ते। अनुभूय च

नाडीगतिं क्षणं पुनरपि नरपतिमुखमवलोक्य आत्मगतं तर्कयति मणिगुप्तः। 'इयं वक्रगतिं भजमाना चपला च नाडी वातपित्तजं रोगं सूचयति। नूनं द्वन्द्वजो रोगः। शास्त्रकारैः नाडीनिरूपणे प्रोक्तम्।

मुहुः सर्पगतिं नाडीं मुहुर्भेक-गतिन्तथा।
वात-पित्त-द्वयोद्भूतां प्रवदन्ति मनीषिणः ॥

सन्निपातो दाहज्वरः प्रमेहज इति तर्कयामि। सन्निपातश्च असाध्यो व्याधिः। तदेव सूचितं शिथिलं मन्दं च स्पन्दमानया नाड्या। तथा चोक्तमाचार्येण–

मन्दं मन्दं शिथिलं व्याकुल-शिथिलं व्याकुलं वा
स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च सूक्ष्मा।
नित्यं स्थानात् स्खलति पुनरप्यङ्गुलिं स्पृशेद्वा
भावैरेवं बहुविधैः सन्निपाताद् असाध्या।

दाहज्वरेण पीडितस्य कुमारस्य हिमवद् विशदा नाडी दिनत्रयेण मृत्युं सूचयति। अस्यां स्थितौ किं कथनीयम्? कथं वा राज्यानर्थकरी वार्त्ता ज्ञाप्यते मया। नहि, नैषा वार्त्ता प्रकाशनीया। न वा प्राणनाशशङ्कां जनयति व्याधिरिति कस्याऽपि मनसि पदं कुर्यात्। अप्रकाशिते च मम अपटुता प्रकटिता भवेत्। मम सामर्थ्यं निन्दन् प्रतिस्पर्द्धी शङ्खगुप्तः अवाच्यवादान् बहून् वदेत्।' एवं बहुशो वितर्क्य चात्मगतं यावच्चिन्ताक्लिष्टो विषण्णवदनो मणिगुप्तस्तिष्ठति तावदेव तं हस्तसङ्केतेन दूरं समाहूय प्रधानामात्यो नीचैः सोद्वेगं पृच्छति।

—कथय मणिगुप्त! कथं वर्तते देवः? किं परिलक्षितं किं वा ज्ञातं त्वया? अपि साध्यो रोगः ज्ञाप्यो वा? किं पुनरपि देवः स्वस्थतां भजेत? कदा?

—धैर्यमवलम्बताम् आर्यः। कतिपयैरेव वासरैः पुनः स्वां प्रकृतिमापन्नः स्वस्थो भविष्यति देवो यदि दैवमनुकूलं भवेत्। महान् दाहज्वरः उपशमनीयः। शैत्यं सम्पादनीयं गात्रस्य। वायुः प्रबलतरो जायते देवस्य।

पित्तमपि विपत्तये उत्पथं प्रवर्तते। द्वन्द्वजः रोगः। स्वेदः वेपथुश्च शरीरे।

—तर्हि किं करणीयम्? शीघ्रं क्रियतां यद् यदपेक्षते।

प्रधानामात्यः समादिशति मणिगुप्तम्।

—आर्यमिश्राः! सर्वं क्रियते यद् यदुक्तं सुश्रुतेन दाहज्वरोपशमाय। प्रलेपः प्रदीयते। मुक्ताभस्ममिश्रितम् औषधञ्च सेवनीयम्।

मणिगुप्तो यथाशास्त्रमौषधं राजानं सेवयित्वा प्रलेपदानाय यतते। वाष्पपयःपरिप्लुत-लोचना वामलोचनाः समादिशति सः।

'देवस्य दाहो महान्। गात्रदाहेन दह्यमानो देवो न क्षणमपि शान्ति लभते। देहि देहे उशीनरानुलेपनम्। चन्दनेन चर्चय कलेवरम्। चन्द्रकान्तमणिना मार्जय नयनम्। नाभिमूले निलिम्प मृगनाभिघटितं प्रलेपनम्। उदकार्द्रेण अरविन्देन सम्पादय शैत्यम्। नलिनीपत्रेण व्यजनं····

अपरेद्युः प्रभातकाले सुदीर्घं क्रन्दनमजनि राजप्रासादात्। क्रमशः वर्द्धमानं क्रन्दनं श्रुतं सर्वैः। श्रुता मर्मनिकृन्तनी करुणघोषणा। राज्ञः कुशलम्, अनामयं च श्रोतुकामा माधवी सोत्कण्ठं द्वारमवलम्ब्य तिष्ठति। सहसा किमिदमिति सा सोत्कर्णं शृणोति घोषणां क्रन्दनरवेण व्याहन्यमानाम्।

'····· पौरजानपदाः, राजपुरुषाः, भटाश्च! शृण्वन्तु सावधानाः सर्वे भवन्तः। श्रुत्वा च हृदि धार्यताम्। प्रलयपयोधि-निमग्नां रसां रसातलाद् दंष्ट्राग्रेण समुद्धरतः कोलरूपिणो विष्णोः पुत्रो नरको नाम। भौमस्य तस्यान्वये महाराजाधिराजः कुमार-भास्करवर्मदेवपादः शासन् आस्ते पितृ-पैतामहं प्राग्ज्योतिषाख्यं राज्यम्। अवसिते कर्मभोगे प्रजानुरञ्जनः राजा अद्य सायम् आयुषा वियुक्तः। अधुना यशःकायेन विराजते। सर्वैः पौरजानपदैः सैन्यबलैः राजपुरुषैश्च स्वे स्वे नियोगे अप्रमत्तैर्भवितव्यम्। अन्त्येष्ट्यादिकं सायाह्ने लौहित्यतटे सम्पत्स्यते।'

देवस्य कुशलमयीं वार्तामाहरन् कश्चित् समायाति इति सोत्कण्ठं स्थितया माधव्याऽपि श्रुतं सर्वमुद्घोषणम्। श्रुत्वैव 'देवो गतः मां परित्यज्य' इति शब्दमुच्चार्य उच्चैः माधवी छिन्नमूला लतेव भूमौ न्यपतत्। पतनसमनन्तरमेव

विगतचेतना जाता। महता यत्नेन परिचर्यमाणा कथङ्कथमपि लब्धचेतना उन्मादिनीव उच्चैर्हसन्ती ब्रूते।

—नयनिके! त्वं मम नयन-सदृशसहचरी। त्वरतां त्वरताम्। आनय प्रसाधनं लोध्ररेणुजातम्, कालागुरुचन्दनम्। प्रसाधय माम्। अद्य निशीथे मम प्रणयाभिसारः। किं न स्मरसि वल्लभो मम मत्पथं पश्यन् आस्ते। मदुपयानमाशङ्क्य भृशमुत्कण्ठते सः। एषाहम् आगच्छामि, एषाहम्। क्षणमपेक्षताम्।'

क्षणं मौनमवलम्ब्य साश्रुनयना सा सवाष्पं कथयति।

'गतो देवः, कुत्र गतः? महाकाल-मन्दिरं हित्वा यथाहं पूर्वं तमनुसृतवती तथैव इदानीमपि तस्यानुगमनं करिष्यामि। अन्यथा माधवीविहीनो देवो विवशो भविष्यति। अहो कष्टं स्मरणम्।'

सा पुनरपि भूमिविलुण्ठिता विचेष्टते।

.......अयि जीवितनाथ! कालवशं गते त्वयि यदहं ध्रिये कारणमत्र खलु कठिनाः स्त्रियः। त्वं मम विप्रियं न कृतवान्। न मयापि तव विप्रियं कृतम्। तथाऽपि कथं तवादर्शनं जातम्। रजनीतिमिरावगुण्ठिते देशे त्वामृते कः प्रदीपायते? कुमारेण विना माधवी क्षणमात्रं किल जीविता इति वचनं वचनीयतां गतं यद्यपि त्वामनुयामि सपद्येव........। विनाशिनि मानुषे न मया अविनाशि प्रेम समर्पणीयमिति आचार्य-वचनं किमिदानीम् अर्थमनुवर्त्तते ....

.....महाकालवधूत्वं न मया स्वीकृतम्। किं तस्यैव फलमीदृशम्। नहि, नहि। राजवल्लभाहं जाता कुमारैकजीविता। नाहं कामये किञ्चिदधिकम्। जीवितनाथ! कुमार! क्षणं धैर्यं धारय। एषाहं पुनरपि सेविष्ये त्वाम् .....

नयनिकानुगम्यमाना माधवी कवोष्णेन जलेन स्नानं विधाय प्रसाधयति गात्रम्। मणिमुकुरे प्रतिबिम्बितं स्वमुखं शरीरावयवं च वारं वारं वीक्ष्य तृप्तिं नाप्नोति सा। परिचारिकां हस्ते धृत्वा किञ्चिदुच्चैः पृच्छति।

—किं न पश्यसि मां कृतप्रसाधनाम् अभिसाराय। नयनिके! कथय कथाम्, किमहं कुमारस्य नेत्रतारकयोः पदं कृत्वा मर्म्महृदयं प्रवेक्ष्यामि?

हास्येन पुनरपि सा ब्रूते ।

.........रोचते कुमाराय मम स्निग्धाञ्जनं नयनयुगलम् । देहि नयनयोः अञ्जनम् । भृशं स्पृहयति कुमारो मम बिम्बफलाधरोष्ठाय । निलिम्प अधरं रक्तनिर्यासेन । प्रलेपय चरणयोः लाक्षारसम् ।.........किं हतचेतनेव पश्यसि मुधा ? ....किं ज्ञास्यसि किं करणीयम्? कथयामि । शृणोषि किम्? केतक-गन्धरेणुभिः परिमार्जय स्तनौ । चूचुकौ लिम्पनीयौ मृगनाभिकर्दमेन । स्तनपरिमण्डले देहि चन्दन-पङ्कम् ।.... पश्य स्तनयोस्तुंगत्वं किञ्चित् परिमण्डलेन हारितं, काठिन्यं च शैथिल्येन अधरीकृतम् । तथापि... । आम्, देहि हीरक-खण्ड-सनाथं हारं स्तन-शोभाकरम्........। स्थानच्युतं मा कुरु, मा कुरु । जानासि नयनिके ! प्रदत्तः एष हारो मह्यं कुमारेण यदाहं प्रथमम् अनुगृहीता । निर्भराश्लेष-साक्षिणं हारं स्थानच्युतं मा कुरु... ...। अहो मन्दभागाहं ध्रिये । कुमारविहीना क्षणम् इदानीमपि जीवामि ! आः, कुत्र कुम्भदासी मालती । सापि स्पर्द्धते माम् ।

क्षणं मौनमवलम्ब्य कर्कशं वदति ।

—चेटिके ! यक्षग्रस्तेव किं पश्यसि ? किं न जानासि समुत्तीर्णप्रायाम् अभिसार-वेलाम् ? धिग् वैधेयताम् । परिधापय शीघ्रं कञ्चुलिकाम् निचोलञ्च । देहि उर-भ्ररागं चीनांशुकम्, मेचकं क्षौमदुकूलम् ....

क्षणं विरम्य चेटिकाहस्तं धृत्वा सगद्गदं भाषते ।

—नयनिके ! गृह्यतामेतानि वस्त्राणि, इमानि प्रसाधनद्रव्याणि अलङ्करणानि । सर्वं तुभ्यम् प्रदीयते ।

इति सर्वाणि नयनिकायै प्रदीयते । ततश्च सहसा सकरुणं रुदित्वा ब्रूते ।

—आक्रोशिता ताडिता वा यच्च वाचा प्रपीडिता, तत्सर्वं क्षमस्व नयनिके !

इति परिष्वज्य समाघ्राय च शिरसि नयनिकां तडिद्झञ्झेव माधवी चरणा-भ्यामेव लौहित्य-तटं गच्छति ।

इतश्च गलिते रक्तातपे क्रमेण च क्षीयमाणतेजस्के तेजसामधिपे प्रवृत्तायाञ्च पाटलरागप्रायायां सन्ध्यायां शवयात्रार्थं समुद्गतमुद्घोषणम् । स्वयं समर्पित-स्कन्धैः सामन्तैः पुरोहितपुरःसरैः शवशिबिकां गृहीत्वा नीतो नरेन्द्रः लौहित्य-तटम् । सम्प्राप्ते लौहित्यतटे निनदत्सु शङ्खनादेषु, गायत्सु वन्दिषु, पठ्यमानेषु

यजुःसूक्तेषु, शोकाभिभूतायां जनतायाम्, उद्गते पश्चिमाशायां चन्द्रमसि, राजोचितायां चितायां हुताशक्रियया नरेन्द्रो यशःशेषतां नीयमान इव दृश्यते।

देदीप्यमाने चिताहुताशने 'भस्मान्तं शरीरमि'ति यावद् अन्वर्थतां भजते तावदेव धावन्ती माधवी तत्रागता। नरीनृत्यन्तीव सा वारत्रयं चिताग्निं प्रदक्षिणीकृत्य सन्मुखमागत्य सोपहासमिव भाषते।

—निष्करुण ! माधवी-वल्लभ ! तिष्ठ, क्षणं तिष्ठ। माधवीं विहाय गतोऽसि ? ननु एकाकिना न गन्तव्यो नाकस्त्वया। एषा अहमपि त्वामनुगच्छामि, यथाहं पूर्वं महाकाल-मन्दिरं त्यक्त्वा त्वामनुसृत्य अत्रागता तथैव त्वामनुसरामि त्रिदशालयम्। अनुजानीहि ममानुगमनम् ···· हा: हा: विनाशि तव शरीरं वह्निसात् भवति। ····· अविनाशि तु तवात्मजं प्रेम। नैतद् दहेत् पावकः। न कालो वा प्रभवति तस्य हनने। न हन्यते हन्यमाने शरीरे। तवात्मनो जायमानेन प्रेम्णा व्याप्तं मे मनः, बुद्धिस्तवानुगामिनी। इदानीं शरीरमपि त्वामनुसरति।

······हन्यमाने शरीरे आत्मनो जायमानेन प्रेम्णा मनो मे विकसितम्। बुद्धिश्च परिव्याप्ता। अहन्ता विलयं गता ·········क्षणमपेक्षस्व यावदहमपि छायेव त्वामनुसरामि। भो जीवितेश ! अनुजानीहि ममानुगमनम् ! भो पुरोहित-प्रमुखाः पौराः ! अनुजानीत कुमारानुगमनम् मम········

एवं बहुशो विलप्य यावत् सा चितावह्नौ प्रवेष्टुकामा तावत्।

—"मा मा माधवि ! मा हुताशनं प्रविश। सहमरणं खलु सहधर्माचरणानुगामि। धर्मपत्न्या एव सहमरणं विहितं शास्त्रकारैः। त्वं खलु राजावरोधः, न धर्म-पत्नी···· मा प्रविश ······

इति पुरोधसा वार्यमाणाऽपि माधवी चिताग्नौ प्रविष्टा। सपद्येव भस्मात्रशेषं नीता सा कुमारेण सह वह्निना।

पश्चात् केनापि मन्मथ-धर्मज्ञेन सहृदयेन समुत्कीर्णं तत्र।

भास्करवर्मणि याते सुरवसतिं वारिताऽपि पुरोधसा।
तद्दुःखमसहमाना माधवी समं प्राविशद् दहनम्॥

———

संशोधन-पत्रम्

केचन गुरुतर-मुद्रणप्रमादाः

मुद्रितम्	पठनीयम्	पंक्तौ	पृष्ठे
सोमगुप्नयः	सोमगुप्तः	२९	१६
हमारुढः	हयारुढः	१९	१८
सा	मा	२०	२०
नयनाभ्याः	नयनाभ्यां	१५	२५
ननुः	ननु	२०	३०
गौडाधिपं	गौडाधिपः	२७	३२
तस्तयानं	तत्स्थानं	१५	४३
स्तौं	स्तौ	८	४४
····विलोम	····विलोभ····	२५	५१
मावत्रिव	मापिबन्निव	१०	५३
····मुपक्रामति	मुपक्रामन्त्यां	१४	५५
पाणी	पणो	२१	५७
क्षुद्येव	क्षुब्धेव	१९	६०
निशीशे	निशीथे	७	६७
ट····	पट····	२३	७४
श्रीखि	श्रीरिव	८	७७
दसु दिक्षुः	दश दिक्षु	१७	९१
वं	एवं	५	९४
····रपि	पुनरपि	१२	१०५
····दानेनासृतः	····दानेनानुसृतः	१८	१०५
लताफ-नि	लताफलानि	१४	१०८
सुस्थिर····	सुस्थित····	५	१०९
वता····	भवता····	११	११७
समुपविश्य	समुपवेश्य	२४	११९

ईशवीयसप्तमशतकपूर्वार्द्धे प्राग्ज्योतिषेश्वरस्य कुमारभास्करवर्मणो गौडाभियानम् अधिकृत्य विरचित: अविनाशि-संज्ञक ऐतिहासिकोपन्यास: आधुनिकरीत्या ।

AVINASI, a historical novel in Sanskrit is based on an important event of the history of India in the first half of the seventh century A. D.—the invasion of Gauda (Bengal) by Kumar Bhaskar-varman, the king of Kamarupa (Assam) in alliance with Harshavardhan.

This is a first novel written in Sanakrit following the technique of modern novels, while the language and expression is strictly classical.

The characters are lively with emotion and action—the events are thriling while the end is subilme.

A reflection of cultural heritage of India in seventh century A. D.

SOME WORKS BY THE AUTHOR

Sanskrit :

KALIKAPURANA ed.

YOGINITANTRA ed.

with an introduction in English.

English :

ANUNDORAM BAROOAH.

a biography with critical appraisal of his works.

THE CONCEPT OF SAMAVAYA IN NYAYA-VAISESIKA PHILOSOPHY (in press)

English translation of KALIKAPURANA with notes, an analytical introduction in English. (in press)

Assamese :

BHARATIYA SABHYATA ARU SANSKRITI
(History of Indian culture and civilisation)

SAHITYA-DARPANA

Assamese translation with exhaustive notes.

KATHA-SARIT-SAGARA

Assamese translation with analysis of motifs of the tales.

HARSHA : (biograhhy)

Assamese translation from English.